
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 796 विषय धर्मशास्त्र.

नाव. धर्मप्रवृत्ति (M88).

लेखक/लिपीकार लक्ष्मण नारायण धामणकर.

पृष्ठ 142 काळ - पूर्ण/अपूर्ण

इदं पुस्तकं नारायणभांमनकारस्य सूनोः
लक्ष्मणस्य

॥श्रीगणेशाय नमः॥ नारायणं नमस्कृत्य कामदं च सरस्वतीं॥ गणनाथं
गुरूं श्चापि धर्मसंरक्षणाय वै॥ धर्मप्रवृत्तिः क्रियते कलौ नारायणेन तु॥
विदुषां कर्मनिष्ठानां संमता धर्मवर्द्धिनी॥ आलोक्य धर्मशास्त्राणि म
न्वादिरचितानि वै॥ आश्वलायनसूत्रे च वृत्तिं नारायणीं तथा॥ सा
रमेवं समुद्धृत्य स्मृतिकौमुदीं चा च नान्यथा॥ सिद्धांतानि समूलानि स
मादाय यथैव हि॥ वचनानि समस्तानि च संमितानि मनीषिणां॥
ग्रंथेस्मिं स्तानि लिख्यंते धर्मप्रवृत्तिसंज्ञके॥ शौचादिकाः प्रवक्ष्या
मि क्रियाश्चानुक्रमेण तु॥ तिथीनामपि सर्वासां निर्णयानप्यसंशया
न्॥ योगीश्वरः॥ यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत॥

धर्मसंरक्षणार्थाय तस्मिन्देशे वसेद्द्विजः॥ उषःकाले समुत्थाय चिंतयेदा
त्मनो हितं॥ स्मृत्वा नारायणं देवं स्तोत्राण्यपि च संजपेत्॥ अथ मौनवि
धिः॥ प्रभाते मैथुने काले प्रस्रावे दंतधावने॥ स्नाने भोजनकाले च मौनं
षट्सु विधीयते॥ दशहस्तं परित्यज्य मूत्रं कुर्याज्जलाशये॥ शतहस्तं पुरीषं
तु नदीतीरे वै च तु पुनं॥ याज्ञवल्क्यः॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उद
ङ्मुखः॥ कुर्यान्मूत्रं पुरीषं तु रात्रौ चेद्दक्षिणामुखः॥ अयं ब्रह्मचारि विष
य इति केचित्॥ एकवस्त्रविषयमित्यन्ये॥ वशिष्ठः॥ कृत्वा यज्ञोपवीतं
तु पृष्ठतः कंठलंबितं॥ मूत्रं चापि कुर्याद्वा कर्णे समाहितः॥ मूत्रे तु दक्षि
कर्णे पुरीषे वामकर्णके॥ धारयेद्ब्रह्मसूत्रं तु मैथुने तूपवीतिवत्॥ कृत्वा

विद्२

र्ण५

॥२॥

समीपादपि गोष्ठे मलंमूत्रं समुत्सृजेत्॥ अन्यथा कुरुते यस्तु मलंप्राप्नोति सद्धि त॥
फालकृष्टे जले चित्यां वल्मीके गिरिमस्तके॥ देवालये नदीतीरे दर्भे पुष्पे च शा
द्वले॥ सच्छायेषु वृक्षेषु मार्गे गोष्ठांबुभस्मसु॥ अग्नौ च गवां स्तिष्ठं श्वावि
ष्टं मूत्रं च नोत्सृजेत्॥ वायुवं ... र्कसोमांश्च संध्यांबुस्त्री द्विजन्मनः॥ प्रत्य
न्ते भिमुखश्चैतान् निष्ठां मूत्रं च नोत्सृजेत्॥ मनुः॥ आरण्ये तु दिवा रात्रौ चौ
र व्याघ्राकुले पथि॥ कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति॥ काष्ठादीनाम्य
पानस्कमेध्यं निर्मृजेत च॥ कंदमूलफलानी गौरेनीमेध्यं निर्मृजेत वै॥ मूत्रं
कृत्वा विना शौचं कृच्छ्रं व ध्या द्विजाधमः॥ कृपान्वितो मूत्रयुक्तः सम्यग्दो नरकं
व्रजेत्॥ अथ शौचविधिः॥ तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा॥ रति
मात्रं जलं स्नात्वा कुर्याच्छौचमनुद्धृते॥ स्मृत्यर्थसारे॥ शौचं तु द्विविधं प्रोक्तं बा

पृ ३ ॥२॥

ह्यमभ्यंतरं तथा॥ मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरं॥ हरीतकी
श्वश्वो ह्यायम्मृद्भिरप्सु च तैजेले॥ गंधलेपक्षयकरं कुर्याच्छौचं मतं द्वितः॥
स्मृतिः॥ मृच्छुभ्रवर्णा विप्रस्य क्षत्रस्यारक्तमृत्तिका॥ वैश्यस्य पीतवर्णा तु
शूद्रस्य कृष्णमृत्तिका॥ स्मृत्यर्थसारे॥ अंतर्जले देवगृहे वल्मीके मूषकस्थ
ले॥ कृतशौचावशेषाश्च न ग्राह्याः पंच मृत्तिकाः॥ मलमूत्र समीपे या रक्षम
ल्पस्थिता च या॥ वापीकूपतडागेषु न ग्राह्याः सैंमृत्तिकाः॥ मार्गोरवरस्मशा
नस्थाः पांसुलामलिनास्त्यजेत्॥ कीटांगारास्थिरहिता आखुरेघकेशान्वि
ता॥ अंतर्जले गताग्राह्या दूरतो मणिबंधनात्॥ आरण्यकेषु तेवं स्यात्
मेधाहरणं विदुः॥ आहरेन्मृत्तिकां विप्रः कूलात् सरित्तटाकयोः॥ शुद्धदे
शे तु संवीक्ष्य शार्वे रमणिर्जिताः॥ मूलाभेम्मृद उत्खायायस्मिन् देशे यद्या

पृ ५

दी१

॥३॥

पवेत्॥ तथा शौचं प्रकुर्वीत द्विजो मृत्तिकया पि चार्द्धप्रसृतिमात्रेण प्रथमा
मृत्तिका स्मृता॥ द्वितीया च तृतीया च तदर्द्धार्द्धा प्रकीर्त्तिता॥ एका लिंगे करे
तिस्र उभयोर्मृद्द्वयं स्मृतं॥ पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिका॥
आर्द्रामलकमात्रा नामत्र शौचे तु मृत्तिका॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्म
चारिणां॥ त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणं॥ आत्रेयः॥ त्रिलिंगे षड्
पाने च सव्यहस्ते दशैकतः॥ उभयोः सप्त दातव्या पुनरेका उदे तथा॥ कराग्रे
करपृष्ठे चतुर्वारैरेकमेव वा॥ पादतलो पादपृष्ठेति तिस्रस्तिस्र श्च मृत्तिका॥
भरद्वाजः॥ द्विलिंगे द्वादशापाने मृत्तिका शौच सिद्धये॥ भरद्वाजमते नोक्तं शौ
चसर्वे समानतः॥ यच्चैवाभिहितं शौचं तदर्द्धं निशि कीर्तितं॥ तदर्द्धमातु
रे प्रोक्तं मातुरस्यार्द्धमध्वनि॥ स्त्रीशूद्रादेरशक्तानां बालानां चानुपनीति

ब्र४
तु५

॥३॥

द्वि३

नां॥ गंधलेपक्षयकरं शौचं प्रोक्तं महर्षिभिः॥ शौचे यत्नः सदा कार्यः शौचमू
लो द्विजः स्मृतः॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥ मूत्रात्तु
द्विगुणं शुक्रे मैथुने त्रिगुणं स्मृतं॥ पश्चात्तु शोधयेत्तीर्थं नान्यथा शुचिताम्
यात्॥ पादपृष्ठे पादतले तिस्रस्तिस्रश्च मृत्तिकाः॥ एकैकया मृदा पा
दौ तत्सौ प्रक्षालयेत्ततः॥ वामं प्रक्षालयेत्पादं मूत्रादीश्च कथंचन॥ शौचोद्वे
वामपादं पश्चाद्दक्षिणमेव च॥ मूत्रं वाथ मलं विप्रो यत्नाद्यावि सृजेद्यदि॥
आजंघं मूत्रके पादौ आजानु शोधयेन्मले॥ यतिश्चाद्भिः स तत्रास्ता मूत्रं वाथ
मलं यदि॥ आजंघं प्रक्षालयेन्मूत्रे द्विधा चेन्माकटिं मले॥ अथ गंडूषविधिः॥ चतुरष्टा
ष्टषड्वा गंडूषैः शुध्यते क्रमात्॥ मूत्रे पुरीषे भुक्तांते रेतः प्रस्रवणेपि च॥ पुरतः
सर्वे देवाश्च दक्षिणे पितरस्तथा॥ ऋषयः पृष्ठतः सर्वे वामे गंडूषमुत्सृजेत्॥

॥५॥

उदङ्मुखो प्राङ्मुखो वाप्युक्ता चम्यततः परं॥ दंतधावनं॥ उक्तकाले न कुर्वीत नाम्य
तो दंतधावनं॥ स्मृतिः॥ मुखे पर्युषिते यस्माद्भवेदशुचिभाङ्नरः॥ ततः कुर्या
त्प्रयत्नेन शुद्ध्यर्थं दंतधावनं॥ खादिरश्च करंजश्च कदंबश्च वटस्तथा॥ तिंत्रि
णी वेणुपृष्ठाश्च आम्रनिंबौ तथैव च॥ अपामार्गश्च बिल्वश्च अर्कश्चौदुं
बरस्तथा॥ एते प्रशस्ताः कथिता दंतधावनकर्मणि॥ समिधः क्षीरवृक्षाश्च
प्रमाणं द्वादशांगुलाः॥ कनिष्ठिकावत्स्थूलाश्च यवीर्थे तु त्रिरक्षितं॥ अथ नि
षिद्धवृक्षाः॥ गुवाकतालहिंतालकेतक्यश्च मलानदः॥ खर्जूरनारिकेला
श्च सप्तैते तृणराजकाः॥ तृणराजाभिसंयुक्तं यः कुर्याद्दंतधावनं॥ नरश्चां
तृ जलयोनिः स्यात्यावद्गंगां न पश्यति॥ अथ वर्ज्ये तिथिः॥ अभ्यंगे चोदपिहितो ॥४॥
मैथुने ने दंतधावने॥ जाते च निधने चैव तिथिस्तात्कालिकी स्मृता॥ श्रीरामो
चसंस्थ

प्रतिपद्दर्शषष्ठीषु नवमी द्वादशी पुनः॥ दंतानां काष्ठसंयोगं प्रयत्नेन विवर्जयेत्॥
अर्कवारे व्यतीपाते संक्रांतौ जन्म वासरे॥ वर्जयेद्दंतकाष्ठस्तु नंदादिषु
प३ पर्वसु॥ अन्ये पत्रपर्णैः सदा कुर्यादमा एकादशीं विना॥ तपोरस्तु च कुर्वीत
जंबूनिंबाम्रपल्लवैः॥ स्मृतिः॥ एकादश्यां तृणपर्णैः कर्तव्यं दंतधा
वनं॥ स्नात्वा देवार्चनं कृत्वा व्रतसंकल्पमाचरेत्॥ उदिते च सह
स्रांशौ यः कुर्याद्दंतधावनं॥ स पिता भक्षितस्तेन पितृवंशस्य घा
तकः॥ स्मृत्यंतरे॥ अंगारवालुकाभिश्च भस्मांगुलिनखैरपि॥
इष्टकालोष्टपाषाणैर्न कुर्याद्दंतधावनं॥ अभावे दंतकाष्ठानां नि
षिद्धायां तिथौ तथा॥ अपां द्वादशगंडूषैः मुखशुद्धिर्भविष्यति॥
अथ स्नानं॥ विष्णुः॥ उत्तमं तु नदीस्नानं तडागे मध्यमं स्मृतं॥

॥५॥

कूपस्नानंतु सामान्यं भांडस्नानं तथा भवेत्॥ नदीषु देवखातेषु प्रात स्नायाद्दिने दिने॥ तदभावे तडागे वा कूपे वा स्नानमाचरेत्॥ जले नि मज्ज्य चाभ्यां च्छिखामाचम्य वै ततः॥ पुनराचम्य संकल्प्य नद्यां

स॰ स्नानं समाचरेत्॥ संसारात्त्रातरस्नायी द्विजः शूद्रत्वमाप्नुयात्॥ तस्मात्स्नानं प्रकर्त्तव्यं रविवारे स दैवहि॥ मनुः॥ अस्नातमलिनः कायो न वह्निदृक्समन्वितः॥ स्ववसेद्दिवारात्रौ प्रातःस्नानं विशेषतः॥ नदीषुं तु मरात्यादृते स्नानं समाचरेत्॥ स्वयं चैवाथ शिष्यैश्च पुत्रै र्वा धृतवारिणा॥ न स्नायाच्छूद्रहस्तेन नैकहस्तेन वाथवा॥

स॰४

उद्धृताभिरपि स्नायात् हृताभिर्द्विजातिभिः॥ स्मृत्यर्थसारे॥ जानुमात्रे जले तिष्ठन्नाचामन्नर्हि उप्यति॥ उपवीती तःस

॥५॥

प्राङ्मुखे जानुमात्रावधौ जले॥ द्विराचम्याभिमज्याथ पुनरेव द्विराचमेत्॥ मंत्रेणैव शि खां बध्वा प्राणानायम्य वै ततः॥ यमः॥ कराभ्यां धारयेद्दर्भाञ्छिखां बध्वा निधाय च॥ प्राणायामं ततः कुर्यात्संकल्पं च समाचरेत्॥ विष्णुः॥ नाभिमात्रजले स्थित्वा कृत्वा केशान्त्रध्याद्द्विजः॥ निरुद्धकर्णनासस्तु त्रिवारं मज्जनं चरेत्॥ नित्ये ष्वपि मः॥ नाभिमात्रजले तिष्ठन् सप्तद्वादशपंच च॥ त्रिवारं चापि वा कुर्यात्स्नानमे वं विधीयते॥ स्नात्वाथ देहं प्रक्षाल्य पुनः स्नात्वा द्विराचमेत्॥ आपो हिष्ठादि भिश्च वारुणैर्वा जपेद्‌ध्‌य॥ सांगुष्ठ्यं जलस्तत्रेणत्रिः प्रदक्षिणमाचरेत्॥ यः प्रव तशतिजपं ममे गंगः इति स्यच्चं॥ स्मृतिः॥ संकल्पं स्नानपठनं मार्जनं चाघमर्षणं॥ देवादितर्पणं चैवपंचांगं स्नानमाचरेत्॥ वसिष्ठः॥ स्रोतसोऽभिमुखः स्नायात् मार्जनं चाघमर्षणं॥ अन्यत्रार्कमुखो रात्रौ प्राङ्मुखो ग्निमुखोपि वा॥ स्रो तसोभिमुखो मज्जेद्यत्रापः प्रवहंति च॥ स्थावरेषु च सर्वेषु प्राच्यां भिमु खस्तथा॥ पापाः समुद्रगा नद्यः स्नात्स्नानं समुन्मुखं॥ सर्वेषां शरा रिणां

६ अष्टाक्षरमथाजपेत् १८

मेवं विनावाजस्नतेषितः॥ अथ गोमयस्नानं॥ आचम्य गोमयं वामे हस्तेघ्चला
विभज्यच॥ ऐपाललक्षणेनैव प्रोक्षयेद्दूर्वुवःस्वरां॥ सर्वदिक्षुक्षिपात्किंचिद्गोम
यंप्रणवेनतु॥ मानस्तोक इति मंत्र मुल्कोलदक्षिमंत्र पेत्॥ गंधद्वारामनेनांगं
मस्तकाद्यनुलेपयेत्॥ उदुत्तमं मुमुग्धीति हिरण्यश्रृंग मप्यथ॥ प्रसम्राजेब
हस्रूकं मवलेहेलइत्यचा॥ याःप्रवतइमेकांच जलमध्येपठेत्कमात्॥ सुमि
त्रानआपइत्येव आपोयाम्याक्षिपद्बहिः॥ नमो नारायणायेति चतुरंगं
प्रकल्पयेत्॥ तीर्थं पुष्करसंज्ञं तत्रसंनिहितोहरिः॥ इदंविष्णुरनेनैवमंत्रे

णोद्दिष्टमीक्षयेत्॥ सव्याहृतिकां गायत्रींजप्त्वास्नानं समाचरेत्॥ द्विराच
म्यजलेनैवचला चैर्वोर्ध्वपुंड्रकं॥ अंतश्चरतीत्याचम्य सुमित्रादुर्मित्रस्य
थ॥ आपोअस्मांश्च गायत्र्याशिरसि हि अभिषेचयेत्॥ ततस्नानात्प्रिवाचम्य
द्रुपदादिवयोर्यंतिवेजपेत्॥ आपोहिष्ठमम गंगेसलंनोअग्नइत्यचा॥ व्याहृति
भिश्च   नमाचरेत्॥ आपोहिष्ठादिभिर्मंत्रैर्जलमालोड्यवैततः॥

स

ऋतं – – – भिर्मंत्रैरघमर्षणमाचरेत्॥ हंसवतीं थवैपूतं पवित्रेणेत्सुधीर्जपेत्॥ सप्त
व्याहृतिकां जपं माथ निमज्जयेत्॥ अथा – – – – विद्यात्रामभिः केशवादिभिः
द्वादशभिर्निमज्ज्याथजपेदेवामृतं जपे॥ हंसः शुचिषदित्येतां जपन्मूर्ध्निसिंच
येत्॥ त्वंनो अग्नेतव   त्वन्नोअ   तरत्समंदीसूक्तं
पीत्वास्नानं समाचरेत्॥ अकारादिहकारांतात्रऋचयः   पठेत्॥
वस्नानकालेषुसर्वदा॥ अपीवासंपार   पक्षोदेव
अग्नेरक्षाणः॥ अग्निंदूतंपुरोदधे॥ अग्नेराघस्व   विप्रोः॥
प   स्वरतावर्णितश्चैवजपेदेताऋचस्ततः॥ त्रिराप्लुत्यद्विराचम्य गायत्र्या
स्नानमाचरेत्॥ हस्ताभ्यां जलमादाय सकृदेवाभिमंत्रितं॥ मस्तके च मुखे या
न्हो हृदयादिषु   कं॥ अभिषिंचेत्स्वमा   योनिमुद्रया॥ एवं
कृत्वा जपेद्भक्त्या वेदवीचयवंताः॥   प्राणायामत्रयं
कृत्वा संकल्प्याथ च तर्पयेत्॥ अक्षतोस्तु पूर्णेन देवतीर्थेन

॥७॥

तर्पणं कुर्याद्ब्राह्मणश्चोपवीत्यथ ॥ उदङ्मुखो निवीती तु यवसंमिश्रितोदकैः ॥ कृष्ण स
द्वैपायनादींश्च तर्पयेदृषितीर्थतः ॥ दक्षिणाभिमुखो भूत्वा प्राचीनावीत्यतः प
रं ॥ तर्पयेत्पितृतीर्थेन यक्ष्माणं तर्पयाम्यहं ॥ असंस्कारा मृता ये के चिज्जलाशयाः म्यहं
पितरो मम ॥ तेषामप्यायनार्थाय ■ सलिले मर्पया हस्ताभ्यां चाक्षिपेत्तोयं त
तीरे सलिलाद्बहिः ॥ उत्तीर्य पीडयेद्वस्त्रं मंत्रतो दक्षिणे तटे ॥ ये के चास्मत्कुले
जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकं ॥ दर्भा
न्विसृज्य ततस्तीरे सुपवित्रो द्विराचमेत् ॥ जले जलस्थेनाचामेज्जलात्तेन बहिः
शुचिः ॥ जलस्थोपि स्थलस्थोपि पृथगाचमनं स्मृतं ॥ निक्षिप्य दक्षिणं
पादं जले वामपदं बहिः ॥ उपवीती द्विराचामेद्द्विर्विवसनातनः ॥ स्नात्वा चा
म्य बहिर्गत्वा पूर्वोदङ्मुख मानिशेत् ॥ लंबमानकरः स्थित्वा नामत्रयञ्चान्तं जपे
त् ॥ स्नात्वा द्वरात्तटे तिष्ठेत्प्राचीनावीतिवा द्विजः ॥ यवतस्त्वादिदेहांबु तूष्णीं
भूत्वादितत्त्वये ॥ आब्रिन्नवस्त्रं संप्रोक्ष्य पञ्चीवइति मंत्रतः ॥ पारध्वास्तु

॥७॥

व३

वस्त्रं तत्पुनर्वस्त्राणि मंत्रतः ॥ स्नात्वा देहं समज्येत शिरांग्यन्यथवाहिमः ॥ योगी
श्वरः ॥ तस्मात्कायं समज्येत अंबरेण करेण वा ॥ श्वानलीढ पुनः स्नानेन नमयस्य
शुद्ध्यति ॥ तिस्रः कोट्यर्धकोटी च यावंति रोमाणि मानवे ॥ संति सर्वतीर्थानि तस्मा
त्तं परिमार्जयेत् ॥ पिबंति शिरसो देवाः पिबंति पितरो मुखात् ॥ मध्यात् यक्षगं
धर्वा अधस्तात्सर्वजंतवः ॥ सुरापानसमं तोयं पृष्ठतः केशबिंदवः ॥ दक्षिणेंगे
स्त्रवीतोयं वामे तु रुधिरं भवेत् ॥ वसिष्ठः ॥ स्नानं कृत्वा धृते वस्त्रे पततीति केशबिं
दवः ॥ तत्स्नानं निष्फलं विद्यात्पुनः स्नानेन शुद्ध्यति ॥ अथ वस्त्रधारणविधिः ॥
अष्टहस्तं नवं श्वेतं सदशं धौतमंबरं ॥ शुष्कं च धारयेद्विद्वान्सर्वकर्मसु पाव
नं ॥ कल्पः ॥ श्रुतिस्मृतिपुराणेन म वंवस्त्रं च धारयेत् ॥ षट्कर्मनिरतो ग्नाह्यं
वस्त्रं तत्तुं न धारयेत् ॥ वसिष्ठः ॥ अपवित्रपटो नग्नो नग्नश्चार्द्रपटः स्मृतः ॥ न
ग्नश्च मलिनोद्वासी नग्नः कौपीनवानपि ॥ काषायवासा नग्नःसो नग्नो नील
क२ वस्त्रवानपि ॥ अंतःकक्षा द्विकच्छश्च मुक्तकच्छस्तथैव च ॥ साक्षान्नग्नः स विज्ञेयो दश नग्नाः न२
प्रकीर्तिताः ॥ अंगुल चतुरंगुल्यो न रयिंपदानिर्मितं ॥ काषायं कृष्णवस्त्रं च मलि

सु२

नंकेशादूषितं ॥ छिन्नाग्रं चोपवस्त्रं च कुत्सितं धर्मतो विदुः ॥ हारितः ॥ नग्नः काषायव
सास्यान्नग्नः कौपीनकेवलः ॥ नग्नः स्यूतवस्त्रश्च नग्नो निर्दशवस्त्रकः ॥ [illegible]याज्ञ
वल्क्यः ॥ दग्धं जीर्णं च मलिनं मूषकोपहतं तथा ॥ खादितं गोमहिष्याद्यैस्तत्याज्यं स
र्वथा द्विजैः ॥ मिलं रक्तं तु यद्वस्त्रं दूरतः परिवर्जयेत् ॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये
न दुष्यति ॥ पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् ॥ अपवित्रो भवेद्विप्रस्त्रि
भिः कृच्छ्रैर्विशुध्यति ॥ अथ नीलवस्त्रं ॥ नीलीरक्तं यदा वस्त्रं विप्रः स्वांगेषु धारयेत् ॥
तंतुसंततिसंख्याको वसेद्धि नरकं ध्रुवं ॥ कंबले पट्टसूत्रे च नीलीदोषो न विद्यते ॥
स्त्रियाः वस्त्रे सदा त्याज्यमन्यवस्त्रं विवर्जयेत् ॥ अधौतं कारुधौतं च पूर्वेद्युर्धौतमे
व च ॥ त्रयमेतदसंबंधं सर्वकर्मसु वर्जयेत् ॥ इषद्धौतं स्त्रिया धौतं शूद्रधौतं तथैव
च ॥ अधौतं तच्च विज्ञेयं शुष्कं दक्षिणपल्लवैः ॥ अप्सु तापीड्य यद्वस्त्रं सर्वथा द्विजस
त्तमः ॥ खट्वायाः शुष्कमुपरि तद्वस्त्रं न धारयेत् ॥ धौतं चतुर्गुणं कृत्वा पुनः शोचावि
धीयेते ॥ एकवस्त्रो न भुंजीयान्न कुर्याद्देवतार्चनं ॥ न कुर्याद्वैतकर्माणि दानहो
मजपादिकं ॥ खंडवस्त्रावृतश्चैव वस्त्रार्द्धप्रावृतस्तथा ॥ च नंतरस्यैग्याद्यं भ्वानो

न

तू नं

च्छिष्टं हविर्यथा ॥ चंद्रिकायां ॥ स्नानं दानं जपं होमं स्वाध्यायं पितृकर्म च ॥ नैकवस्त्रो
द्विजः कुर्याच्छ्राद्धभोजनसत्क्रियां ॥ वसिष्ठः ॥ अष्टहस्तं नवस्त्रं तु सदशं नान्यथाश्रि
तं ॥ अहतं द्विजानीयात्सर्वकर्मसु पावनं ॥ दाक्षिण्योयोनरयोः कक्ष्योः कच्छबध्ना
ति यो द्विजः ॥ नाभौ च वामकुक्षौ च पृष्ठे चैव यथाक्रमं ॥ स्वयं प्रक्षालितं चैल
मशावे शुष्कवाससः ॥ वातेनोत्पवनं कृत्वा सप्तधा तत्र कारयेत् ॥ अथार्द्रवस्त्र
विसर्जनं ॥ स्नानं कृत्वार्द्रवस्त्रं तु त्यजेन्नीरमध्यो द्विजः ॥ गृहे स्नानं तु कृत्वा वै वि
सृजेद्यतु ऊर्ध्वतः ॥ स्नानं कृत्वा चार्द्रवस्त्रमुत्तरीयं तु ऊर्ध्वतः ॥ धृतवस्त्रमधः कुर्या
दाचम्य च पुनर्द्वयं ॥ नोत्तरीयमधः कुर्यान्नोपर्यधस्तमंबरं ॥ अज्ञानाद्यः कुर्वी
त पुनः स्नानेन शुध्यति ॥ धृत्वा वस्त्रं विधानेन करे वामे निधापयेत् ॥ मध्याह्ने तु
आर्द्रवस्त्रं द्विराचम्य निष्पीड्य पुनराचमेत् ॥ तथा च स्मृतिः ॥ निष्पीड्य वस्त्रमा
चम्य ततः संध्यामुपासीत ॥ मध्याह्ने तर्पणादूर्ध्वं वस्त्रं निष्पीडनं भवेत् ॥ तथा
दस्नानतो गेहे स्नानवस्त्रं सदा द्विजः ॥ स्वयमेव चानिष्पीड्य स्त्रियावस्त्रे न दोष

५

भाकू॥ द्वादश्यां पंचदश्यां च संक्रांतौ श्राद्धवासरे॥ वस्त्रं निष्पीडयेन्नैव न च क्षारेण
योजयेत्॥ अथ सप्त स्नानानि॥ याज्ञवल्क्यः॥ मांत्रं भौमं तथा॥ ह्यैयं वायव्यं दिव्य
मेव च॥ वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात्॥ प्रातस्नानाशक्तो विषयेदद्भुः॥
प्रातस्नानेऽशक्तश्चेन्मार्जयेदार्द्रवाससा॥ उत्तमांगादिपादांतं सम्यक्स्नानं क्वचिद्द्वि
जः॥ प्रातःकाले त्वशक्तश्चेत्साक्षिप्य स्नानमाचरेत्॥ स्नानं चैव तु मध्याह्ने हि द्विजः कुर्या
त्सविस्तरं॥ अथ गृहस्नानं॥ गृहे गृहमुखं कुर्याद्दिन्यत्राभिमुखं वने॥ प्रवाहाभिमु
खं कुर्यात्स्नानमेवं द्विजोत्तम॥ आपः स्वभावतो मेध्याः किंपुनर्वह्निसंयुताः॥ अतः सं
संतः प्रशंसंति स्नानमुष्णेन वारिणा॥ अभ्यंगे चैव मांगल्ये गृही चैव तु सर्वदा॥
शीतोदकेन न स्नायात्प्रधार्यं [illegible]पि चंदनं॥ शीतास्वप्स्वानुषिंचोष्णा शिरास्नानसु
भिषिंचयेत्॥ ताभिः स्नानं गृहे प्रोक्तं न कुर्याच्छितवारिणा॥ संक्रांतौ ग्रहणे चैव अ
मावास्यार्कपर्वसु॥ गृहे वापि न कुर्वीत स्नानं शीतोदकेन वा॥ संकल्पसूक्तपठ
नं मार्जनं चाघमर्षणं॥ देवादितर्पणं चैव गृहे पंच विवर्जयेत्॥ गृहस्नाने न कु

गो   सं   ५

भा२

र्वीत तर्पणं मार्जनं तथा॥ नांतराचमनं कुर्यात्स्नात्वा दाचम्य शुध्यति॥ पादौ प्रक्षाल्य पा
णी च सम्यगाचम्य गेहे द्विजः॥ स्नात्वा शिखां च बध्नीयाद्द्विराचम्य विशुध्यति॥ पश्चात्
गृहस्नानं यथा कृत्वा स्नानवस्त्रादिकं त्यजेत्॥ मूर्ध्[illegible]न संपीड्य पाराशर्यवचो य
था॥ स्नानं कृत्वा चार्द्रवस्त्रमूर्ध्वमुत्तारयेद्द्विजः॥ आर्द्रवस्त्रं धृ[illegible] स्नात्वा पुनः स्नानेन शु
ध्यति॥ गंगायां च महानद्यामार्द्रवस्त्रमधः क्षिपेत्॥ गृहे तडागे वस्त्रं तु मुहूर्ध्वमुत्तारये
त्फलं॥ विज्ञानेश्वरः॥ नोत्तरीयमधः कुर्यान्नोपर्यधस्तमंबरं॥ न सर्वस्तक्षणं नाप
रिद[illegible]त्कदाचन॥ शुष्कं शीर्षं च कर्तव्यं यथा शुष्केन वाससा॥ तथा बद्धशिखांश्चैव
राक्षसस्तु न यथा भवेत्॥ सप्तवाताहतं वस्त्रं शुष्कमित्याह गौतमः॥ अथ सचैलस्ना
नं॥ श्वान कुक्कुट मार्जार मल्लभांड रजस्वलाः॥ स्पृष्ट्वा देवलकं चैव सचैलं स्नानमाचरेत्॥
मातापितृविसृष्टां चाक्रियामुद्दिश्य याचकं॥ स्पृष्ट्वा देवलकं चैव सचैलं स्नानमा
चरेत्॥ देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं॥ स वै देवलको नाम हव्यकव्येषु ग
र्हितः॥ चितिं च चितिकाष्ठं च यूपं चांडालमेव च॥ स्पृष्ट्वा देवलकं चैव सवाससा ज

भा०६

लमाचरेत्॥ अथास्पृश्यजनखानितकूपस्नानं॥ अंत्यजैः खानिताः कूपास्तडागा वाप्यस्तथैव
च॥ तेषु स्नात्वा च पीत्वा च पंचगव्येन शुध्यति॥ ब्राह्मणः क्षत्रियो वैश्याः शूद्राश्चैवास्पृश्यज
नपः॥ एभिस्तु खानिताः कूपाः स्नानं तत्र न कारयेत्॥ पंचपिंडाननुद्धृत्य न स्नायात्प र
वारिषु॥ स्नायान्नद्यादेवखातेषु ह्रदेषु च रसस्सु च॥ अथ नदीरजोदोषः॥ सिंहकर्कटयो
स्ना५ र्मध्ये सर्वा नद्यो रजस्वलाः॥ तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः॥ योगीश्वरः॥ र
जोदुष्टेषु च स्नानं वर्जं नद्यादिषु द्विजैः॥ कर्दार्थं रजस्तासां संध्योपास्तिश्च तर्पणं॥
गंगा च यमुना चैव प्लक्षगा च सरस्वती॥ रजसा नाभिभूयंते ये चान्ये नदसंज्ञकाः॥
तत्र विशेषमाह व्याघ्रपादः॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च॥ चंद्रसूर्यग
हे चैव रजोदोषो न विद्यते॥ अभावे कूपवापीनामनापायश्च तं मज्जेत्॥ रजोदुष्टे
पि पयसि ग्रामभोगो न दुष्यति॥ अस्थिचर्मादियुक्तं तु खररश्वानादिदूषितं॥ उद्ध
६ रेदुदकं सर्वं शोधनं परिमार्जनं॥ धनुः सहस्राण्यष्टौ तु गतिर्यासां न विद्यते॥ नदीशब्दो
श्चन स्यु हस्ता गर्त्तास्ताः परिकीर्तिताः॥ गर्त्ता नास्य वदाचैव रजोदोषो न विद्यते॥ तत्र स्ना
१व नं प्रकुर्वीत भागविस्पर्शं चोपथा॥ अथ कुशविधिः॥ स्मृत्यर्थसारे॥ कुशाः काश्यवाद्दूर्वा शा१

उशीराश्च सकुंदुराः॥ गोधूमाश्च व्रीहयो मुंजा दश दर्भाः प्रकीर्तिताः॥ नभोमासस्य दर्शे
तु कुशाद्दर्भाः समाहरेत्॥ अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः॥ विष्णुः॥ न
भोमासचतुर्दश्यां दर्भास्तत्र समाहरेत्॥ अयातयामास्ते दर्भा नियोज्याः स्युः पु
नः पुनः॥ कृष्णपक्षे चतुर्दश्यां मानितव्याः कुशा द्विजैः॥ अकालिकास्तदा स्युर्हि अ
तुर्ध्वं न गर्हिताः॥ स्नात्वा शुच्योदङ्मुखो दिशोभ्युक्ष्य समाहितः॥ प्राणानायम्य सं
कल्प्य कुशोत्पाटनमाचरेत्॥ प्रणवेनैव संगृह्य चतुरादौ प्रपत्नतः॥ दिग्देवतानां
मंत्रेण चतुर्दिक्षु क्षिपेत्कुशान्॥ विरिंचिना सहोत्पन्नाः परमेष्ठी निसर्गज॥
३६ नुद पापानि सर्वाणि कुश स्वस्तिकरो मम॥ हुंफट्कारेण मंत्रेण सकृच्छित्वा समु
द्धरेत्॥ अच्छिन्नाग्राः अशुष्काग्राः पित्र्ये तु हरिताः कुशाः॥ अंगिराः॥ अहन्यह
नि कर्मार्थं कुशोत्पाटः प्रशस्यते॥ न पूर्वे पुष्पते कुशा योग्याश्चोत्तरतः कुशाः॥
मासि मासि ह्युद्धृतकुशाः मासि मास्येव चोदिताः॥ नोत्तरोत्तरमासेषु दर्भाविधिर
संस्थिताः॥ प्राक्कुरनात्संस्थितां दर्भान्विजैर्येषु श्राद्धकर्मणि॥ कुशाभावे तु काशास्युः॥

नो ४

११

काशाभावे यवास्मृताः॥ यवाभावे गृहीतव्या अन्ये दर्भाः प्रथोदिताः॥ पितृकर्मसु सर्वेषु
कुशा ग्राह्याः समाहिताः॥ दूर्वाः श्लक्ष्णाः सदा ग्राह्याः सर्वेषु शुभकर्मसु॥ तथा च सूत्रे॥
अप्रच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमात्रौ कुशौ नानांतर्धारिति॥ तथा कारिका॥ अनं
तर्गर्भिणौ यौ तु कुशौ प्रादेशसंमितौ॥ अनखच्छेदितौ साग्रौ तौ पवित्राभिधायकौ॥
अथ निषिद्ध दर्भाः॥ पथि तगर्भिता दर्भा ये छिन्ना नखैस्तथा॥ क्वथितानग्निदग्धांश्च कु
शान्यत्नेन वर्जयेत्॥ चितौ तोयेषु ये दर्भा ये दर्भा यज्ञभूमिषु॥ स्तरणासनपिंडेषु षड्दर्भां
स्तु विसर्जयेत्॥ स्मृत्यर्थसारे॥ पिंडकृतः पिंडाननोपः श्राद्धे चापि तर्पणे॥ विण्मूत्रादि
षु ये दर्भास्तेषां त्यागो विधीयते॥ प्रचेताः॥ अमायां तु न वा छिंद्यात्कुशांश्च समिधस्
तथा॥ सर्वत्रावास्थितः सोमो हिंसया ब्रह्महा भवेत्॥ तथा च सोमोत्पत्तिः॥ वनस्पति
गते सोमे यस्तु हिंस्याद्वनस्पतिं॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ अन्यां न पी
स्यर्थं छेदने॥ कर्मांगछेदने न दोषः॥ तदाह जाबालिः॥ कुशा [illegible] पुष्पाणि गवार्थं च का त्रा
पणादिकं॥ निषिद्धेपि च गृह्णीयादमावास्याहनि द्विजः॥ मनुरपि॥ ततः श्राद्धादिकर्ता
दिशं गच्छेत्तु दक्षिणां॥ दक्षिणां प्रवणां दर्भान्समूलानाहरेद्द्विजः॥ पराशरः॥ समित्पुष्पकु

११

८

कुशादीनि श्रोत्रियः स्वयमाहरेत्॥ शूद्रानीतैः क्रय क्रीतैः कर्म कुर्वन्व्रजेदधः॥ अथ
पवित्रलक्षणं॥ स्मृत्यर्थसारे॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥ एकैकं न्यू
नमुद्दिष्टं वर्णे वर्णे यथाक्रमं॥ सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथिकं सदा॥ त्रिभिस्तु
शांतिके कार्यं पौष्टिके पंचभिस्तथा॥ चतुर्भिश्चाभिचारस्यान्नित्ये काम्येपि कैव
न॥ द्वौ दर्भौ दक्षिणे हस्ते सव्ये त्रीनासने सकृत्॥ हेमाद्रौ विशेष उक्तः॥ पंचभिः पौष्टि
के चैव चतुर्भिर्यज्ञकर्मणि॥ पितृयज्ञे त्रिभिर्दर्भैर्द्वाभ्यां स्मार्त्तस्य कर्मणि॥ ग्रंथौ
ग्राह्यास्त्रयः साग्राः कुशास्युः षोडशांगुलाः॥ द्विमूलमेकतः कुर्यात्पवित्रं चाग्रमेक
तः॥ द्व्यंगुलं मूलवलयं ग्रंथिरेकांगुलिस्तथा॥ चतुरंगुलमग्रं स्यात्पवित्रस्य प्रमा
णकं॥ स्नाने दाने जपे होमे स्वाध्याये नित्यकर्मणि॥ सपवित्रौ सदर्भौ वा करौ कुर्वी
त नान्यथा॥ उभयत्र स्थिते दर्भैः समाचामति यो द्विजः॥ सोमपानफलं तस्य भुक्त्वा
यज्ञफलं भवेत्॥ ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्॥ आचामेद्यस्तु मूढात्मा ह
यथोच्छिष्टस्तथैव सः॥ ब्रह्मयज्ञे जपे होमे ब्रह्मग्रंथिर्विधीयते॥ भोजने वर्तुलं प्रोक्त

मेषु धौतं वधीयते ॥ सुपवित्रौ सदर्भौ वा कर्मांगाचमनं चरेत् ॥ नोच्छिष्टं तत्पवित्रं तु
भुक्तोच्छिष्टं तु वर्जयेत् ॥ यथा वज्रं सुरेंद्रस्य शूलं हस्ते हरस्य च ॥ चक्रायुधं तथा
विष्णोरेवं विप्रकरे कुशाः ॥ अथ सुवर्णादिपवित्राणि ॥ दार्भपवित्रं ताम्रं वा राज
तं हेममेव च ॥ बिभृयाद्दक्षिणे पाणौ पवित्रं चोत्तरोत्तरं ॥ याज्ञवल्क्यः ॥ अनामि
काधृतं हेम तर्जन्यां रौप्यमेव च ॥ कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः ॥ तेनयो
निष्क्रयाद्रौप्यं स्वर्णं चोरु कनिष्ठया ॥ गृहस्थः कर्णयोश्चैव बध्नुभोरुक्मे च कुंड
लिके ॥ उत्तरीयं योगपट्टं तर्जन्यां रौप्यमेव च ॥ कनीयसा सपित्रा च न धार्यमि
ति कौशिकः ॥ पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणं न धारयेत्पवित्राणि
ज्येष्ठे भ्रातरि जीवति ॥ ताते च भ्रातरि ज्येष्ठे यस्य चैव तु जीवति ॥ न तस्य
मौनं तर्जन्यां रजतस्य न धारणं ॥ पादुकारोहणं चैव योगपट्टं तथैव च ॥ न
जीवपितृकः कुर्यात्क्रियाश्राद्धं तथैव च ॥ अथ यज्ञोपवीतं ॥ उपवीतं बयोरेकं

द्वे तथेतरस्याः स्मृते ॥ एकमेव यतीनां स्यादिति धर्मो व्यवस्थितः ॥ मनुः ॥ यज्ञोपवीते
द्वे धार्ये श्रौते स्मार्ते च कर्मणि ॥ तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते ॥ परा
शरः ॥ स्तनादानाभिपर्यंतं ब्रह्मसूत्रं पवित्रकं ॥ न्यूने रोगप्रवृत्तिः स्यादधिके धर्म
नाशनं ॥ आयुःकामः सदा कुर्याद्बहु यज्ञोपवीतकं ॥ पंचभिः पुत्रकामस्तु धर्मकाम
स्तथैव च ॥ पराशरः ॥ दशाष्टौ वा गृहस्थस्य चत्वारो वनवासिनः ॥ एकैकमुपवीतं
च यतीनां ब्रह्मचारिणः ॥ यज्ञोपवीतेनैकेन जपहोमादिकं कृतं ॥ तत्सर्वं विलयं
याति पितृणां नोपतिष्ठति ॥ पवित्रं त्रुटितं वापि ब्रह्मसूत्रं यदा भवेत् ॥ नूतनं धारये
द्विप्रः स्नात्वा संकल्पपूर्वकं ॥ यज्ञोपवीतमेकैकं प्रतिमंत्रेण धारयेत् ॥ आचम्य प्र
तिसंकल्प्य धारयेन्मनुरब्रवीत् ॥ एकमंत्रेकसंकल्प्यं धृत्वा यज्ञोपवीतकं ॥ एकस्मि
न्त्रुटिते सर्वं त्रुटितं नात्र संशयः ॥ यज्ञोपवीतमजिनं मौंजीदंडं च धारयेत् ॥ नष्टे भ्र
ष्टे नवं धृत्वा नष्टं चैव तज्जले क्षिपेत् ॥ सदोपवीती बद्धशिखो वासः सकलधर्मसु ॥ सह यज्ञो
पवीतेन बध्नीयाच्छ्राद्धकर्मणि ॥ मनुः ॥ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ॥

१३।

व्रि

णांएस्तुत्रमयंराज्ञोवैश्यस्यौस्या[illegible]सूत्रकं॥स्कांदे॥उपवीतंक्रमेणस्यात्कार्पाससंशणा
माविकं॥त्रिवृदूर्ध्वंधृतंतच्चभवेदासुर्विवृद्धये॥उत्सृष्टलोमणंछिन्नंविक्रीतंविधवाच्छि
तं॥भुक्तोत्तरेत्वेनध्यायेसप्ततंतुनधारयेत्॥विधवाराचितंसूत्रंमनध्यायेकृतंच
यत्॥विछिन्नमप्यधोयातंभुक्तानिर्मितमुत्सृजेत्॥संग्रहे॥ऊर्ध्ववृत्तमधोवृत्तंपु
नरूर्ध्वं[illegible]वृत्तंयथा॥एतद्यज्ञोपवीतंस्यात्तस्यैकाग्रैंथिरिष्यते॥चैत्रामैत्राःकठाःका
ण्वाश्चरकावाजसनेयकाः॥कंठादुत्तीयसूत्रंतुकुर्युर्वैक्षालनंद्विजाः॥अयंनित्य
विधिः॥बह्वृचाःसामगाश्चैवयेचान्येयाजुषास्तथा॥पुनःसंस्कारमर्हंतिकंठादुत्ती
र्यसूत्रकं॥अभ्यंगेचावधिस्नानेमातापित्रोर्मृतेहनि॥कंठादुत्तीर्यसूत्रंतुकुर्याद्वि
क्षालनंद्विजः॥अथातिलकं॥ललाटेतिलकंकुर्यान्मृदावापिचभस्मना॥तदभा
वेतुतोयेनचंदनेनापिवाद्विजः॥ऊर्ध्वपुंड्रंस्मृतंसारंसमुच्चये॥ऊर्ध्वपुंड्रंद्विजाती
नामग्निहोत्रसमोविधिः॥श्राद्धकालेतुसंप्राप्तेकर्त्तापिकालेतुतत्त्यजेत्॥ऊर्ध्वपु
ड्रंमृदःसौम्यंललाटेयस्यदृश्यते॥सचंडालोपिशुद्धात्मापूज्यएवनसंशयः॥अ

॥१३

प

नघ्नोवाथगोघ्नोवाहेतुकःसर्वपापकृत्॥गोपीचंदनसंकीर्णमुक्तोभवतितत्क्षणात्॥द
शांगुलप्रमाणंस्यादुत्तमोत्तममुच्यते॥नवांगुलंमध्यमंस्यादधमंचाष्टकांगुलं॥सप्त
षट्पंचाभिःपुंड्रंमध्यमंत्रिविधंस्मृतं॥चतुस्त्रीद्व्यंगुलंपुंड्रंकनिष्ठंत्रिविधंस्मृतं॥ऊर्ध्व
पुंड्रंमृदाकुर्यात्तिर्यक्चैवतुभस्मना॥चंदनोभयकंकुर्यादन्यथानरकंव्रजेत्॥मध्यांगु
लित्रयेणैवधारयेदूर्ध्वपुंड्रकं॥ध्रुवमारभ्ययत्नेनब्राह्मणःसर्वकर्मसु॥भागवतानांम
गुलिनियमः॥अंगुष्ठःपुष्टिदःप्रोक्तोयशस्योमध्यमोभवेत्॥अनामिकाश्रियंदद्यान्मु
क्तिंदद्यात्प्रदेशिनी॥दर्भपाणिर्नकुर्वीतक्षमध्याद्विप्रदीपवत्॥श्रीकामःपुष्टिकामो
वायथेष्टंतिलकंधरेत्॥स्नात्वापुंड्रंमृदाकुर्याद्धोमंकृत्वातुभस्मना॥अभ्यंगोत्सव
कालेतुकस्तूरीचंदनादिना॥जपोहोमस्तथादानंस्वाध्यायंपितृतर्पणं॥व्यर्थंभवतित
त्सर्वंमूर्ध्वपुंड्रंविनाकृतं॥ललाटेतिलकंधृत्वाकुर्युःशैवाश्चवैष्णवाः॥तर्पणंचापिवै ध्म
श्राद्धंअन्यथानिःफलंभवेत्॥भागवतावपयमेतत्॥स्मार्त्तविषयेतुविशेषः॥स्वा
ध्यायजपहोमादिसंध्यादानादिकंचयत्॥ऊर्ध्वपुंड्रंविनाकुर्यात्तत्सर्वंनिःफलंभवेत्॥

१४

भा

उर्ध्वपुंड्रं त्रिपुंड्रं वा ब्राह्मणैः कर्मकर्तृभिः ॥ वर्जयेत्तिलकं भाले श्राद्धे चैव तु पर्वणि ॥ अभ्यंगस्नानके चैव विवाहे पुत्रजन्मनि मांगल्ये पुण्यसर्वे पुनर्धार्यं गोपि
चंदनं ॥ उर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्राकारमथापि वा ॥ श्राद्धकर्ता न कुर्वीत तथा वर
धाद्विसर्जनं ॥ उर्ध्वपुंड्रं सदा कुर्यात् श्रौते स्मार्ते च कर्मणि ॥ कर्ता वाप्यथ
भोक्ता वा न कुर्यात् श्राद्धकर्मणि ॥ शाकलः ॥ रक्षायस्तर्पणं श्राद्धं मर्दं वा भस्म
चंदनं ॥ यत्र स्यात्कुरुते मोहात् सर्वं गच्छेदधोगतिं ॥ नैवतिर्यक्सदा कुर्या
दूर्ध्वपुंड्रं च भस्मना ॥ चंदनेनोर्ध्वं कुर्यादिति मनुरब्रवीत् ॥ त्रिपुं
ड्रं सुरविप्राणां वर्तुलं नृपवैश्ययोः ॥ अर्धचंद्रं तु शूद्राणां अन्येषां तु ध्वपुं
ड्रकं ॥ अथ भस्मधारणं ॥ ब्राह्मणानां नृपाणां च भस्माभिस्त्रं तु चंदनं ॥
नेत्रयुग्मप्रमाणं तु त्रिपुंड्रं धारयेद् द्विजः ॥ गौरवत्यां ॥ मध्यमानामि
कांगुष्ठैर्ललाटे यस्त्रिपुंड्रकं ॥ तत्त्रिपुंड्रं भवेद् शस्तं महापातकनाश

१४

नं ॥ स्मृतिसारे ॥ अशुचिर्वाप्यनाचारो मनसा पापमाचरेत् ॥ शुचिरे
व भवेन्नित्यं त्रिपुंड्रस्य च धारणात् ॥ नारदः ॥ त्रिपुंड्रं परमं पुण्यं ब्रह्मवि
ष्णुशिवात्मकं ॥ ये जाता राक्षसाः प्रेता ये चान्ये क्षुद्रजंतवः ॥ त्रिपुंड्रधा
रिणं दृष्ट्वा पलायंते न संशयः ॥ तस्मात्सर्वप्रयत्नेन त्रिपुंड्रं धारयेत्सु
धीः ॥ विष्णुः ॥ यस्य पंक्तौ द्विजो भुंक्ते शिवभक्तस्त्रिपुंड्रधृक् ॥ स तां पवित्रि

से

पुनाति वसकलांश्च तुराननः ॥ सात्त्रियं यस्य भवेद्यस्मिन्नेदिवाप्यथ
भस्मनि ॥ सदैव धारयेद्धीमान् इति वै मुनयो विदुः ॥ न पादुके स्नानानि
दर्शे न जले हि वलोकयेत् ॥ न प्राव राज्ञि रः कुर्यात्तिलकं धर्मसाधनं
अथ संध्याकालः ॥ उत्तमा तारकोपेता मध्यमा लुप्ततारका ॥ अध
मा सूर्यसंयुक्ता प्रातःसंध्या त्रिधा मता ॥ उत्तमा सूर्यसहिता मध्यमा
लुप्तभास्करा ॥ अधमा ऋक्षसंयुक्ता सायंसंध्या त्रिधा स्मृता ॥ अहो
रात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः ॥ सा तु संध्या समाख्याता मुनि

॥१५॥

भिस्तथवादिभिः ॥ स्कंदपुराणे ॥ उदयात्प्राक्तनी संध्या घटिकात्रयमुच्य
ते ॥ सायं संध्या त्रिघटिका अस्तादुपरि भास्वतः ॥ संध्यालमालतीयं रो
पंचधांश्ये दिनस्य तु ॥ माध्याह्निकी त्वदूर्ध्वं वा पूर्वं वा स्यादिनैव हि ॥ संध्या
कालेतु संप्राप्ते संध्यां नैवमुपासते ॥ जीवमानो भवेच्छूद्रो मृतः श्वा चै
व जायते ॥ कालेतु वंदिता संध्या स्वर्गमोक्षप्रदायिनी ॥ अकाले वंदि
ता संध्या सा च वंध्या वधूरिव ॥ काललोपे प्रायश्चित्तं ॥ संध्याकाले त्व
तिक्रांते स्नात्वाचम्य यथाविधि ॥ जपेदष्टशतं देवीं ततः संध्यामुपाच
रेत् ॥ जमदग्निः ॥ एकाहं समतिक्रम्य प्रमादकृतं यदि ॥ अहोरात्रो
षितो भूत्वा गायत्र्याश्चायुतं जपेत् ॥ राष्ट्रभंगे नृपक्षोभे रोगार्ते सू
तकेपि च ॥ संध्यावंदनविच्छित्तिर्न दोषाय कदाचन ॥ देवाग्निद्विजवि
प्राणां कार्यमत्यंतसंस्थिते ॥ संध्याहीनेन दोषास्तिय तस्तत्कर्मसाध
नात् ॥ अथ संध्याविधिः ॥ कारिका ॥ अन्यश्चाहरहः कृत्यं संध्योपासन

॥१५॥

मुच्यते ॥ ग्रामाद्बहिः रपां तीर उपविश्यैव सद्द्विजः ॥ आचम्य मार्जनाद
न्यस्मृत्यं च करोत्यथ ॥ स्वशाखाया विधानेन संध्याकर्म समाचरेत् ॥
शौचाचारेत पापाने स्पष्टास्पष्टोच्चवर्णे ॥ पौराणाचमनं कुर्यान्नाम
भिः केशवादिभिः ॥ संध्यायां कर्मकाले च स्मृतेराचमनं भवेत् ॥ ब्रह्मय
ज्ञे तु वै कुर्याच्छ्रौतेनाचमनं द्विजः ॥ गोकर्णकृतहस्तेन माषमात्रं जलं
पिबेत् ॥ तन्न्यूनमधिकं पीतं सुरापानसमं भवेत् ॥ अंगुष्ठाग्रं समा
कुंच्य मध्यमानामध्यपर्वणि ॥ गोकर्णं तद्विविज्ञेयं सर्वेषाचमनेष्विव ॥ स्म
र्यंतरे ॥ संहतांगुलिहस्तेन गृहीत्वा वांबु वीक्षितं ॥ मुक्तांगुष्ठकनिष्ठाभ्यां
त्रिः पिबेद्ब्रह्मतीर्थतः ॥ शीतलं निर्मलं चांबु मधुरं क्षारवर्जितं ॥ ग्राह्यमा
चमने स्नाने देवपित्र्ये च कर्मणि ॥ अथ पुराणाचमनं ॥ केशवादित्रिभि
पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ॥ गंडौष्ठौ संमृजेद्वाभ्यां द्विरेकेकपाणिपादयोः ॥ मू
र्ध्नि चैकं च चक्षुषी कं नासाक्ष्णोः कर्णयोर्द्वयोः ॥ नाभौ नाभौ च हृदय मूर्ध्नि चै

१६॥ व ४

स ध्या

केविनिक्षिपेत् ॥ प्रणवपूर्वं तन्नाम चतुर्थ्यंतं संख्यया ॥ स्वाहांतं प्राशये
द्वारि नमोतं स्पर्शयेद्बुधः ॥ अथ समस्ताचमनं ॥ तथा च स्मृतिः ॥ संहितांगुलिभि
स्तोयं गृहीत्वा दक्षिणे करे ॥ मुक्तांगुष्ठकनिष्ठाभ्यां पिबेद्ब्रह्मतीर्थतः ॥ प्रक्षा
ल्य हस्तौ सौष्ठौ च सकृद्दोष्ठौ च तःपरं ॥ संहतांगुष्ठमूलेन द्विःप्रमृज्य ततो मु
खं ॥ च हस्तौ कराववतिस्रो संहतांगुलिभिर्जलं ॥ अद्भिर्वामकरे सिंच्य तत्रिः
पादौ च संस्पृशेत् ॥ अंगुल्यग्रैस्त्रिभिर्मध्यैरास्यार्द्धं समुपस्पृशेत् ॥ मध्यम
ध्ये जलं स्पृष्ट्वा स्पृशेन्नासादिकान्क्रमात् ॥ अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चा
दुपस्पृशेत् ॥ अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पृथक् पृथक् ॥ अंगुष्ठाय क
निष्ठाभ्यां नाभिं पश्चादुपस्पृशेत् ॥ तलेन हृदयं स्पृष्ट्वा स्पृशेदंगुलिभिः शि
रः ॥ अंगुल्यग्रैर्दक्षिणादि बाहुमूलद्वयं स्पृशेत् ॥ अनेन विधिना विप्रः कु
र्यादाचमनं [illegible] सदा ॥ अथ [illegible]साचमनं ॥ द्व्यादित्रिभिःपीत्वा
चौं[illegible]गैर्नवभिः स्पृशेत् ॥ सप्तव्याहृतिभिश्चैव शिरो मंत्रैः पृथक् पृथक् ॥

१ बिलं

१६॥

अदावंते च मध्ये च द्विर्द्विराचमनं स्मृतं ॥ तथैवार्घ्यप्रदानांते मध्ये मध्ये सकृत्स
कृत् ॥ अथ प्राणायामः ॥ स्मृत्यर्थसारे ॥ दक्षिणेन रेचनं कुर्याद्वामेनापूरि
तोदरं ॥ कुंभकेन जपं कुर्यात् प्राणायामः स उच्यते ॥ पंचांगुलीभिर्नासा
ग्रं पीडयेत्प्रणवाभिधा ॥ मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥ क
निष्ठानामिकांगुष्ठैर्नासाग्रस्य च पीडनं ॥ ओंकारमुद्रा सा प्रोक्ता यत
श्च ब्रह्मचारिणः ॥ याज्ञवल्क्यः ॥ गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपू
र्वकं ॥ त्रिः पठेदायतःप्राणः प्राणायामः स उच्यते ॥ संध्यादावर्घ्यदाने
च प्राणायामैक उच्यते ॥ आदावंते च गायत्र्याः प्राणायामास्त्रयस्त्रयः ॥
अथ मार्जनं ॥ दैपनककारिकायां ॥ अथ संध्यामुपासिष्य इति संकल्प
मार्जयेत् ॥ त्रिसप्तभिर्मार्जनं कुर्याद्दापोहिष्ठादिकु[illegible]ः ॥ पादे पादे क्षि
पेन्मूर्ध्नि त्रिः प्रणवसंयुतं ॥ आमानं प्रणवेनैव पादिषिंच्य जलैः सह ॥
कुर्यात्स प्रणवैः पादैः मार्जनं तु कुशोदकैः ॥ यस्य क्षयायेति जलं सकु

शिः

शं प्रक्षिपेद् बुधः॥ स्पृष्ट्वा हस्तेन वामेन तर्जनं यादिकेन वा॥ गलेहनुमार्जनं
कुर्यान्नान्यथेत्य ब्रवीन्मनुः॥ कुर्यात्त्र्य वादिपात्राणि संध्याकाले गृहे द्विजः॥
मार्जने प्राशने वार्घ्ये तथ्ये वाचमने सदा॥ सूर्यश्चेत्यनुवाकेन प्रातःकाले
पिबेदपः॥ मार्जने प्राशने वार्घ्ये अग्निश्चेत्यनुवाकेन सायंकाले पिबे
दपः॥ आपः पुनंतु मध्याह्ने मंत्राचमनमाचरेत्॥ विसृज्य दर्भानाचम्य
कुशपाणेश्च मार्जयेत्॥ प्रणवेन च गायत्र्या आमानं चैव मार्जयेत्॥
आपो हिष्ठेति नवभिः ऋग्भिर्मार्जनमाचरेत्॥ ऋचं चैकाम् ऋतं वा पि द्वि
पदां वाजपेद् द्वयं॥ द्विज्ञिना सापुटे नैव पापानामपाहयेत्॥ तज्जलं ना
वलोक्य वामभागे क्षितौ क्षिपेत्॥ आचम्य दर्भान् विसर्जेत् ध्या
दर्शनतः परं॥ अथार्घ्यदानं॥ पाणिभ्यां जलमादाय गायत्र्या चाभिमं
त्रितं॥ रविं वीक्ष्य मुख क्षिपेन्त्रिरूर्ध्वं संध्ययोः क्षिपेत्॥ द्वौ पादौ तु समौ
कृत्वा पूरयेदुदकांजलिं॥ गोशृंगमात्रमुत्सृज्य जलमध्ये जलं क्षिपे

त्॥ तथा चापस्तंबः॥ ईषन्नम्रः प्रभाते च मध्याह्ने ऋजु संस्थितः॥ उप
विश्य तु सायाह्ने जले त्वर्घ्यं न निक्षिपेत्॥ इत्यापस्तंबविषयं॥ कालाति
क्रमणे यस्तु त्रिसंध्यमपि सर्वदा॥ चतुर्थमर्घ्यं दातव्यं गायत्र्याष्टशतं सह॥ तर्जन्यंगुष्ठसंयोगे राक्षसी मुद्रिका स्मृता॥ तया ददाति यश्चार्घ्यं
तत्तोयं रुधिरं भवेत्॥ असावादित्य मंत्रेण सोदकेनैव पाणिना॥ प्रदक्षि
णमनुव्रज्य स्थाच मेत् संध्ययोर्द्वयोः॥ मंदेहानां विनाशाय निक्षिपेज्जलां
जलिं॥ प्रायश्चित्तार्थमाचम्य मुच्यते दैत्यहत्यया॥ अथासनानि॥ वं
शासने दरिद्रं स्यात् पाषाणे व्याधिसंभवः॥ धरिण्यां दुःखसंभूति दौर्भाग्यं दा
रुकासने॥ तृणासने यशोहानिः पल्लवे चित्तविभ्रमः॥ कृष्णाजिने ज्ञानसिद्धिर्मो
क्षः श्रीर्व्याघ्रचर्मणि॥ अभिचारे च नीलं स्यात् कंबलो ह्यधिक मे सु॥ श्वेतवस्त्रे
यशोवृद्धिः सर्वार्थं चित्रकंबले॥ धारणीये भिन्नासनं योगपट्टं तपैव मृगच
र्म च॥ कृष्णाजिनं च यत्नेन वर्जयेत्पुत्रवान् सदा॥ आधारादिनमस्कृत्य
कुशाग्रे रासनं ततः प्राणायामत्रयं कुर्यादुपविश्य कुशासने॥ ऋष्यादि लक्ष्

णं ज्ञात्वा रुद्रप्रोक्तेन मार्गतः ॥ न्यासं कुर्याद्विधानोक्तं षडंगं चाथ शक्तितः ॥ शौनकः ॥ गाय
त्रीं संस्मरेद्धीमानूर्ध्वं दिवा सूर्यमंडले ॥ कल्पोक्तलक्षणेनैव ध्यात्वाभ्यर्च्य ततो जपे
त् ॥ प्रातस्तिष्ठन् जपेद्देवीं सायं चैवोपविश्य च ॥ उपविश्य तु मध्याह्ने जपकर्म
समाचरेत् ॥ काण्वजैमिनिः ॥ पूर्वसंध्यां जपेत्तिष्ठन् सावित्रीं सूर्यदर्शनात् ॥
पश्चिमां तु समासीनः सम्यगृक्षस्य दर्शनात् ॥ व्यासः ॥ प्रातःसंध्यासु यस्ति
ष्ठन् गायत्रीं जपमाचरेत् ॥ ऊर्ध्वजानुः स सायाह्ने ध्यानालोकनतत्परः ॥
कारिका ॥ अर्द्धास्तमितआदित्ये पश्चिमस्य यउत्तरः ॥ भागस्तन्मुख आसीनः ॥
सावित्रीं वाग्यतो जपेत् ॥ आतारोदयकोदृष्टेर्दर्शनं प्रातःकर्मतदिष्यते ॥ अर्द्धास्तमितनक्ष
त्रमंतरिक्षे यदातदा ॥ आरभ्य प्राङ्मुखस्तिष्ठन् जपेदा सूर्यदर्शनात् ॥ संध्यायाः
सापमुपास्तिर्विज्ञेया विबुधैः सदा ॥ प्रथमत उपनयनकाले सायंसंध्यामुपक्र

त ३

या ३

मेदित्यर्थः ॥ तथा च शौनकः ॥ उपानीतो हि कुर्वीत सायंसंध्यामुपक्रमात् ॥ इति ॥
तथा च कारिका ॥ अहः शेषं ततः स्तिष्ठेत् सायंसंध्यामुपास्य चेति ॥ अथ जपवि
धिः ॥ प्रातर्नाभौ करौ कृत्वा मध्याह्ने हृदि संस्थितौ ॥ सायं जपति नासाग्रे जपस्तु
त्रिविधः स्मृतः ॥ अंगुष्ठेनानामिकामूलप्रदक्षिणमतंद्रितः ॥ मध्यमामूलप
र्वतं गायत्रीजप ईरितः ॥ गायत्र्या वेदमूलत्वाद्वेदः पर्वसु गीयते ॥ पर्वभि
स्तु जपेद्देवीं न मालाभिः कथंचन ॥ उष्णीषी कंचुकी नग्नो मुक्तकेशो गला
वृतः ॥ अपवित्रकरश्चैव प्रलपन्न जपेत्क्वचित् ॥ ओंकारं पूर्वमु
च्चार्य भूर्भुवः स्वस्ततः परं ॥ गायत्र्याः प्रणवश्चांते जपस्त्वेष विधिः स्मृतः ॥ त्रिसो व्याहृ
तयः कुर्वन् प्रथमं गोकारसंपुटाः पुनः संहृत्य चोंकारं मंत्रस्याद्यंतयोस्तथा ॥ वाचि
कश्चोपांशुश्च मानसः त्रिविधः स्मृतः ॥ त्रयाणां जपयज्ञानां श्रेष्ठः स्यादुत्त

रोत्तरः॥ यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः॥ मंत्रमुच्चारयेद्वाचा
जपयज्ञः सवाचिकः॥ शनैरुच्चारयेन्मंत्रं मंदमोष्ठौ प्रचालयेत्॥ अप
रैरश्रुतः किंचित्स उपांशुर्जपः स्मृतः॥ धिया यदक्षरश्रेण्या वर्णाद्व
र्णं पदात्पदं॥ शब्दार्थचिंतनं भूयः कथ्यते मानसो जपः॥ मानसः सि
द्धिकामानां पुत्रकाम उपांशुकः॥ वाचिको मारणे चैव प्रशस्तो
जप ईरितः॥ वाचिकास्त्वेक एव स्यादुपांशुः शतमुच्यते॥ साह
स्रं मानसः प्रोक्तं मन्वत्रिभृगुनारदैः॥ स्मृत्यर्थसारे॥ ब्रह्मचारी
गृहस्थश्च शतमष्टोत्तरं जपेत्॥ वानप्रस्थो यतिश्चैव सहस्रा
द्धिकं जपेत्॥ शौनकः॥ अष्टोत्तरशतं नित्यमष्टाविंशतिमेव च॥
विधिना दशकं वापि त्रिकाले संजपेद्द्विजः॥ अथ प्रदोषे जपसं
ख्या॥ श्राद्धे प्रदोषे दर्शे च गायत्री दशसंख्यया॥ अष्टाविंशा सन

=न ध्यायेत्सुदीनेतु यथाक्रमं॥ अथ जपस्थानं॥ गृहे जपं समं विद्याद्गोष्ठे शतगुणं भवेत्॥
पुण्यारण्ये तथारामे सहस्रगुणितं विदुः॥ अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतं॥
कोटिर्देवालये प्राहुरनंतं विष्णुसन्निधौ॥ सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य च जलस्य
च॥ विप्राणां च गवां चैव सन्निधौ शस्यते जपः॥ अश्वत्थमूलमाश्रित्य जपहोम
सुरर्चनं॥ अक्षय्यं फलमाप्नोति ब्रह्मणो वचनं यथा॥ अथ निषेधः॥ पतितानां
यां त्यजानां दर्शने भाषणे श्रुते॥ क्षुते ... वातगमने जृंभणे जपमुत्सृजेत्॥ धो
प्राप्तावाचम्य चैतेषां प्राणायाममथ ...॥ कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्यादिदर्शनं
अथ कामपरत्वान्मालाविधिः॥ शंखाक्षमणयः श्रीदाः स्फटिको मोक्षदः परः॥ पद्मा
मु६ क्षाः पुष्टिलक्ष्मीदा रुद्राक्षाः भुक्तिमुक्तिदाः॥ पुत्रजीवभवाः पुत्रपशुधान्यसमृद्धि
दाः॥ विद्रुमाः वश्यधनदाः सौभाग्यार्थाश्च मौक्तिदाः॥ पापक्षयाः कुशामयाः
कामदाः स्वर्णसौख्यजाः॥ प्रवालकमुक्तास्फटिकैस्त्रिकोटिफलप्रदं॥ तुलसीगण
नायेन गणितं चाक्षयं जपेत्॥ रुद्राक्षमणिनाचैव अनंतफलमश्नुते॥ अ
थ रुद्राक्षधारणं॥ रुद्राक्षान्कंठदेशे दशनपरिमितान्मस्तके॥ विंशति द्वे
षट्षट्कर्णप्रदेशे करयुगलगतान्द्वादश द्वादशैव॥ बाह्वोरिंदोः कलाभिः

रथगापिचगतावेकमेकत्रिरवायांवक्ष्यस्यष्टाधिकं यः कल्लयतिचस्नातेसः स्वयंनी
लकंठः॥ अथसंध्योपासनंशौनकः॥ सायंप्रातरुपस्थानं कुर्यान्मंत्रैर्यथाक्रमं॥
जातवेदसइत्येकलर्च योदावग्निमहे॥ नमोब्राह्मणाइत्येतैरुपतिष्ठेद्द्विजःप्रति॥
उत्तमेचानुवाकैश्च नगायत्रीचविसर्जयेत्॥ प्रसंगतोमध्याह्नसंध्योच्यते॥ आ
चार्यः॥ कुर्यान्मध्याह्निकींसंध्यां ब्रह्मयज्ञंदत्तलरं॥ संगवाद्धर्ध्वमेवाद्युनंचेदर्वा य
गथापिवैचिश्वामित्रः॥ सर्वदर्च्यतुमध्याह्ने प्रक्षिपेदुंसइत्यृचा॥ आयुष्टो
तिमंत्रेणगायत्र्यावेतिकेचन॥ उपस्थानंतुमध्याह्ने कुर्यात्सूर्यस्यसन्मुखः॥
उदित्यमितिवैचित्रंदेवानामित्यनेनच॥ अथवाभिवादनं॥ आत्मपादौतथाभू
मिंस्पृष्ट्वामध्याभिवादनं॥ नक्षत्रंचतथासूर्यंद्विजोनप्यभिवादयेत्॥ विश्वाद
र्शे॥ पूर्वनाम्नाभिवाद्यःपितृनोदितमवेत्शौनकःश्रोत्रियस्तत्रश्रेष्ठोज्यायान्के
नीयानपिभवतिनदामातुलोवापिनत्व्यः॥ तुर्देवदुपिवर्जःकुशासलिलस
मित्कुष्पपाणिः स्वयंवारहोधावन्तुदक्षयापतितश्राद्धेशोच्यलश्रांतप्रणम्योप
वासः॥ स्मर्त्यर्थसारे॥ ज्येष्ठंनाथकनिष्ठंनासंध्यांतेचाभिवादयेत्॥ वर्जयेत्तु सु ॥२०॥

तंब्राह्मणंदोहितंदुहितुःपतिं॥ नारायणः॥ नमेदुदमधीमानंरपदत्रमसमन्वितं॥
स्मारणंयब्राह्मणंसांगंकनिष्ठंचाभिवादयेत्॥ नित्यवदमधीतारंअध्यापयं
तमेवच॥ अनध्यालोनमस्कुर्याज्जेष्ठोवापिकनीयसं॥ वर्ज्याभाह॥ वमंतं
जंभमाणंचकुर्वतंदंतधावनं॥ अभ्यक्तशिरसंस्नानंकुर्वतंनाभिवादये
त्॥ दूरस्थंजलमध्यस्थंधावंतंधनगर्वितं॥ उन्मत्तंबधिरंमूकमंधंचना
भिवादयेत्॥ अथोपासनविधिः॥ तत्रेदंसूत्रंपाणिग्रहणादिगृह्यंपरि
चरेदिति॥ तत्रादौहोमद्रव्यमाह॥ होममनुरव्यायजमानःपत्नीपुत्रश्चकं
न्यका॥ ऋत्विकृशिष्योगुरुर्भ्राताभागिनेयःसुतापतिः॥ एतैरेवहुतंयत्तुतद्धुतंस्वय
मेवहि॥ कार्याचेत्कारणात्कर्ता स्वयंकर्तुंनशक्यते॥ होमंकुर्याद्दन्नाखौचेदवि
कृतकर्तुरनुज्ञया॥ यदिस्यात्सूतकंकर्तुः कुर्वितान्यइमाविना॥ आत्तमितेसा
यंजुहोत्युदितेप्रातरितिब्राह्मणं॥ तथाचकारिका॥ अथयस्मिन्निवाह्य
ग्निरुत्पन्नोहविलस्यतुणायहायंतनमारभ्यवन्हिंपरिचरेदिति॥ येसौ

॥८

॥२१॥

मिश्चोपासनं सायमारंभणं(पु)मिति सिद्धं॥ अभिचारे तु प्रातराशय विपश्चिलि
खं॥ उदिते जुहोतीति श्रुतिः॥ तथा चाह मनुः॥ कालमाह॥ लेखामात्र श्च
द्रश्येत रश्मिभिश्च समन्वितः॥ उदितं तं विजानीयात्तत्र होमं विधीयते॥
संग्रहे॥ हस्तादूर्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति॥ तावद्धोमकालोयं प्रा
तस्त्वदितहोमिनां प्रातर्द्वादश नाड्यस्तु सायं तु नव नाडिकाः॥ होम
कालः समुद्दिष्टं यं बो मुनिभिस्तत्ववेदिभिः॥ अथ स्थंडिलादि॥
इषुमात्रावरं सर्वतः स्थंडिलमुल्लिख्येति सूत्रं॥ श्रौ नकोपि॥ अर
त्निमात्रं विज्ञेयमग्नेरायतनं शुभं॥ श्रौते चोपासने वापि स्वातयो
निर्विवर्जितं॥ मेखलाद्वितयं कार्यं रेखा लग्नं तु बाह्यतः॥
बाह्याचेंगुलविस्तारा प्यंतरा च तुरंगुला॥ बाह्यां उं

॥८

॥२१॥

गुलोत्सेधाभ्यंतरा द्वादशांगुला॥ विस्तारेण तु कर्तव्या समा श्ल
क्ष्णा दृढा शुभा॥ अन्यपक्षे॥ नित्यहोमे तु कुंडं स्यान्मेखलात्र
य संयुतं॥ भूमेरूर्ध्वं तु कुर्वित चतुर्विंशांगुलं शुभं॥ मेखलान्नो
न्नता कार्या त्वेकैका चतुरंगुला॥ द्व्यंगुला विस्तृते कैका खातः
स्यात् द्वादशांगुलः॥ गृह्याग्नि रक्षणाशक्तौ विशेषः शाकल्यः
अग्निसंरक्षणे यस्य शक्तिर्यदि न विद्यते॥ समिध्वारोप
ये दग्निं हस्तयोरथवापि च॥ अथ प्रयोगः॥ लौकिकाग्निं
प्रतिष्ठाप्य कुंडे वा स्थंडिले पि वा॥ पाणिस्थं वा समित्स्थं वा

॥२२॥

धया

वान्हिसंयोजयेत्ततः॥ अथप्रत्यवरोहेतिमंत्रेणाग्निंसमिध्यस्थलं॥ पाणिस्थंवाप्यनेनैवनिदध्याल्लौकिकेनले॥ यथाविधिसुसंकल्प्यकुर्यादौपासनंहविर्भुजः॥ पर्युक्ष्याग्निंपरिस्तीर्यपर्युक्ष्यचततः परं॥ पयःप्रक्षालितेचैकेस्रुकुर्यादग्निहोत्रवत्॥ दर्भेणसर्वं ज्वलयेद्दपकंपकेनवच्या॥ अधिश्रित्यप्रणीयंप्रतिसिंचेन्नवारिणाच॥ पुनर्नावज्वलतानेनपरिहृत्यप्रहृत्यतत्॥ पयोयवागूः सर्पिश्चलौदनंदधितंडुलाः॥ सोमस्तैलमपोव्रीहिर्मुद्गस्तितिलायवाः॥ यज्ञादीनिचचारिदिकुम्भकानियाज्ञिकाः॥ दध्यादिनामपक्वानिना॥ ॥श्री॥ ॥२२॥

द्विपिलओदनः=२

घिश्रपणमिष्यते॥ स्थसर्पसारे॥ त्रियंगुव्रीहिश्यामाकानीवाराश्चतपायवाः॥ यावन्नकाश्चगोधूमाऔपासनशुभावहाः॥ शालिश्यामाकनीवारागोधूमाव्रीहयोयवाः स्वरूपेणैवहोम्याःस्युःस्वरूपेणैववैतिलाः॥ कारिका। व्रीहिणांचयवानांच वतुःषष्टिरथाहुतिः॥ तिलानांतुतदर्द्धंस्यात्तदर्द्धंस्याद्घृतस्यतु॥ द्रवंहविःस्रुवेणैवपाणिनाकठिनंहविः॥ जुहूयादग्नयेस्वाहासुसमिद्धेहुताशने॥ शौनकः॥ अग्निःप्रक्षालितान्शुभ्रान्तंडुलानग्निसंस्कृतान्जुहूयादग्नयेस्वाहा सूर्यायप्रातरेवच॥ ध्यात्वाशुद्धंचतुर्थंतुप्रजापतयइत्यपि॥ स्वाहाकारेणैवहुत्वाकुर्यात्परिसमूहनं॥ औपासनेहुतेदेवमंगुलिनांचवामतः॥ वैश्वदेवेतथाचान्येषाहुतीरग्नतोहुनेत्॥ पयसाज्येनवाप्रातस्तेवैवाहवतिहूतः॥ नै पूर्वमंत्रस्तुसूर्यायस्वाहेत्यन्यत्समंभवेत्॥ शौनकः॥ आग्नेयैश्चवसौम्यैश्चप्रा

॥२३।

जापत्येननित्यशः॥ सौरवैश्वानरीयैश्च वासमस्येति पंचभिः॥ सायमुपस्थानं॥ अग्न
आयूंषि पवसे इति द्वाभ्यामग्ने त्वमित्यपि॥ कुर्यात्सायमुपस्थानं प्रजापत इति त्वपि॥
सूर्यो न इति पंचर्चः प्रात रौपासने जपेत्॥ उदुत्यं चित्रं देवानां युद्वयं च प्रजाप्र
जापते॥ अथ समस्य होमः॥ कालद्वये त्वसौ कश्चिदेकस्मिन्काल एव वा॥ प्रागेवो
क्तेन विधिना समस्य सायमाचरेत्॥ चतस्रश्चाहुतीर्हुत्वा तत्र द्वे सायमाहुती॥
द्वे प्रातराहुती सायं होमे चैकास्मिन्त्यति॥ समस्तं सायमारभ्य जुहुयात्सायमा
हुती॥ परिषिच्याहुतीः प्रातर्हुत्वा तु परिषेचयेत्॥ द्विःसायं होमवन्मन्त्र्या त्वद्विः प्रा
तर्होमवत्स्रुच॥ उपस्थानं स[illegible]शेषं प्रकृतिवद्भवेत्॥ हविष्यान्द्विदेवत्यामि
तिसूर्याग्निदैवतं॥ समस्ये पंचभिरृग्भिः प्राजापत इत्यपि॥ कुर्यादग्नेरुपस्थानं
सर्वत्रोच्चम इत्यपि॥ अग्निं वा धजपेद्वीं यथाशक्त्याथ्ववादृशा॥ भस्माभिधारणं कु
र्याद्धृत्स्वामित्यं चैव तु॥ ललाटे हृदये बाहौ मस्तके च यथाक्रमं॥ होमकालेपि कुर्वीत ॥२३॥

के

त्रिपुंड्रं भस्म चारणं॥ मानस्तोकेति मंत्रेण केचिदाहुर्मनीषिणः॥ प्रतपेदरणी तत्र पा
णी चायुगवत्तपेत्॥ अयं ते योनिः समिधं याते अग्नेक्रव्युक्तो॥ तथा श्रौतसूत्रे॥
अयं ते योनिरित्यरणी गार्हपत्ये प्रति तपेत्पाणी वा पाते अग्ने यज्ञियेनेति॥ तथा
च स्मृतिः॥ अश्वत्थस्य समिधं वापि शमीसमिधमेव च॥ तदभावेऽथ वा चान्याः स
मिधः प्रतपेद्बुधः॥ पालाशः खादिरोश्वत्थः शम्युदुंबरजा समित्॥ अपामार्गो
र्कदूर्वाश्च कुशाश्चेत्यपरे विदुः॥ सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्तथा॥
शस्ताद्दशांगुलास्ताः स्युः द्वादशांगुलकास्तु वा॥ षण्मासं स्याच्छमीग्राह्या खादिरं
तु त्रिमासकं॥ मासत्रयं तु पालाशो ह्यश्वत्थो हरहः स्मृतः॥ दिनमेकमपामार्गो
ग्राह्यश्चार्कस्तथैव च॥ औपासनेषु भाप्रोक्ता स्त्रिदिनं स्यादुदुंबरः॥ एतेषामप्य
भावे तु कुश इत्यपरे विदुः॥ मासमेकं कुशा ग्राह्या दूर्वा स्यात्सप्तरेव तु॥ सघःशमीच
पालाशं सप्ताहमिति केचन॥ वटादयोपि ग्राह्याः स्युः केचिद्यज्ञविदो विदुः॥ [illegible]

[illegible] प्रयोगपारिजातके॥ अकाले यत्कृतं कर्म कालं प्राप्य पुनः क्रिया॥ काला
तीतं तु यत्कुर्याद्कृतं तद्विचक्षते॥ अकर्मक्रियते मोहाद्काले केनचिद्यदि॥
काले प्राप्ते पुनः कुर्यात्कृतं चापि हि कर्म तत्॥ संध्योपासनादिकमित्यर्थः॥ अथ
वैश्वदेवः॥ तत्र द्गृह्ये॥ अथ सायं प्रातः सिद्धस्य हविषस्य जुहुयाद्गिन्हो
देवताभ्य इति॥ स्मृत्यर्थसारे॥ गृहस्थो वैश्वदेवाख्यकर्म प्रारभ्य तं दिवा॥ अ
न्नस्य चात्मनश्चैव संस्कारार्थमिति षते॥ कोद्रवं चैव [illegible] कंमाषं मसूरं च कुलि
त्थकं॥ कांजपकं परान्नं च वैश्वदेवे तु वर्जयेत्॥ कारिका॥ गृहस्थो वैश्वदेवा
ख्यकर्म प्रारभते दिवा॥ तत्र नास्त्यनुवृत्तिश्च द्वागवद्धं च यथा॥ औपासनाग्नि
मन्यं वा समिध्याथ हविर्भुजं॥ पर्युक्ष्य परिषिंच्याग्निमलंकृत्य च पूर्ववत्॥
हणस्थां तु निर्वपेत्॥ पितृयज्ञो मुपदितो रक्तं चैव क्षयं स्ववेत्॥ अथ यज्ञोम
नुष्याणां कर्तव्यः सनकादिना॥ अग्नावेवाप वान्यत्र केचिदाहुर्मनीषिणः॥ तथा
च शौनकः॥ सूर्यादिदशभिर्मंत्रैर्हुत्वा तु परिषिंचयेत्॥ ततो व्याहृतिभिर्हुत्वा भुवा॥

त्वाप

ग्निं बलीन् हरेत्॥ प्रागादिशान पर्यंत मंगुल्यग्रैर्महीतले॥ बदरीफलमात्रा
न्नं घृतक्षीरादिभिर्मिश्रितं॥ सूर्यादिवास्कपर्यंतं नैरंतर्येण तान् हरेत्॥ पूर्वपश्चि
मभागे तु लकद् [illegible] स्थं बलिं हरेत्॥ चक्रमध्ये तु पंचानां प्राक्संस्थं ब्रह्मणो रूपं॥
दक्षिणे चैव विश्वेभ्यः सर्वेभ्य इति पश्चिमे॥ उत्तरे च दिवे स्यादि नक्तमित्यादिनानि
शि॥ ईच्यान्यां तु बलेश्चक्रा द्रक्षोभ्योषु बलिं हरेत्॥ [illegible] तीयभागाच्चतोग्ने
येनिनये द्भुवि॥ अपसव्यं स्वधेत्यादिमंत्रेण पितृतीर्थतः॥ नाम गोत्रैः समुच्चा
र्य बलिं दद्यात्ततो जलं॥ पितृयज्ञान्नशेषेण तथा नैरृत्यकोणके॥ पश्चाद्वाय
व्यकोणे तु शुनो बलिं हरेत्॥ स्वाहाकारश्चोपवीती पितृतीर्थेन तत्तयोः॥ द्वौ
रयामशबलौ च तौ श्वानौ देवप्रणोदितौ॥ देवहंवापितृहं वा याभ्यां दद्याद्बलिं सु
धीः॥ द्वात्रिंशन्मंत्रकैरेतैर्गृही नित्यं बलिं हरेत्॥ सनकादिमनुष्येभ्यो हंतकारे
णवै बलिं॥ अग्नौ दद्यादुपस्थानं कृत्वाप गृहदेवताः॥ ब्रह्मणे गृहमध्ये तु दत्वा
दिक्षु चतसृषु॥ सिद्धाद्भिष्यो बलिं दद्यात्समंतात्सर्वतः क्रमात्॥ देवयज्ञान्नशे

दृष्टा

षेण गृहद्वारे बलिं हरेत् ॥ भूतयज्ञान्नशेषेण वायसेभ्यो बलिं हरेत् ॥ न पश्येद्भूब
लिं वीरदत्तो गृहबलिं द्विजः ॥ स्वयं नैवोद्धरेन्नैव दुद्धरे स्त्रीर्विनश्यति ॥ चांडालप
तितेभ्यश्चापि तथ्यन्नान्नशेषतः ॥ वायसेभ्यो बलिं रात्रौ नैव दद्यान्महीतले ॥ ये
भूताः प्रचरंतीति पात्रे दद्याद्बलिं सुधीः ॥ इहैककुर्याद्विजोयं ज्ञंदिवान क्त्वनिशः ॥
वैश्वदेवं दिवा नक्तं न भवेच पृथक्पृथक् ॥ प्रातरेव हि दावसाकर्तव्यं स्मृति
शासनात् ॥ सूर्यादिभ्यो हुनेत्पूर्वमग्न्यादिभ्यस्ततः परं ॥ हुत्वा व्याहृतिभिः पश्चाद्भूत
यज्ञस्तैथेव च ॥ चक्रादृपितृयज्ञस्तथैवेति ॥ अष्टोपिनं सकृत्कार्यं सकृदेवगृ
हबलिं ॥ दद्याद्वायसादिभ्योभ्यः भूतेभ्यश्च बलिं सकृत् ॥ असंस्कृतप्रमीताश्च त्या
गेतिष्ठति ये मम ॥ ते सर्वे तृप्तिमायां तु दत्तं चैतेन वारिणा ॥ अविभक्ते वैश्वदे
वं ॥ साग्नेयो पाकपाकाश पुत्रभ्रात्रादयो यदि ॥ न पृथग्वैश्वदेवाः स्युः स्वपा
कान्निर्वपेद्यदि ॥ एकपाके निवसतां पितृदेवद्विजार्चनं ॥ एकं स्याद्विभक्ता
नां तदेव स्यात्पृथक्पृथक् ॥ तथा च कारिका ॥ कुर्वीत स्नातकश्चेत् पृथक्पा

कीभवेद्यदि ॥ अन्नाभावे पलरहः कर्तव्यं पायसादिना ॥ शाकलः ॥ स्मृत्यर्थसारे ॥ अ
विभक्तेन संस्पृष्टेकेनापि तु यत्कृतं ॥ देवयज्ञादिकं सर्वं लौकिके ग्नौ कृतं यदि ॥ सं
स्कारान्नासिनः सर्वे कुर्युर्नियतवसिद्धये ॥ संसृष्टा भ्रातरः कार्यं ब्रह्मयज्ञं पृथक्
पृथक् ॥ होममुख्येन भोक्तव्यमन्नमौपासने हुतं ॥ अन्येश्चैव न भोक्तव्यं भोक्त
व्यं लौकिके हुतं ॥ अथानग्निकवैश्वदेवः ॥ साग्निकः पितृयज्ञांते बलिकर्म समा
चरेत् ॥ अनग्निर्हुतशेषे तु बलिं काकबलिं हरेत् ॥ संग्रहे ॥ हुत्वा व्याहृतिभिश्चा
न्नं हुत्वा शाकलकादिभिः भूतेभ्यश्च बलिं दद्यादन्नमभ्यात्यनग्निवान् ॥ ग्रहस्थो गृहे
न सत्यस्य ब्रह्मसत्रं करस्य तु ॥ दद्यादन्नं वैश्वदेवे पितृभ्यः सपिता पि ● ॥ अ
नग्निकस्तु यो विप्रः स्वन्नं व्याहृतिपूर्वकं ॥ हुत्वा शाकलमंत्रैश्च शिष्टं काकबलिं
हरेत् ॥ अन्नं व्याहृतिभिर्हुत्वा हुत्वा मंत्रैश्च शाकलैः ॥ प्राजापते हविर्हुत्वा पूजये
दतिथिं स्ततः ॥ अथ सूतके त्याज्यं ॥ वैश्वदेवं तथा श्राद्धं ब्रह्मयज्ञं सूतके ॥
न कुर्यात्स्वयमन्यैश्च कारयेन्न च सर्वथा ॥ तथा च स्मृत्यर्थसारे ॥ कुर्यात्सच महाय

ज्ञात्वं नित्यशः सूतकं विना ॥ नित्यं नैमित्यकं काम्यं सूतके पि च कारयेत् ॥ नित्यमौपा
सनं नैमित्यकमुपरागे स्नानदानादिकं ॥ काम्यं आश्विने चंडिपूजनादि सर्वथा न
त्यजेत् ॥ अन्येन कारयेदित्यर्थः ॥ तथा च ॥ संध्यामिष्टिं चरुं होमं यावज्जीवं स
समाचरेत् ॥ न त्यजेत् सूतके वापि त्यजेन्नगच्छेदधो द्विजः ॥ नित्यं नैमित्यकं काम्यं
यत्स्वकर्म प्रणोदितं ॥ सूतकादि निमित्येषु हावयेन्न तु हापयेत् ॥ सूतके मृत
के चैव ग्रहणे श्राद्धभोजने ॥ प्रवासादि निमित्येषु हावयेन्न तु हापयेत् ॥ सूत
तके तु समुत्पन्ने स्मार्तकर्म कथं भवेत् ॥ पिंडयज्ञं चरुं होमं असगोत्रेन का
रयेत् ॥ पिंडयज्ञं पिंडपितृयज्ञं ॥ चरुः स्थालीपाकं ॥ होमं नित्योपासनं ॥ चा
न्येन कारयेदित्यर्थः ॥ अथ ब्रह्मयज्ञः ॥ यत्स्वाध्यायमधीते स ब्रह्मयज्ञ इति सूत्रे ॥
स्मृतिः ॥ प्रातश्चैत्संगवादूर्ध्वं तेन नित्यस्य कर्मणां ॥ अथवा वैश्वदेवांते ब्रह्मय
ज्ञविधास्मृतः ॥ इति कालत्रयं प्रोक्तं तैर्वा तरेणालव्यं ॥ आश्वलायनानां
कालमाह ॥ शौनकः ॥ आवर्तनेवगाह्यापः कुशपाणिश्च बहवः ॥ ब्रह्मयज्ञं प

छ्रा

मध्या

कुर्वीत संध्योर्ध्वं कीर्तितः ॥ स्नानं कृत्वा तु मध्याह्ने द्विजः संध्यामुपास्य तु ॥ ब्र
ह्मयज्ञं ततः कुर्यात्तर्पणं तैत्तिरीयकः ॥ अथ कारिका ॥ ग्रामात्प्राच्यामुदीच्यां
वा यात्रा दिक्स्याद्विनिंदिता ॥ अपो वगाह्य तु स्नायादुपवीत्येव सं द्विजः ॥
धौतशुभ्रांबरः कुर्यात्कर्माणि चमनं द्विजः ॥ दर्भान्बहून्शुचौ देशे प्रागग्रा
न्नूस्तृणात्यथ ॥ आश्वलायनः ॥ सव्यस्य पाणेरंगुष्ठप्रदेशिन्योस्तु मध्य
गाः ॥ दक्षिस्यांगुलिर्णयस्य च तस्मोंगुष्ठवर्जितः ॥ तथा सव्यकरांगुष्ठं दक्षि
णांगुष्ठवोर्पितं ॥ संबंधमेवं वकूर्वीत न्यैसे दक्षिण सक्थिनि ॥ कारिका ॥
दर्भेषु उपविश्यै कर्मन्यत्र प्राङ्मुख एव सन् ॥ कृत्वोपस्थं करे सव्ये उत्ताने
प्राग्दिगंगुलौ ॥ शाकलः ॥ वामं संयोजयेज्ज — दक्षिणं स्यात्समुन्नतं ॥ पा
दं वामे न्यसेत्पादं दक्षिणं स्या हुपस्थकं ॥ पवित्रे स्थापयेद्धुरूप्रागग्रे दक्षिणे
न तु ॥ नीचं प्रागंगुलं तेन संदध्याद्दक्षिणं करं ॥ ऊर्ध्वतिर्यग्गं धस्ताद्वा नेक्षेतैय

द्विचाक्षिणि॥ सम्मिल्य येन चात्मानं समाहितमना भवेत्॥ सूर्याघमं तमं पूर्वमे
भिसंस्थाय शक्तितः॥ ओं पूर्वं व्याहृतीस्तिस्रः समस्ताः सकृद्वदेत्॥ प छंस्त
र्धर्चशः सर्वां सावित्रीं त्रिर्वदेद्बुधः॥ पूर्वापि संहितं यावत्तद्धीयस्य समाहितः॥ अग्निमी
ळ इति तादीन्वेदांश्चापि स्वशक्तितः॥ नमो ब्रह्मण इत्येतान्त्रिर्जपेत्प्रणवं वदे
त्॥ प्रणवाद्येतदर्हते स्यान्मध्यमेन स्वरेण तु॥ अधिते मनसि मेग्रा ब्रह्मयज्ञं कु
रोति चेत्॥ सर्वत्रोंकारमुच्चार्य श्राद्धमंत्रेषु नोच्चरेत्॥ आर्यछंदांसि वै तद्वयज्ञे
तर्पणकर्मणि॥ शौनकः॥ आचम्य बह्वृचः कुर्याद्ब्रह्मयज्ञं च तर्पणं॥ ततो निष्पीड्य
वैवस्त्रमुपवीतिं समाचरेत्॥ समाचम्य यजुःशाखी ब्रह्मयज्ञं समाचरेत्॥
पुनराचम्य चेदेवादीन्संतर्प्य पुनराचमेत्॥ अपां समीपं गत्य तर्पयेद्य देवताः॥ मा
अन्वारभ्येन सव्येन दक्षिणेन तु पाणिना॥ एवमंतानि तर्प्याणि तु चेत्यतः प्रतिमंत्रकं॥
धातु नैवात्र परस्मैपदेन वचनेन यथा॥ सिंचेत्प्रजापतिस्तर्प्यं तिष्यपो देवतीर्थतः॥

॥
धा— स्तर्पयेत्पालिंगमंत्रांतेषु प्रयुज्यते॥ मंत्रैः सप्तर्षिचिन स्तर्पयेत्तियादिभिस्ततः परं॥
प्रतिमंत्रं निवीती तु तर्पयेद्दृषितीर्थतः॥ देवतास्तर्पयित्वा तु शालचिंप्रश्तती
नप॥ ऋषिवाद्वादशासंतर्प्य सनकादींश्च सप्त वै॥ प्राचीनावीत्यपेदानीं तर्पयेत्पितृती
र्थतः॥ सुमंतित्यादिभिर्मंत्रैः प्रतिमंत्रं च पूर्ववत्॥ क्षितियांतेषु मंत्रेषु तर्पयामिति
दंवदेत्॥ पितरं चापशर्माणं गोत्रं संतर्पयेत्क्रमात्॥ तथा चाखिल संहितायां॥
तृ तर्पयेत्पितॄन् नादौ ततः चैव तु मातरं॥ सापत्नमातरं पश्चात्पितामह्यादिका
न्क्रमात्॥ आदौ पिता ततो माता सापत्नजननी तथा॥ मातामहाः सपत्नीका॥ त
आत्मपत्नी ततः परं॥ सुतभ्रातृपितृव्याश्च मातुलाः सहभार्यकाः॥ दुहिता भगि
नी चैव दौहित्रो भागिनेयकः॥ पितृस्वसा मातृस्वसा श्वशुरो गु[illegible]र्विनः॥ ए रु
ते स्युः पितरस्तीर्थे तर्पणे च महालये॥ याज्ञवल्क्यः॥ सवर्णेभ्यो जलं देयं सवर्णे
भ्यश्च एव च॥ नाम गोत्रस्वधाकारैः प्रयत्नं तर्पयेत्सुधीः॥ एकैकमंजलिं देवा द्वौ द्वौ

१ नामगोत्रस्वधाकारैस्तर्पयेदनुपूर्वशः॥ स्मयर्पणसारे॥ वसुरुद्रादित्यरूपान्श्राद्धार्थं तर्पयेत्पितॄन्

॥२८॥ २स्मा

तुसनकादयः॥ अर्हंति पितरस्त्री स्त्रीन्दस्त्रियश्चैकैकमंजलिं॥ मातामुरव्याश्च या
स्तिस्त्र सामप्यंजलित्रयं॥ दद्यादेकैकमन्यासां स्त्रीणां चैवांजलिं बुधः॥ पितृणां चैव
देवानां जलैर्दद्याज्जलांजलिं॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलीन्॥ तिलद
र्भयुतं तोयं स्वधया तत्र दीयते॥ तत्तोयममसंभृत्वा पितॄणां दत्तमक्षयं॥ [illegible]मायस्त
र्पणं कुर्याल्लोहे कांस्ये च मन्मये॥ तर्जन्यंगुष्ठयोर्गतस्सपुत्रः पितृघातकः॥ स्थले वा
पिशुचौ देशो कुशास्तीर्णे च भाजने॥ ताम्रादिकैपर्णैर्वा [illegible]॥ तर्प
तेयनतीर्थेन गत्तोयास्तेन वै जलं॥ अन्यथा कुरुते यस्तु नरकं प्रतिपद्यते॥ अथ
तिलतर्पणं॥ स्मृत्यर्थसारे॥ विवाहे चोपनयने चौले सति यथाक्रमं॥ वर्षमर्द्धं
तदर्द्धं तु नेच्छेत्तिलतर्पणं॥ सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु च॥ ग्रहे निंद्रं
सतिलं तर्पणं सर्वदापि च॥ भृगुवारे सौम्यवारे नंदासु गुमघासु च॥ [illegible] त्रयोदश्यां
कृत्तिकाम्यां भरण्यां हस्तिकासु च॥ अयने द्वितये चैव च तत्स्त्रयुगादिषु॥ पिंडदा
नं [illegible] मृदा स्नानं न कुर्यात्तिलतर्पणं॥ पवित्रे कौशिके ताम्रे राजते हेम
तर्पयेत्सलिलैः सदा॥ पाणिनैकगुणं प्रोक्तं दर्भैः शतगुणं ततः॥ अशक्य खड्गपात्रेण पितॄणां तर्पणं वैतृ॥ ॥३८॥ ७

च पि

प

मेव च॥ धारयेद्दक्षिणे पाणौ विप्रं चोत्तरोत्तरं॥ तिलानामप्यभावे तु सुवर्णरजता
न्वितं॥ तदभावे तु कुर्वीत दर्भैर्मंत्रैश्च तर्पणं॥ इदं तु नित्यविषये॥ अथ विशेषोऽभिके
ध्यते॥ प्रेतपक्षे व्यतीपाते संक्रांतौ तिथिपर्वसु॥ निषिद्धेपि तिथौ वारे कर्तव्यं तिल
तर्पणं॥ नद्यां तीर्थविशेषेषु प्रेतकार्ये तथैव च॥ निषिद्धेपि दिने कुर्यात्पिंडदानं ति
लोदकं॥ प्रेतपक्षे च गंगायां उपरागे तथैव च॥ कृताहाहोपि कुर्वीत तर्पणं तिल
संयुतं॥ व्यतीपाते च संक्रांतौ युगमन्वादिषु॥ तर्पयित्वा पितॄन् पश्चात्तच्छ्राद्धं कु
र्यात्प्रयत्नतः॥ पक्षश्राद्धे हिरण्ये च पश्चाद्दद्यात्तिलो[illegible]दकं॥ तथा चैवाष्ट
काश्राद्धे तथा चैवानुमासिके॥ कृत्वा तु मासिकं श्राद्धं सपिंडीकरणात्परं॥ वैश्वदे
वं ततः कुर्यात्तर्पणं तिलसंयुतं॥ दर्शे तिलोदकं पूर्वं पश्चाद्दद्यान्महालये॥ आ
ह्निकेनापरं पूर्वं परेहनि तिलोदकं॥ तीर्थश्राद्धे गयाश्राद्धे प्रत्यब्दे च महालये॥ प
रेहनि द्विजः कुर्यात्तर्पणं तिलसंयुतं॥ पक्षश्राद्धे तु निवृत्ते तर्पणं स्याद्दिने दिने॥
सन्महालये दद्यात्परेहनि तिलोदकं॥ वृद्धिश्राद्धे सपिंडे च प्रेतश्राद्धे च मासिके॥

न्वं

परेहनि विमुक्तास्वेन कुर्यात्तिलतर्पणं ॥ अथ पश्चात्प्राह तर्पणं ॥ पित्रोः प्रत्याब्दिके प्राप्ते तर्पणं तु कथं भवेत् ॥ जलेनैव प्रकर्तव्यं निवृत्ते पितृकर्मणि ॥ श्राद्धं कृत्वा तु विधिवद्वैश्वदेवादिकं ततः ॥ ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तु तिलैर्विना ॥ हारीतः ॥ ततः परेह्नि कुर्वीत तर्पणं पुरुषः सुधीः ॥ तच्छेषे तिलदर्भैश्च प्रातः श्राद्धे मलेऽजले ॥ श्राद्धं कृत्वा तु पूर्वेद्युः प्रातः स्नात्वा परेहनि ॥ पितॄंश्चैवाथ संतर्प्य पश्चात्संध्यादिकाः क्रियाः ॥ तर्पणं तन्मतं प्रातर्द्वितीये प्रहरेऽपि यः ॥ तृतीये जलमित्याहुश्चतुर्थे रुधिरं भवेत् ॥ प्रयोगपारिजातके ॥ स्नात्वा तीरं समासाद्य उपविश्य कुशासने ॥ संतर्पयेत्पितॄंस्तत्र स्नात्वा वस्त्रं धारयेत् ॥ यस्तु तर्पयति प्रातः कृत्वा श्राद्धं परेहनि ॥ पितरस्तस्य तृप्तिं मा यांति न च कुर्वंति वै ध्रुवं ॥ परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् ॥ अतृप्ताः पितरस्तस्य शापं दत्वा व्रजंति ते ॥ क्षौरं श्राद्धं तर्पणं कुर्यात्सतिलं तु परेहनि ॥ पित्रोर्विषय एव स्यान्न चान्यविषये भवेत् ॥ जीवमानः पिता यस्य माता यदि विपद्यते ॥ मातुः श्राद्धं सुतः कुर्यान्न कुर्यात्तिलतर्पणं ॥ इति प्रसंगतः कथितं ॥

च ॥२१॥

अयं तु ब्रह्मयज्ञश्च तिक्षादानादिलक्षणः ॥ कुर्यात्तिष्ठच्छया नो वा ब्रह्मयज्ञसमो भवेत् ॥ द्विजो शुचिः स्वयं वा स्यात्तदानं ध्याय मुच्यते ॥ प्राग्वूर्ध्वं वा तवेद्यायं वैश्वदेवाख्यकर्मणः ॥ ऊर्ध्वं मनुष्ययज्ञस्तु स वै प्रोक्तोऽतिथिपूजनं ॥ स्वशक्त्या भोजयेद्विप्रानतिथीन्समयागतान् ॥ मनुः ॥ विद्यातपःसमिद्धेषु हुतं विप्रमुखाग्निषु ॥ निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ॥ इति श्रीनारायणकृतायां धर्मप्रवृत्तौ शौचादितर्पणांतप्रकरणं ॥ प्रथमं ॥ अथ दिनातीतकर्माण्याह ॥ नकृतानि प्रमादाच्चेत्प्रातः कर्माणि यानि च ॥ रात्रावपि च कार्याणि विना सौरं च तर्पणं ॥ दिवोदितानि तु कर्माणि प्रमादादकृतानि वै ॥ शर्वर्याः प्रथमे यामे तानि कुर्याद्यथाक्रमं ॥ अवगाहं विना सौरं ब्रह्मयज्ञं च तर्पणं ॥ केचिद्रात्रावपि ब्रह्मयज्ञमिच्छंति ॥ नामेमनस्वाध्यायमध्यीयित दिवा नक्तं वेत्यापस्तंबविषयं ॥ तथा च स्मृतिः ॥ आर्याश्चो केचिदिच्छंति रात्रावपि च तर्पणं ॥ तद्यजुःशाखिनामेव नान्ये

ता ति २

षां तु विधीयते ॥ मध्याह्ने समतिक्रांते सायंकालो भवेद्यदि ॥ सायंसंध्यामुपास्यादौ सं
ध्यामाध्यान्हिकी ततः ॥ सायंकालेऽप्यतीतश्चेदस्तं याते दिवाकरे ॥ कुर्यादावर्त्तनीसंध्यां
समारभ्य यथाक्रमं ॥ आवर्त्त नाम मध्याह्नस्तस्येयं संध्येत्यर्थः ॥ कुर्वीतावर्त्तनीसंध्यां
रात्रावपि न दूष्यति ॥ दद्यादर्घ्यं तु गायत्र्या सौरमंत्रं विवर्जयेत् ॥ मध्याह्नसंध्यात
श्चैवेत्प्रमादात्क्रियते यदि ॥ सौरस्थाने जपेत्सूक्तं सौरं वैश्वानरीयकं ॥ अथ देवता
र्चनविधिः ॥ अग्नौ चैवाप्यवा सूर्ये प्रतिमायां जलेऽपि वा ॥ पूजयेत् [illegible] भक्तिभावेन
प्रत्यहं परमेश्वरं ॥ नारायणं महादेवं आदित्यं गणनायकं ॥ शक्तिं चैवापि पंचैता
न्प्रत्यहं पूजयेद्द्विजः ॥ देवस्थानोपयेद्वीरः स्थावरे प्राङ्मुखादितु ॥ महादोऽज
गमे वापि स्थापयेत्प्रत्यगाननान् ॥ अभीष्टदेवतां मध्ये स्थापयेत्तां यथाक्रमं ॥ य
दा मध्ये भवेद्विष्णुरैशान्यां स्थापयेद्धरिं ॥ आग्नेयां पूजयेत्सूर्यं नैरृत्यां गणनायकं
वायव्यां पूजयेद्देवीमित्येतान्वै यथाक्रमं ॥ संग्रहे ॥ शंभौ मध्यगते हरीनहरभूद
[illegible] देवीनाकरे भास्येनागसुतारवौ हर गणेशाजांबिकाः स्थापिताः ॥ देव्यां विष्णुहरैकदंते

भ३

[illegible] भानौ वैदर्भजे श्वरे नार्याः शंकरभागतस्तु शुभदा व्यस्तास्तु ते हानिदाः ॥ अथागम
दिशीयं प्राचीत्युच्यते ॥ पूज्यपूजकयोर्मध्ये पूर्वमित्यभिधीयते ॥ नैशानीपूजकापे
क्षया पूज्यापेक्षया तु सोऽद्भुवेदः ॥ देवस्य मुखमालक्ष्य दिशं प्राचीं प्रकल्पयेत् ॥ तदादिप
रिवाराणामंगाद्यावरणं क्रमात् ॥ यस्मिन्विवस्वान्विषुवत्युदेति प्राचीति तां वेदवि
दो वदंति ॥ मध्ये पुनः पूजकपूज्ययोश्च सदागमज्ञाः प्रवदंति संतः ॥ मुख्ये पुष्पांजलिं
दद्याद्गणेशाद्यर्चनं भवेत् ॥ गणेशमेवमुख्यश्चेत्तत्र सूर्यक्रमाद्भवेत् ॥ गणेशार्कौ
समभ्यर्च्य शैवो वा विष्णुं प्रपूजयेत् ॥ अर्चयेदथ शिवं पश्चाच्छिवमादौ तु वैष्णवः ॥ त
तो विष्णुं ततो दुर्गामेवं ह्यादर्चनक्रिया ॥ अर्चयेद्यदि वा विप्रः शिवाचारो यथा भवे
त् ॥ हेमराजतताम्राणां सर्वेषामर्घ्यभाजनं ॥ शिवसूर्यौ परित्यज्य शंखोऽन्यत्र प्र
शस्यते ॥ आवाहनासनं पाद्यमर्घ्यमाचमनं तथा ॥ स्नानवस्त्रोपवीतानि गंध
पुष्पे च धूपकं दीपं नैवेद्यतांबूलौ प्रदक्षिणं विसर्जयेत् ॥ प्र[illegible] चं पूर्येऽजे देवं स्नाप

ज५

सु

येसौरूपेण च॥ लोगो ग्रामे स्थावरे चैव नावाहनविसर्जने॥ शालिग्रामशिलायां तु
नित्यसन्निहितो हरिः॥ स्नापयेत्तार्चयेद्देवं यदिच्छेत्सुखमात्मनः॥ चर्मणैपिक आया
से पाषाणे नोपवेशयेत्॥ स्नानवस्त्रे च नैवेद्ये द्यादाचमनीयकं॥ अंगलग्नं च
जीर्णं च वस्त्रं देवेन चार्पयेत्॥ नांगुलामर्दयेद्देवं नाधः पुष्पैः समर्चयेत्॥ कराग्रै
र्न क्षिपेत्तोयं वज्रपातसमं भवेत्॥ जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च॥
तुलस्यगस्त्याबिल्वं च न वर्ज्यं जाह्नवीजलं॥ नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणे
श्वरं॥ दूर्वाभिर्नार्चयेद्दुर्गां न केतक्या महेश्वरं॥ शालग्रामशिलामेव नाक्षतैर
र्चयेद्द्विजः॥ अर्चयेद्यदि यो मोहात्पूजा तस्य तु निःफला॥ भूमौ च येत्तिन्नपात्रे च पाषाणे
लोहकाष्ठके॥ पल्लवे करपद्मे वा नैवेद्यं च न दापयेत्॥ सौवर्णे राजिते ताम्रे कांस्य
पालाशपत्रकं॥ नैवेद्ये चा [illegible] अपत्रे च पात्रं विष्णोरतिप्रियं॥ पवित्रं विष्णुनैवेद्यं सु
रसिद्धर्षिभिः स्मृतं॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत्॥ अग्राह्यं शिवनि
र्माल्यं पत्रं पुष्पं फलं जलं॥ शालग्रामस्य संपर्कात्सर्वं याति पवित्रतां॥ योर्चयेद्धि

च्छिवं कृत्वा परानीतैश्च साधनैः॥ पूजाफलं किमेवास्य न समग्रं फलं लभेत्॥
एकं विनायके कुर्याद्द्वे सूर्ये त्रीणि शंकरे॥ चत्वारि केशवे दद्यात्सप्ताश्वत्थे प्रदक्षि
णं॥ समभ्यर्च्य पिबेद्देवान् यः पादसलिलं हरेः॥ स याति परमं स्थानं तद्विष्णोः
परमं पदं॥ विष्णुपादाभिषिक्तं यत्सात्रेणैव पिबेज्जलं॥ सर्वपापविनिर्मुक्तः स
याति परमां गतिं॥ यः पादसलिलं विष्णोः करेण पिबते यदि समुद्धो नरकं याति या
वदिंद्राश्चतुर्दश॥ अपनित्यस्नानं तत्वेदं गृहस्थस्य तं॥ यस्मिंस्तस्योद्दाति सपि
तयश इति॥ तथा च मनुः॥ स्वाध्यायेनार्चयेत्तेषां होमैर्देवान्यथाविधिं॥ पितॄ
न्श्राद्धविधानेन अन्नैर्भूतानि कर्मणा॥ कुर्यादहरहः श्राद्धमन्नाद्येनोदके
न वा॥ पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्॥ एकमप्याशयेद्विप्रं पि

त्रर्षं पांच यज्ञिके॥ नचैवं प्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजं॥ याज्ञवल्क्यः॥
नित्यश्राद्धं देवहीनं नियमादिविवर्जितं॥ दक्षिणारहितं चैव दातृभोक्तृ
व्रतोज्झितं॥ आवाहनं स्वधाकारं पिंडाग्नौकरणादिकं॥ ब्रह्मचर्यादिनिय
मान्विश्वेदेवांस्तथैव च॥ नित्यश्राद्धे त्यजेद्धाता भोज्यमन्नं प्रकल्पयेत्॥
भोक्तुं सावेतयैवं वान्नगोभ्यश्चैवनिवेदयेत्॥ नित्यश्राद्धमदैवं स्यादर्
घ्यपिंडादिवर्जितं॥ नामंत्रणं न होमं च नावाहनं च न विसर्जनं॥ श्रा
द्धादिनियमो नास्ति किंचिद्दत्वा विसर्जयेत्॥ षट्दैवयं भवेश्राद्धं कर्त
व्यं प्रत्यहं द्विजैः॥ नित्यकर्म समाप्याथ ब्राह्मणः श्रद्धयान्वितः॥ अपस
व्येन कुर्वीत नित्यश्राद्धमदैवतं॥ पितृननुद्दिश्य विप्रस्य भोक्तुमभ्यागत

र

५ त्र

स्य च॥ पादप्रक्षालनं कुर्यान्नामगोत्रं समुच्चरेत्॥ अर्चयेद्दानं सं
दत्वा नमो वः पितरस्तत॥ गंधपुष्पादिकं दत्वा द्रोजान्नं परिवेशयेत्॥
भोजने सघृतं चान्नं गायत्र्याभिमंत्रयेत्॥ इदं विष्णुर्विमंत्रेण
पितृभ्योन्नं निवेदयेत्॥ ये चेह तेत्यैयाञ्चेव पितॄणां स्मृतिमाचरेत्॥
ब्रह्मार्पणं ब्रह्म हविरित्येकं निवेदयेत्॥ बालः सुवासिनी वृद्धास्तथै
वातुरकन्यकाः॥ संभोज्यातिथिभृत्यांश्च दंपत्योः शेष भोजनं॥ चित्राहु
तिप्रदानं तु कृत्वा भोजनमाचरेत्॥ सपंक्तौ ब्राह्मणस्यापि भुंजीयात्
सह बंधुभिः॥ अथ भोजनविधिः॥ तत्र मनुः॥ सायं प्रातर्द्विजातीनामशं
नं श्रुतिनोदितं॥ नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिः॥ गोभिलः॥ ततो
भोजनवेलायां कृत्वाचारं सदात्मवान्॥ पोषवर्गसमोपेतो भोजनं का

जर

५ त्रं

॥३३॥

रयेद्बुधः॥ माता पिता गुरुर्भार्या पुत्रो दासस्तथैव च॥ अभ्यागतोतिथि
श्चाग्निः पोष्यवर्ग इति स्मृतः॥ स्मृतिसारसमुच्चये॥ प्राङ्मुखस्तु स
मश्नीयात्सीच्यां वा यथासुखं॥ उत्तरे पितृकृत्येषु दक्षिणे तु विवर्ज
येत्॥ मनुः संग्रहे॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्वी दक्षिणामुखः॥ न२
श्रीकामः पश्चिमे भुंक्ते न कदाचिदुदङ्मुखः॥ पुत्रवान्स्वगृ
हे नित्यं नाश्नीयादुत्तराङ्मुखः॥ सोमवारे तथाप्येवं गं वर्जयेत्तु
तथा बुधः॥ ॥ अथ भोजनमंडलं॥ बौधायनः॥ ॥ चतुरस्रं
त्रिकोणं च वर्तुलं चार्द्धचंद्रकं॥ कर्त्तव्यमानुपूर्वेण मंडलं ब्राह्मण

॥३३॥

दिषु॥ शंखः॥ आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहाः॥ मंडलेन तु जीवंति तस्मात्कु
या२ र्वीत मंडलं पितामह॥ यातुधाना पिशाचाश्च ह्यसुरा राक्षसास्तथा॥ घ्नंति ते ब
लिमन्नस्य मंडलेन विवर्जितं॥ अथ कांस्यपात्रं॥ एकवर्णं तु यो भुंक्ते विमले कां
स्यभाजने॥ चत्वारि तस्य वर्धंते ह्यायुः प्रज्ञा यशो बलं॥ पलाद्द्विशतिकादर्वा
गन्तु ऊर्ध्वं यथेच्छया॥ इदमेव गृहस्थानां॥ न यतिब्रह्मचारिणां॥ पंचार्द्रो भोजनं कुर्या
त्प्राङ्मुखो मौनमास्थितः॥ हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मता॥ पारणा
हे तथा [illegible] श्राद्धे वर्जयेत्कांस्य भोजनं॥ मोहाद्योयदि भुंजीत तत्सर्वं कर्म चैव निःफ
लं॥ भोजने ग्राह्यपात्राणि॥ रंभा कुटज मध्वाम्र जंबूपनस च पकः॥ पद्मोदुंब
रपालाशब्रह्मपत्रं पवित्रकं॥ अथ निषिद्धानि॥ वटार्काश्वत्थपर्णेषु कुंभीतिं
दुकपर्णयोः॥ कोविदारकदंबानां भुक्त्वा चांद्रायणं चरेत्॥ करे खर्परके चैव
शिलायां ताम्रभाजने॥ भिन्नकांस्ये च वस्त्रे च न भुंजीयात्तथायसे॥ र॥

॥३४॥

कादिपुरतः स्थाप्य दक्षिणे घृतपायसं ॥ मध्येन्नं विनिवेश्याथ भक्ष्यभोज्यौश्च वामतः ॥ परिशिष्टं च गायत्र्या घृताक्तमभिमंत्रयेत् ॥ पात्रं धृत्वा तु वामेन यावत्स्याद्भोजनं हितत् ॥ पाणिना दक्षिणेनैव पर्युक्ष्य परिषेचयेत् ॥ अंगुष्ठस्तर्जनी चैव मध्यमा च तृतीयका ॥ तिस्रो ह्येकांगुली चैव प्रशस्ताः पात्रधारणे ॥ सत्यं त्वर्तेन वै प्रातर्वारिणा परिषेचयेत् ॥ सायंकाले तथैवास्याद्दत्त्वा चो[द्] दितक्रमात् ॥ अन्नेनैव घृताक्तेनान्नमस्कोणवे भुवि ॥ तिस्र एवाहुतीर्दद्याद्भोजनादौ तु दक्षिणे ॥ सारणीये ॥ उद्धृत्य किंचिदन्नाग्रं धर्मराजाय वै बलिं ॥ दत्त्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत् ॥ स्मृतिः ॥ बदरीफलमात्रान्नं अंगुल्यग्रे भुवि क्षिपेत् ॥ यमधर्माय सिंचित्राय प्रेतेभ्यश्च ततो जलं ॥ मनुः ॥ दत्त्वा तु चित्रगुप्ता ॥३४

॥

यहस्तं प्रक्षालयेद्द्विजः ॥ अप्रक्षाल्य करौ भुंक्ते रौरवं नरकं व्रजेत् ॥ चित्राहुतिरनुद्धृत्य भुंक्ते यो ग्रासपंचकं ॥ प्रपंस केवलं भुंक्ते ज्ञानतोऽज्ञानतोपि वा ॥ चंद्रिकायां ॥ भोजनादौ बलिर्मुक्तः समुद्धृत्य हि भोजनं ॥ अनुद्धृत्य तु यो भुंक्ते प्राणायामाष्टकं चरेत् ॥ उत्क्रान्ततोपस्तरणमसि स्वाहा तमुच्चरेत् ॥ आपोशानमिति प्राहु भोजनादौ पिबेज्जलं अपोशानमकृत्वा तु यो भुंक्ते द्विजसत्तमः ॥ आ भोज्यं तद्भवेदन्नं भुक्त्वा चांद्रायणं चरेत् ॥ अपोशानं करे कृत्वा पात्रे कृत्वा तिलोदकं ॥ श्वानमूत्रसमं तोयं पुनः पुरयतेय [illegible] दि ॥ आपोशानार्थं यत्तोयं धृतं चेन्निस्स्वतं यदि ॥ हस्तं प्रक्षाल्य तोयेन पुनरन्यं धारयेज्जलं ॥ अपोशानकरो विप्रो यद्यात्री वचनं पठेत् ॥ अभोज्यं तद्भवेदन्नं दाता भवति किल्बिषी ॥ यजमानकृतं पापमन्नमाश्रित्य

तिष्ठति॥ अन्नं न प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि॥ अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महे
श्वरः॥ एवं ध्यात्वा द्विजो भुंक्ते अन्नदोषैर्न लिप्यते॥ प्राणाहुतिरघृत्वा तु यश्चान्नं
परिमर्दयेत्॥ मर्दितं भोजयेद्यस्तु भुक्त्वा चान्द्रायणं चरेत्॥ घृतहीनं तु यो भुंक्ते
नरस्त्वाहुतिपंचकं॥ पश्चाद्घृतेन यो भुंक्ते द्विजश्चान्द्रायणं चरेत्॥ अभ्यज्य सर्पिषै
केकां प्राणानामेव चाहुतिं॥ संगृह्य विधिनानामंत्रेहुनेत्प्राणाहुतिं द्विजः॥ प्राणाहु
तिनिर्णयः स्मृतिसारसमुच्चये॥ तर्जनीमध्यमांगुष्ठैः प्राणस्यैवाहुतिर्भवेत्॥
मध्यमानामिकांगुष्ठैरपाने चाहुतिं क्षिपेत्॥ कनिष्ठानामिकांगुष्ठैर्व्यानाय
जुहुयाद्बुधः॥ कनिष्ठतर्जन्यंगुष्ठैरुदानाय हुनेद्बुधः॥ सर्वांगुलिभिरादाय स
मानस्याहुतिर्भवेत्॥ अनेन विधाना विप्रो वाग्यतो भोजनं चरेत्॥ जीवत्पितृ
कस्य भोजने मौननिषेधः॥ स्मृतिचंद्रिकायां॥ कनीयान्सपिता चैव भुक्त्वा
श्राद्धिकभोजनं॥ प्राणाग्निहोत्रादन्यत्र न समौनं समाचरेत्॥ यदि भुंजीत

वेदच्छंदीर्सर्वत्रैवैतु भोजने॥ स पापी पितरं हंति भ्रातरं संततिं ध्रुवं भोजनं श्राद्धिकं भुक्त्वा
कनीयान्सपिता पि च॥ मौनं जनमात्रस्य धारणं परिवर्जयेत्॥ वाग्यतो भोजनं कुर्याद्ब्र
ह्मचारी स देवहि॥ कनीयान्सपिता वा स्यान्न स पापेन लिप्यते॥ पंचप्राणाहुतिं हु
त्वा ब्रह्मग्रंथिं विमुत्सृजेत्॥ प्रक्षाल्य वामहस्तं तु पश्चाद्भोजनमाचरेत्॥ तर्जन्यांगु
ष्ठतो पं ब्रह्मग्रंथिश्च मध्यमे इति॥ कनिष्ठिकायां स्थितेन खड्गेनैव भोजनं माचरेत्॥
हुत्वा प्राणाहुतीरन्नं किंचिद्देस्थापयेत्पृथक्॥ यद्यद्दाई पितं त्वाद्यात्स्थितं मं
तु भोजयेत्॥ अनिघायपदे वर्थकं चान्नं गायत्र्याद्यभिमंत्रितं॥ पुनरन्नं न गृ
ह्णीयाद्यदि भुंजीत किल्बिषं॥ मनुः॥ मधुपर्के च सोमे च हव्येषु प्राणाहुतीषु च॥
आस्यहोमेषु सर्वेषु नोच्छिष्टं मनुरब्रवीत्॥ दक्षिणं तु परित्यज्य वामेनैव नीरं नि
धापयेत्॥ अपोऽज्यं तद्भवेदन्नं पानीयं च सुरासमं॥ जलपात्रं तु निक्षिप

मणिबंधेचदक्षिणे॥ भुक्तकालेतु विप्रोवै पिबेदन्यत्र पाणिना॥ एकपंक्त्युपविष्टानां
विप्राणांसह भोजने॥ यद्येकोपि त्यजेत्पात्रं शेषमन्नं न भोजयेत्॥ भुंजानेषुच
विप्रेषु योग्रेपात्रं विमुंचति॥ समूढोनरकंयाति ब्रह्महासतु जायते॥ अग्निना
भस्मनाचैवदर्भेणसलिलेनवा॥ अंतरेद्वारदेशेनतु पंक्तिदोषोनविद्यते
॥ एकपंक्त्युपविष्टानामन्योन्यंस्पर्शतेयदि॥ भुक्त्वातदन्नमसाज्यंगाय
त्र्यष्टशतंजपेत्॥ स्मृतिः॥ भवेदुच्छिष्टसंस्पर्शो भोक्तुर्वा भाजनस्यवा॥
अन्नंदैत्तेवभोक्तव्यं नत्याज्यंभोजनेस्थितं॥ पुनरन्नं नभोक्तव्यं यदिभुं
जीतकिल्बिषी॥ तत्रैवजपेद्देवीं शतमष्टोत्तराधिकं॥ शेषमुद्धृत्य
भोक्तव्यं श्रूयतामत्रकारणं॥ त्यक्तोदद्यादन्नशेषं स्थितौदुर्गतिसंक्षये॥ भु
क्त्वापीत्वातुयत्पात्रं रिक्तं त्यजतियोनरः॥ सनरः क्षुत्पिपासार्तो भवेज्जन्म

तृत

निजन्मनि॥ यत्रक्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनां॥ दुर्गतौ तांमयादत्तम
क्षय्यमुपतिष्ठतु॥ रौरवे पुण्यनिलयेपद्मार्बुदनिवासिनां॥ अर्थिनां
मुदकंदत्तंमेक्षय्यमुपतिष्ठतु॥ अहं पिबतिगांडुषमहं त्यजतिवै
भुवि॥ प्रीणंतिपितरस्तस्य येचान्येभुविदेवताः॥ यँउच्छिष्टेदनाचां
तोभुक्त्वानासनाद्द्विजः॥ सचस्नानंप्रकुर्वीतनान्यथाप्रयतोभवे
त्॥ अंगिराः॥ उच्छिष्टोच्छिष्टसंस्पृष्टः शुनाशूद्रेणवाद्विजः॥ उपोष्य
रजनीमेकांपंचगव्येनशुध्यति॥ स्नानेनशूद्रमुच्छिष्टं स्पृष्ट्वोच्छि
ष्टस्तुयः स्पृशेत्॥ स्नानंविधीयतेनस्यपात्राणांचालनं विना॥
हस्तौ प्रक्षालयेत्द्विजः॥ इति देवंच स्मृतिः॥ गंडूषकरणात्पूर्वं हस्तं प्रक्षालयेत्द्विजः॥ इतिदेवं च
पित्र्यंचप्रायसानंचोपपातके॥ गौतमः॥

॥३८॥

यौवैश्वदेवसमये तर्जन्या [illegible] वत्कं चालनं ॥ कुर्वीत यदि मूढात्मा रौरवं नरकं व्रजेत् ॥ आ
चांतोप्यशुचिस्ताव यावत्पात्रं न चोद्धरेत् ॥ उद्धृतेप्यशुचिस्ताव यावद्भूर्नोपमा
र्जिता ॥ रात्रौ भोजनकाले तु यदि दीपो विनीश्यति ॥ पात्रं धृत्वा तु पाणिभ्यां भास्क
रं मनसा स्मरेत् ॥ पुनर्दीपो यदा दृष्टः शेषमन्नं च भोजयेत् ॥ पुनरन्नं चैव न भोक्तव्यं
यदि भुंजीत किल्बिषी ॥ परपाकनिवृत्तस्य परपाकरतः स्मृतः ॥ तयोरन्नं न भो
क्तव्यं भुक्त्वा चांद्रायणं चरेत् ॥ परपाकनिवृत्तस्य वर्षं वर्षार्द्धमेव च ॥ यान्वये घ्रे
त्रियस्यान्नं तदभावे जलं पिबेत् ॥ श्रोत्रियाचार शिष्यर्त्विकूज्ञाति श्वसुर मातु
लाः ॥ एषामन्नं न दूष्येत उपाध्यायस्य चैव हि ॥ अथ निषिद्धान्नं ॥ ब्रह्मौदने
लथा स चौले सीमंत प्रथमां रौवे ॥ मासिके च तथा रुद्रे नैव भोजनमाचरेत् ॥ ग
णान्नं गणिकान्नं च सूतकान्नं तथैव च ॥ यत्यन्नं चैव शूद्राणां नास्त्रीया द्विजसत्त
मः ॥ नग्नश्राद्धं नवश्राद्धं सपिंडी प्रेतकर्मसु ॥ प्रायश्चि ॥३८॥

५२

त्तेन भुंजीत भुक्त्वा चांद्रायणं चरेत् ॥ [illegible] ॥ सप्तम्यां रविवारे च दिवा रा
त्रौ तथैव च ॥ धात्रीफलं न राशौ या दलक्ष्मीको भवेद् ध्रुवं ॥ कूष्मांडं तरु
णीं चैव मूलकं बृहतीं तथा ॥ श्रीफलं मातुलिंगं च धात्रिं त्रिप्रतीर्पदादिषु ॥
शिरः कपालमंत्राणि नखचर्म तिलास्तथा ॥ यदि छेद ऊर्ध्वगामि त्वमष्ट
म्यादिषु वर्जयेत् ॥ वर्जयेत् तं ताकं मालाबु वर्तुलं तथा ॥ छत्राकं लशुनं चैव
गृञ्जनं मसुरं तथा ॥ वृंताकं कच्छ कालिंगं बिल्वोदुंबर भिः सदाः ॥ एतानि सेवते य
स्तु तस्य दूरगतो हरिः ॥ यत्यन्नं तु यदा भुंक्ते पात्रगोप्ररितं तथा ॥ पर्वतास्त्रिज्जपेन्मं
त्र शतवारं न कल्मषं ॥ समानमुत्पमंत्रं च सहस्रं तु भवेद्या तदि ॥ भुंक्ते प्रमादा
च्छूद्रान्नं तदा दोषात्प्रमुच्यते ॥ अन्नं भुंक्ते यदा यस्तु सुवर्णस्तेयमेव हि प्रमादात्
ज्ञानतो भुंक्ते गणान्नं तु यदा तदा ॥ असावसुं जपेन्मंत्रं सहस्रं नैव कल्मषं ॥
यज्ञेय स्त्रीवायस्तं संस्तु त्वं जपेद्वा त्र्याजनेपिवा ॥ गणिकान्नं यदा भुंक्ते तदा पा

॥३८॥

पात्रमुच्यते॥ अन्नं भुंक्ते यदा यस्तु सुवर्णस्तेयमंदिरे॥ इन्द्रानुपूर्वणं सूक्तं सहस्रं
वै जपेज्जले॥ स्तोत्रमिन्द्रो जपेन्मंत्रं त्वात वारं जले पिवा॥ कुष्ठान्नं चापि यो भुंक्ते
विमुच्येत सकल्मषात्॥ ब्रह्मघ्नस्य गृहे भुंक्ते किल्बिषान्मुच्यते तदा॥ एतद्वा
प्रजपेत्सूक्तं सहस्रं तु जलेषु वा॥ यएनं प्रजपेत्सूक्तं सहस्रं विष्णुमंदिरे॥ पाप
त्प्रमुच्यते सत्यं भुंक्ते ऽगृहे सुरापिनः॥ भुक्ते तु प्रजल्पिषं नत्रातं जपेत्॥ ए
कस्यैव न भोक्तव्यमन्नं तु प्रत्यहं द्विजैः॥ अज्ञानाद्यस्तु भुंजीत तस्य नैवास्ति
निष्कृतिः॥ अथ वमनविधिः॥ उत्तराचमनात्पूर्वं वमनं यदि जायते॥ स्ना
नं तत्र न कर्त्तव्यं गंडूषैः शुद्धिरुच्यते॥ उत्तराचमनं पीत्वा कुरुते वमनं यदि
॥ तत्र स्नानेन शुद्धिः स्यादिति प्राहुर्मनीषिणः॥ सर्वत्र वमने स्नायात्तथा
शोकाश्रुपातने॥ अस्नात्वा भुक्त्वा द्र्पाणिश्च वेदांतो न स्नानमाचरेत्॥ अथ

॥३८॥

तांबूलस्य चर्वणं कुर्याद्धुत्कारांत्रौंच सर्वदा॥ अभ्यंगे चैव मांगल्ये दिवा वाप्यथवा
निशि॥ प्रातःकाले फलाधिक्यं चूर्णाधिक्यं तु मध्यतः॥ पर्णाधिक्यं भवेद्रात्रौ
लक्ष्मीवान्स नरो भवेत्॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्णपर्णं ह
रेदायुः शिराबुद्धिविनाशयेत्॥ मूलमग्रं परित्यज्य शिरां चैव परित्यजेत्॥
सचूर्णं खादयेत्पर्णं आयुः श्रीकीर्तिवान्भवेत्॥ अविधाय मुखे पर्णं पूगं स्वा
६ते दयेन्नरः॥ सप्तजन्म दरिद्री स्यादंते न स्मरते हरिं॥ पंचसप्ताष्टपर्णानि दद्या
द्द्वादश वापि च॥ दद्यात्स्वयं च गृह्णीयाद्दितिके श्रीदुर्दरिते॥ तर्जन्या चू
र्णमादाय ताम्बूलं न तु खादयेत्॥ यदि खादयेन्मोहान्नरकं प्रतिपद्यते॥ मध्य
मांगुलिमादाय चूर्णं पर्णस्थले पयेत्॥ अंगुष्ठाग्रेण नो वा चैव विप्राणामेष
निर्णयः॥ स्नाने शौचे तथा श्राद्धे माता पित्रोर्मृतेहनि॥ उपवासे च तांबूलं
दिवारात्रौ विवर्जयेत्॥ पक्षश्राद्धे तथा द्वे युगमन्वंते

श्राद्धंनिर्दत्यभुक्त्वातुतांबूलंखादयेद्द्विजः॥ मोहाद्भुक्त्वाश्राद्धंतांबूलंयदिखादयेन्नु
श्राद्धहंताभवेत्कर्त्तारौरवंनरकंव्रजेत्॥ अथसायंकर्मविधिः॥ रवेरस्तमयात्पूर्वंघ
टिकैकाप्यदाभवेत्॥ सायंसंध्यामुपास्याथकुर्याद्धोमंचपूर्ववत्॥ ॥अथदीपवि
धिः॥ रवेरस्तंसमारभ्ययावत्सूर्योदयोभवेत्॥ यस्यतिष्ठेद्गृहेदीपस्तस्यनास्तिदरि
द्रता॥ आयुर्दःप्राङ्मुखोदीपोधनदःस्यादुदङ्मुखः॥ प्रत्यङ्मुखोदुःखदोसौहानि
दोदक्षिणामुखः॥ स्थापितायदिचैवस्याद्दिक्षुदीपाश्चनुसखु॥ शुभदास्तेसदास
र्वेनदोषास्तत्रकश्चन॥ इतिधर्मप्रवृत्तौनित्यकर्मसमाप्त॥ अथशयनविधिः॥
स्वगेहेप्राक्शिरःकुर्याच्छ्वशुरेदक्षिणामुखः॥ प्रत्यङ्मुखप्रवासेचनकदाचि
दुदङ्मुखः॥ तृणेदेवालयेचैवपाषाणेचैवपल्लवे॥ अंगणद्वारदेशेचमध्यभागे
गृहस्यच॥ रिक्तभूमौतथालोष्टपार्श्वेचोच्छिष्टसन्निधौ॥ शून्यालयेश्मशाने

चवृक्षमूलेचतुष्पथे॥ मातावाभगिनीवापितथाचान्यस्त्रियोपिवा॥ एतेषांसन्नि
धौचैवनस्वपेद्ब्राह्मणःक्वचित्॥ चंदनेनानुलिप्यांगंधृत्वापुष्पाणिदंपती॥ तांबू
लंचर्वणंकृत्वासदीपेमैथुनंचरेत्॥ दीपनष्टेतुयःसंगंकरोतिमनुजोयदि॥ यावे
ज्जन्मदरिद्रत्वंलभतेनात्रसंशयः॥ पादेलग्नंतनुस्त्रीवस्त्रंछिष्टंताडनंतथा॥ जे
ष्ठैंगपंचनिर्भर्त्स्यंसंयोगेननदोषभाक्॥ अ[illegible]दोषोविरच्यते॥ ऋतु
मत्यांभार्यायांतत्रसंगादिकंचरेत्॥ अनृतुमत्यांभार्यायांनसंगंभृतिकेचन॥
गर्भाधानांगभूतंयत्कर्मकुर्याद्दिवैवहि॥ रात्रौकुर्याद्विधानेनगर्भबीजस्यरोप
णं॥ मूत्रादिकंततःकृत्वायोनिंप्रक्षालयेज्जलैः॥ पूर्वरात्रेव्यतीतेतुसंगच्छेद्र
तिमंदिरं॥ पादौप्रक्षाल्यवैपूर्वंपश्चाच्छय्यांसमाचरेत्मृदुशय्यास्थितःशे
षोरिक्तशय्यांपरित्यजेत्॥ उपानहौवेणुदंडमंबुपात्रंतथैवच॥ तांबूलादिनिसर्वाणि

समीपस्थापयेद्गृही॥ कुंकुमं चांजनं चैव तथा हारीतसिंदूरं॥ धौतवस्त्रं च तांबूलं संयोगेनु भावहं॥ भर्तुः पादौ नमस्कृत्य पश्चाच्छय्यां समाविशेत्॥ सा नारी सुखमाप्नोति न भवेद्दुःखभागिनी॥ स्वपेत्स्त्री प्राक्शिरः कृत्वा प्रत्यक्पादौ प्रसारयेत्॥ तांबूलं चर्वणं कुर्यात्सिकामो भार्यया सह॥ तांबूलेन मुखं पूर्णं कुंकुमादिसमान्वितं॥ प्रीतमाल्हादसंयुक्तं कृत्वा योगं समाचरेत्॥ विना तांबूलवदनां न ग्राम्याक्रांतरोदनां॥ दुर्मुखां च सुधायुक्तो संयोगं च परित्यजेत्॥ भुक्त्वा वानुपार्श्वे स्थित्वा शय्यामभिससन्मुखः॥ संस्मृत्य परमात्मानं पत्न्या जंघे प्रसारयेत्॥ आलोमत्रं च सुदृढां मनाकुसुममनोहरां॥ योनिं स्पृष्ट्वा जपेत्सूक्तं विष्णुर्योनिं प्रजायते॥ योनिं पत्न्या पेचनमन्मंत्रं वसुनीतेपुनस्त्विति॥ मा दृष्टास्तु भवेत्पुत्र इति मत्वा स्मरेद्धरिं॥ ओष्ठाविवर्जयेद्दृगमन्यान्यमवलोकयेत्॥ स्तनौ धृत्वा तु पाणिभ्यां अन्योन्यं चुंबयेन्मुखं॥ बलं देहीति मंत्रेण योन्यां लिंगं प्रवेशयेत्॥ योनेस्तु किंचिदधिको भवेल्लिंगो बलान्वितः॥ मनुः॥ संतुष्टो भार्यया भर्त्ता भर्त्रा भार्या तथैव च॥ यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवं॥ संभोगे चैव भार्यायाः सुदृढस्थिरवीर्यवान्॥ स्कंधौ बाधक

दिध्यासायथेच्छं मैथुनं चरेत्॥ इच्छापूर्तिर्भवेद्यावद्द्वयोः कामयुक्तयोः॥ रेतः सिंचेत्ततो योन्यां तस्मात्गर्भं बिभर्त्ति सा॥ ऋतुकालोपगामी तु प्राप्नोति परमां गतिं॥ सत्कुलः प्रभवेत्पुत्रः पितृणां स्वर्गदो भवेत्॥ ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति॥ घोरायां भ्रूणहत्यायां पितृभिः सह मज्जति॥ ऋतुस्नाता तु या नारी पतिं नैवोपविंदति॥ शुनी वृकी सृगाली स्यात्सूकरी च पुनः पुनः॥ कामयज्ञमिति प्राहुर्गृहीणामेव सर्वदा॥ अनेन लभते पुत्रं संसारार्णवतारकं॥ तावुभौ बस्त्रुनी स्यातां दंपती मैथुनं गतौ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥ अतो तु गर्भशंकित्वा स्नानं मैथुनिनः स्मृतं॥ अन्ते तौ तु यदा गच्छेत् चं मूत्रपुरीषवत्॥ ॥इति गर्भाधानं॥ प्रसंगात्कथितं॥

न

॥पुंसवनाद्याः क्रिया अभिकथ्यते॥ तत्रेदं गृह्यं॥ उपनिषदि तृतीये गर्भलंभन पुंसव
नं अनवलोभनं च यदि नादियात् तृतीये गर्भमास इति॥ तथा च कारिका॥ तृती
ये गर्भसंस्कारमासे पुंसवनं भवेत्॥ अथ गर्भोनि विज्ञातस्तृतीये मासि
वै यदि॥ चतुर्थे गर्भमासे सीमंतोन्नयनं षष्ठेष्टमे वेति सूत्रं॥ कारिका॥
चतुर्थे गर्भमासे तु सीमंतोन्नयनं भवेत्॥ पूर्वस्यासंभवे षष्ठे मासे यद्वा
ष्टमे भवेत्॥ तथा च स्मृतिः॥ आधानादष्टमे मासि सीमंतोन्नयनं भ
वेत्॥ नवमे मासि वै कुर्याद्यावद्गर्भविमोचनं॥ प्रयोगपारिजातके॥ सी
मंतोन्नयनस्योक्तं तिथिवासरराशिषु॥ पुंसवनं कारयेद्विद्वान् स
हैवैकदिनेथवा॥ अन्नप्राशनांताः सर्वा गर्भाधानादिकाः क्रियाः॥

उक्तकाले भवंत्येता दोषो नाषाढपुष्ययोः॥ मासप्रयुक्तकौर्येषु मूढत्वं गुरुशुक्र
योः॥ न दोषकृत्तदा मासो लक्षणो बलवानिति॥ सर्वस्मिन् दिवसे पत्नीहवि
ष्ये काशना भवेत्॥ वृद्धिश्राद्धं पतिः कुर्याद्ब्रह्मचारी भवेत्तदा॥ तथा
च स्मर्यते॥ पुंसवनं च सीमंते यथा चौलोपनायने॥ गोदाने स्नाने
तु द्वाहे नांदिश्राद्धं पुरो दिने॥ अथ गर्भिणीधर्माः॥ भू म्यां चैवो च्च
नीचायामारोहणावरोहणे॥ नदीप्रतरणं चैव शकटारोहणं तथा॥ उग्रौ
षधं तथा क्षौरं मैथुनं भावहवनं॥ कृते पुंसवने चैव गर्भिणी प
रिवर्जयेत्॥ अथ गर्भिणीपतिधर्माः॥ पुंसो भार्या गर्भिणी यस्य
वासौ सूनोश्चौलं क्षौरकर्मान्नश्च॥ गेहारंभं स्तंभसंस्थापनं च

॥४२॥

वार्द्धिस्नानं दूरयात्रां न कुर्यात्॥ वाहनं दहनं चैव वपनं सिंधुदर्शनं॥ पर्वतारोहणं चैव न कुर्याद्गर्भिणी
पतिः॥ मासात्तु पंचमादूर्ध्वं निंदिता बहुदोषकृत्॥ पंचमासात्परं त्वन्याः कुर्वंति मृत्युमेव हि॥ दक्षः॥
क्षौरं तु दूरयेव्यतीपते तु न कुर्यान्मौंजिबंधनं॥ आत्माधानं गयाश्राद्धं वपनं तु विवर्जयेत्॥ गर्भिण्यां मौल
मो नः पत्न्यां वपनं परिवर्जयेत् कारयेद्यदि यो मोहात् स चैव भ्रूणहा भवेत्॥ गर्भिण्यामपि भार्यायां सूनोश्चौलं
न कारयेत्॥ भिन्नभार्यासुतस्येह न दोषश्चौलकर्मणि॥ यस्यान्या गर्भिणी भार्या पंचमासात्परी पिता॥
तस्य तं पंचमादूर्ध्वमधो मासाच्छुभप्रदं॥ सूनोर्माता [illegible] गर्भिण्यां चूडाकर्म च [illegible] न ५
तस्यवै ऊर्ध्वं पंचमान्मासान्न कुर्यान्मौंजिबंधनं॥ अष्टमासरतश्चैव न कुर्याद्श्राद्धभो
भोजनं॥ श्मश्रुकर्म तथाचैव केचिदाहुर्मनीषिणः॥ अथ जातकर्म॥ कुमारं जा
तं पुरान्यैरालंभादिति॥ यातयाच॥ जाते सुते पिता कुर्यान्नांदीश्राद्धं वि
धानतः॥ जातकर्म ततः कुर्यादन्यैरालं॥ ७ राम॥ ... ॥४२॥
तु

भनालुरा॥ जातः पुत्रस्तया द्येति श्रुत्वा तस्मै प्रदापयेत्। परितोषकमित्सर्थं भूषणाच्छादनादिकं॥
देवाश्चपि तरश्चैव पुत्रे जाते द्विजन्मनां। आयांति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा। जाते सुते वगा
ह्याथः श्राद्धं कृत्वा विधानतः। जातकर्मविधानेन कुर्याद्दानादिकं ततः। तत्र दद्यात्सुवर्णं च भूमिं
गो तुरगान् गजान्। छत्रं छागं च माल्यं च शयनं वासनं गृहं। यावन्न छिद्यते नालं तावद्द्या
त्स्वशक्तितः। आशौचे पि प्रकर्त्तव्यं ग्रहणेपि यथाविधि। आशौचे ऽतिपूर्वे शौचे जात
के मृतके वासत्यपि जातकर्म प्रकर्त्तव्यमेवेत्यर्थः। ऋणत्रयनिवृत्त्यर्थं दद्याज्जा
ते सुते पि वा। ब्रह्मसूत्रं घृतेनालं तेनावेष्ट्य निकृंतयेत्। स्वघृतेन ब्रह्मसूत्रेण ना
लमावेष्ट्य छिद्यादित्यर्थः॥ जातसूतके व्यता। निबंधसारे। जातादिपंचमे ष
ष्ठे निशीथे बलिमाहरेत्। अर्चयेदष्टदिक्पालान् गीतवाद्यस्वरास्त्रकैः॥
कृत्वा जागरणं दीपैः सूक्तैः श्वशांतिपाठकैः। द्वारे द्वितीयभागे तु पूतलैश्वा

॥४३॥

पिकज्जलैः॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतके पु
त्रजन्मनि। दद्यात्तु प्रथमे दानं षष्ठे वा पंचमेपि वा। दशमे बलिदानं स्यादन्नदानं तथै
व च। अथ नामकरणं। तत्र कारिका। द्वादश्यां नामकरणं नांदीश्राद्धे कृते भवेत्। पुंसां
युग्माक्षराणि स्युर्विपरीतानि योषितां। ग्रंथांतरे कानिचिद्वचनानि लिख्यंते।
मनुः॥ नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत्॥ पुण्ये नक्षत्रदिवसे मु
हूर्ते वा गुणान्विते। वसिष्ठः। द्वादशे षोडशे विंशे द्वात्रिंशद्दिवसे पि वा। नाम
कर्म द्विजातीनां कर्तव्यं श्रुतिनोदितं। द्वात्रिंशद्दिवसादूर्ध्वं यावत्संवत्सरं भ
वेत्। नामकर्म द्विजैः कार्यमिति केश्चिदुदीरितं। आवत्सरं नैत दोषो मूढयोर्गुरु
शुक्रयोः॥ मलमासेपि तत्कुर्यादुक्तकाले न दोषभाक्। अथ पत्नीकुमारोपवेशनं कथ्यते प्र
योगपारिजातके। संस्कार्यः पुरुषो वापि स्त्री वा दक्षिणतो भवेत्॥ संस्कारकस्तु सर्वत्र
तिष्ठेदुत्तरतः सदा॥ तथा च स्मृत्यंतरे। जातके नामके चैव ह्यन्नप्राशनकर्मणि। निःक

॥४३

मणे च चौले च पत्नीपुत्रस्तु दक्षिणे। गर्भाधाने पुंसवने सीमंतोन्नयने तथा॥ वधूप्रवेशने चै
व पुनःसंधान एव च। पूजने मधुपर्के च कन्यादाने तथैव च। कर्मस्वेतेषु वै भार्या दक्षिणे तूप
वेशयेत्। कन्यापुत्रविवाहे च गोदाने व्रतबंधने। आशीर्वादेभिषेके च पत्नी तूत्तरतो भवेत्।
वापीकूपतडागादि [illegible] महोत्सवे। व्रतादौ शांतिके चैव पत्नी स्यादुत्तरे सदा। शांति
के पुंचे सर्वेषु प्रतिष्ठोद्यापनादिषु। वामे तूपविशेत्पत्नी व्याघ्रस्य वचनं यथा। अथ निष्क्र
मणं। चतुर्थे मासि निष्क्रमणं पूर्वपक्षापरपक्षाविति चाशुभे नक्षत्र इति सूत्रं। कारिका।
चतुर्थे मासि पुण्यर्क्षे शुभे कुर्यान्निष्क्रमणं भवेत्। स्नातं स्वलंकृतं चाभिहितं स्वस्त्ययनं शुभं।
तथा ज्योतिः। ग्रहान्निष्क्रमणं सूनोश्चतुर्थे मासि कारयेत्। यैत्रोत्सवमयो मासि तृती
ये प्रथमेपि वा। अथ पंचमे मासि कर्तव्यता। पंचमासि प्रकर्तव्यमाशौचैवोपवेशनं
संपूज्य स्वकरं भूमिं कुमारं चोपवेशयेत्। व्रीहिरूप्यामांक्षे गोधूमा माषमुद्गतिला यवाः
एषामुपरि राशीनां नव वस्त्रं प्रसार्य च। अथान्नप्राशनं। षष्ठमास्यन्नप्राशनमिति सू
त्रं। कारिका। अथ पुण्ये तु षष्ठे तु मासेन्नप्राशनं भवेत्। कृत्वाभ्युदयिकं श्राद्धं दधिमध्वाज्य

नि° १

॥४४॥

संयुतं। तथा च स्मृतिः॥ षष्ठाष्टदशमे मासि द्वादशे वान्नमाचरेत्। अयुग्मे मासि वै स्त्रीणामिति कैश्चिदुदीरितं। अथ चौले। तृतीये वर्षे चौलं यथाकुलधर्मं वेति सूत्रं। कारिका। तृतीये वत्सरे चौलं कुर्वीतास्योत्तरायणे। शुक्लपक्षे शुभर्क्षे तु हुत्वाभ्युदयिकं ततः। यथान्वयं तु केशांश्छिंद्युपनीत्या सहेष्यते॥ स्वस्त्याादि वाचयेत् पूर्वं द्विपत्रैर्षु कर्मसु। मनुः। चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिनोदनात्। तृतीये प्रथमे वाब्दे पंचमे सप्तमेपि वा। चौलकर्म द्विजः कुर्यात् कुलधर्मानुसारतः॥ अथ चौलव्रते निर्णयः। मदनपारिजाते। त्रिरात्रमशुचित्वात्तु त्रिभिर्भक्षेन्नग्नस्नात्वा च भुक्त्वा च वृषभारोहणं तथा। त्रिरात्रमशुचित्वात्तु भक्ष्ये व्यपोहति॥ भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते। अस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते। अनुपेतस्तु यो विप्रो मद्यं मोहात्पिबे

॥४४॥

द्यदि। तस्य हृच्छ त्रयं पित्रा भ्रात्रा वाप्यथवा तथा। अथ चूडाकरणे निषेधः। चूडाकर्म शिशोर्माता गर्भिणी यदि वा भवेत्। गर्भस्य वा विपत्तिः स्यात् पयो वा शिशोरपि। शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्। गते तु पंचमे वर्षे गर्भिण्यामपि कारयेत्। यस्य मातरि गर्भिण्यां सूनोः क्षौरं न कारयेत्। पंचाब्दात्प्रागतोर्ध्वं तु गर्भिण्यामपि कारयेत्। गर्गः। शिशोर्मातरि गर्भिण्यां न चौलं चोपनायनं। पंचमात्प्राङ्निषेधोयं वर्षादूर्ध्वं न दुष्यति। अथ कुमारलक्षणं। शिशुस्तत्र प्राक्प्राशनात्प्रागाचौलं बालकः स्मृतः। कुमारस्तु विज्ञेयो चौलादामौंजिबंधनं। शिरोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं। रजस्वलादिसंस्पर्शे स्नानाच्छुद्धिः कुमारकः। अथ कर्मलोपे प्रायश्चित्तं। आरभ्याधानमाचौलात् कालेतीते तु कर्मणां। अव्यसंव्याहृतिभिर्हुत्वा प्रायश्चित्तं समाचरेत्। एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत्। चौलकर्मण्यतिक्रांते पादकृच्छ्रद्वयं चरेत्। अथाक्षरस्वीकारविधिः

॥४॥

॥४५॥

रव्यते॥ द्वितीयजन्मतः पूर्वमक्षराभ्यासमाचरेत्। मौंजीबंधनतः पश्चाद्वेदारंभो विधीयते। पंच
मे सप्तमे वाब्दे पूर्वं स्यान्मौंजिबंधनात्। तत्रचैवाक्षराभ्यासः कर्तव्यस्तदगायने। बृहस्पतिमते
चैवतदभावे धनोच्यते। सौम्यायने प्रदोषादि चिंतयेद्धुतबंधनात्। अथ नक्षत्राणि। मृगादि
पंचस्वपि भेनविद्यासमारंभमुपैति सिद्धिं। हस्तत्रिके श्रोत्रत्रिके च पूर्वासु मृगपंचके। मूलार्द्रा
श्च मे त्रयो षेषु मुखसंस्कार इष्यते। आदित्यादिषु वारे पूर्वविद्यारंभफलं क्रमात्। आयुर्जाड्यं
मृति मेधा सुधीः प्रशातनुक्षयः। अनध्यायाः प्रदोषश्च षष्ठी रिक्तास्तथैव च। वर्जनीया
प्रयत्नेन विद्यारंभेषु सर्वदा। विद्यारंभे शुभाः प्रोक्ता जीवज्ञासितवासराः। मध्यमौ सोम
सूर्यौ च निंद्यश्चैव शनिः कुजः। उदग्गते भास्वति पंचमेब्दे प्राप्तेक्षरस्वीकरणं शिशूनां।
सरस्वतीं विघ्नविनायकं च गुजेदनाद्यैरभिपूज्य कुर्यात्। एवं सुनिश्चिते काले विद्यारं
भं तु कारयेत्। पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं। एतेषामेव देवानां नाम्ना तु जुहु
यात् घृतं। प्राङ्मुखो गुरुरासीनः पश्चिमाभिमुखः शिशुः। कुर्यादक्षरसंस्कारं पंचमेब्दे
शुभे दिने। कृत्वा सौमंगलस्नानं नमस्कृत्येष्टदेवताः। संपूजयेद्गणाधीशं तथा चैव सर
स्वतीं। नारायणं महालक्ष्मीं गंधधूपादिभिस्ततः। एतेषामेव देवानां तत्तन्मंत्रेण पूजयेत्।

॥४५॥

कृत्वा होमं स्वशाखोक्तमाघारांतं समाचरेत्। देवतानां च मंत्रेण नाम्ना वा जुहुयाद्धुतं।
एकैकं चाहुतिं दत्वा होमशेषं समाचरेत्। पाणिकायां सुवर्णस्य प्रसार्य कुंकुमादिकं।
चाप्प
देते भावे धरौप्यस्य कल्पोनुसारतः। सुवर्णलेखनीवेनलिख तत्राक्षराणि च। ॐ नमः
शिवायेत्यादौ सिद्धिनामेत्यनुक्रमात्। अक्षराणि च संपूज्य स्वयमुक्त्वाथ वाचयेत्।
प्राङ्मुखो सौ समासीनः कुमारस्तानि लेखयेत्। पूजयित्वा तु गंधाद्यैः पुनस्त्रिर्वा
चयेदथ। आचार्यं पूजयेत्पश्चात् वस्त्रालंकारभूषणैः। त्रिप्रदक्षिणमावृत्य देवता
श्चापि वा गुरुं। स्वविद्यास्त्रवूरांश्च स्वविद्यां च विशेषतः। ब्राह्मणान्पूजयेद्भक्त्या
गंधपुष्पाक्षतादिभिः। तोषयेद्दक्षिणाभिस्तान्यथावित्तानुसारतः। अथोपन
यनं। तत्रेदं गर्गः। अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वेति। तथा च मनुः। गर्भाष्टमे
ब्दे कुर्वीत ब्राह्मणस्योपनायनं। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः। ब्रह्मव
र्चसकामस्य कार्यं विप्रस्य पंचमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोष्टमे। तथा
का
च याज्ञवल्क्यः। आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां काले

नौपनायनिकः परः॥ अतऊर्ध्वं पतंत्येते सर्वधर्मबहिःकृताः॥ सावित्रीपतिता व्रात्या
व्रात्यस्तोमादृते क्रतोः॥ अथोपनयनकर्तारः॥ आचार्यः॥ पित्रैवोपनये पुत्रं तदभा
वे पितुः पिता॥ तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ पि[illegible] पितापितामहो भ्राता
सकुल्यो गोत्रजो गुरुः॥ उपनीयैधिकारी स्यात् पूर्वाभावे परः परः॥ व्रतबंधं कुमारस्य
वि[illegible] पितुरनुज्ञया॥ यः करोति द्विजो मोहान्नरकं प्रतिपद्यते॥ दूरस्थे पितृविषये॥
तत्र संस्कार्याः॥ स्मृत्यर्थसारे॥ औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा॥ कानीन
श्च पुनर्भूतो दत्तः क्रीतश्च दत्तमः॥ दत्तात्मा च सहोढजः स्वपविद्धसुतस्ततः॥
एते द्वादश पुत्राश्च संस्कार्याः स्युर्द्विजातिभिः॥ केचिद् दासु जीतौ संस्कार्यौ कुंडगोलकौ॥
अन्ये तु न मतं पस्ये जारजौ कुंडगोलकौ॥ कलौ दत्तौरसौ विहास्यु हैं हि ह्रंचौरसं
विना॥ संस्कारेनेभवं त्येहा इति केश्चिदुदीरितं॥ तथा च मनुः॥ य एते भिहिताः
पुत्राः प्रसंगादन्यबीजजाः॥ यस्य ये बीजतो जाता तस्य ते नेतरस्य तु॥ अथोपन
यने बृहस्पतिबलं॥ शिरोमणौ॥ द्विपंचसप्तनंदेशास्थितो जीवः शुभप्रदः॥ व्रतबं

श्रू त्रयाचोत्कं विनार्षै बनु कुर्यात् व्रतबंधनं॥ बृद्धवसिष्ठः॥ आचार्येस्य बलं श्रेष्ठं बटोर
दोषेत्य ष्टमा यदि ५४

धेतु पुत्रस्य कन्यायाश्च करग्रहे॥ जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः॥ चतुर्थोष्टम
स्थश्च द्वादशास्थो मृतिप्रदः॥ चतुर्थे द्वादशे जीवे द्विगुणं पूजनं भवेत्॥ अशुभो ष्टमराशिस्थो न
तु पूजाशतैरपि॥ धनुर्मीनकुलीरस्थो जीवो जन्मोष्टमस्थगः॥ विवाहमेखलादीनामबलोपि ब
लप्रदः॥ कर्कमीनधनुस्थोपि बटोश्चेद ष्टमो यदि॥ नाचार्यबलं तत्र कार्ये दुपनायनं॥ श्र
ष्टमाव्दे न बलं गुरोश्चेष्ठा ग्राह्या शस्तं व्रतबंधकर्म॥ अयुक्तब र्ष तु बलप्रदोपि नैवेतयो
रेव बलो बलीयान्॥ तथाचार्यो विशेषमाह॥ मुख्यकाले स्त बलवान् व्रते गोचरशुद्धि
तः॥ कालातिक्रमतोत्त्वे न गुरुशुद्धिं न चिंतयेत्॥ अथोपनयने प्रतिषेधः॥ नांदीश्राद्धे कृ
ते पश्चाद् दुष्टापाताग्निदृष्टिषु॥ सूतकादि निमित्तेषु न कुर्यान्मोंजिबंधनं॥ अथ मातरि र
जस्वलायां निर्णयमाह प्रचेताः॥ यस्य मांगलिकं कार्ये तस्य माता रजस्वला॥ तदा न त
त्कर्तव्यं आयुःक्षयकरं हितत्॥ ज्योतिःसारे॥ उद्वाहव्रतचूडासु माता यदि रजस्व
ला॥ तदा न मंगलं कार्यं शुद्धौ कार्यं शुभेप्सुभिः॥ प्रारंभात्प्राग्विवाहस्य माता यदि र
रजस्वला॥ निवृत्ते सोत्र कर्तव्यः सहत्वं शृति चोदनात्॥ नांदिश्राद्धे कृते पश्चा

न्माता यदि रजस्वला। मौंजीबंधं न कुर्वीत गार्ग्यस्य वचनं यथा। प्रयोगसारावल्यां गार्ग्यः। मा
तृणां भोजनात् पूर्वं यस्य माता स्पृशा यदि। तदा कर्म न कुर्वीत यदि कुर्यान्निरर्थकं। शौन
कः। वृद्धिश्राद्धे कृते पश्चाद्बटोर्माता रजस्वला। तदा कर्म न कुर्वीत यावद्भोजनसंगता।
षड्गिरान्मते। मात्रा सहैव भुंजीत तु ऊर्ध्वं माता रजस्वला। व्रतबंधः प्रशस्तः स्यादित्याह भृ
गवान्यमः। नांदिश्राद्धे कृते पश्चात्कन्या माता रजस्वला। कन्यादानं पिता कुर्यादित्यां
गिरसभाषितं। नांदीश्राद्धे कृते यस्य भार्या रजस्वला [illegible]। विवाहे नैव दोषः स्या
द्दोषः स्यान्मौंजिबंधने। धर्मार्थे कुरुते विप्रो मौंजीबंधनमेव च। न दोषो गर्गः सौंजे चैव
रित्याह श्रुतिसंग्रहः। अथोपनयनाहे तु मुहूर्ते शोभनादधः। मात्रा सहैव भुंजीयान्
विवाहे भार्यया सह। मात्रा सहैव भुंजीयात्तौ लैं[illegible]नेकभाजने। शिखां हि त्वा वपेत्केशान्
स्थापिता कुलधर्मतः। शिखास्थापनं भवेत्तत्र मध्ये शिरसि वर्तुलं। प्रमाणं
वो तस्य चौलोक्तमाचार्येणांगुलित्रयं। तथान्यस्मृतिः। समाप्य मात्रा सह भोजनं च बहिर्नि
दध्याद्वपनाभिषेकः। अलंकृतिर्लग्नपतिग्रहस्यान्मुखं समीक्षेत परस्परं च। कारि
का। ब्राह्मणस्योपनयनमुक्ते काले यदा भवेत्। कृत्वाभ्युदयिकं श्राद्धं पूर्वेद्युरपरेऽहनि॥

वा ५

प्पां कृतस्नानमलंकुर्यादाशिषो वाचयेदथ। भुक्तभोज्यस्य शिरसो वपनं स्नानमेव च। एवं भू
तं कुमारं तं अवसर्प्येति केतनः। ज्योतिःशास्त्रविदुक्ते तु मुहूर्ते शोभने ततः ससादि स्वशाखो
क्तविधिना कर्म कर्तव्यमित्यर्थः। अथ स्वशाखाविषये। स्वशाखाविधिमुत्सृज्य त्वन्यस्य
विधिमाचरेत्। अप्रमाणमृषिं कृत्वा स्वधे तमसि मज्जति। स्वकं कर्म परित्यज्य यद्यन्यत्कु
रुते नरः। अज्ञानादथवा लोभात्स तेन पतितो भवेत्। ऋक्शाखीनेव कुर्वीत स्वकीयं प
रशाखया। प्रमादाद्यदि कुर्वीत पुनः संस्कारमर्हति। यत्र नास्ति स्वशाखा चेद्यक्
शाखोक्तं समाचरेत्। पुनर्नार्हति संस्कारमन्यथा [illegible]ति चेत्पुनः। यजुःशाखावि
धानेन यदि वह्वृचकर्म च। कृतं चापि हि तत्कर्म पुनः कुर्याद्यथाविधि। ऋक्शाखा
विधिना कर्म यद्यस्यादन्यशाखिना। न तत्कर्म पुनः कुर्यादिति यज्ञविदां मतं। अथा
नुप्रवचनं। तिष्ठेदहःशेषमस्तमिते व्रतोदनमिति सूत्रं। कारिका। अहःशेषं ततः
स्तिष्ठेत्सायंसंध्यामुपास्य च। पूर्णपात्रविधानांतमुपलेपादि पूर्ववत्। अन्य
पक्षः। उपनीतो हि कुर्वीत सायंसंध्यामुपक्रमात्। अग्निकार्यं ततः कुर्याद्दोपना
यनिकानले। अनुप्रवचनीयं च तस्मिन्नेव हुताशने। समन्वारब्ध आचा

चा१

॥४८॥ यं वृहिर्तित्रयं हुत्वे त् । उपाकरण पर्यंतं सावित्र्या ब्रह्मयज्ञकं । संध्या माध्यान्हिकी कु देवं वदं
र्यं भिक्षाचर्यकारो ब्रवीदथ । मौंजीबंधानले कुर्यादनुप्रवचनीयकं । केचित्तग्नौ लौकिके
चापरे विदुः । सायं संध्यामुपक्रम्य ब्रह्मचारी समाचरेत् । अपरेद्युः कृतस्नानः प्रा
तः संध्यामुपावसेत् । अग्निकार्यं ततो भिक्षां सायं प्रातश्च पूर्ववत् । ब्रह्मयज्ञं हि
गायत्र्या मध्याह्ने तु समाचरेत् । उपाकरणे । संध्या माध्यान्हिकी कुर्याद्भिक्षाचर्यं का
रो ब्रवीदथ । उपाकरण पर्यंत सावित्र्या ब्रह्मयज्ञकं । अथ ब्रह्मचारी नियमः । क्षारा
३९ दिवर्ज्यमाश्नीयाद्ब्रह्मचारी दिनत्रयं । व्रतं बध्वा चतुर्थेन्हि मेधाजननं [illegible] चरेत् । आचार्यो मा६
वाचयेन्मंत्रं स्वस्थः वः सुश्रवा इति । तत्रैवं मेखलादीनि विहस्यान्यानि धारयेत् । मेख
लामजिनं दंडं वस्त्रं यज्ञोपवीतकं । पालाशः सन्निधौ यांज्य नवान्यन्यानि धारयेत् ।
नियमेन ब्रह्मचर्यमब्दं वापि समाचरेत् । अन्यथा कर्महानिः स्यादिति यत्तद्विदां
मतं । वाससी तु गुरवे मेधाजननकर्मणि । दद्यात्तावल्लभेत्स्वेवं कौपीनेन प्रवर्तते । स्व
स्थसारे । सदा धार्यं द्विजैः श्लक्ष्णं कौपीनं कटिसूत्रकं । कौपीनमहतं धार्यं खंडं चाव

जे २

॥४८॥

स्त्रपार्श्वकं । कौपीनं कटिसूत्रं च यतेस्याद्ब्रह्मचारिणः । ग्राह्यं नैव गृहस्थस्य श्रौते
स्मार्ते च कर्मणि । अथ महानाम्नी व्रतानि । कारिका । महानाम्न्यादिकं वरिं ततत्त
त्काले व्रतत्रयं । उक्तेकाले ददास्यंतं वपनाद्युपनीतिवत् । नवां मौंजीं नवं दंडं दत्वा
स्विष्टकृदाद्यथ । संवत्सरं चरेदेतत्प्रत्यब्दं तत्तरायणे । अथोपाकर्म । तत्रैदंग
हं । अथाध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पंचम्यां ह
स्तेन वेति । तथा च कारिका । अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तत् । तस्मि
त्सा हस्तयुक्तायां पंचम्यां च तदिष्यते । अवृष्टौ षध यस्मिंस्तन्मासे तु न भवेति चे
त् । तदा भाद्रपदे मासि श्रवणेन करोति तत् । ग्राकलः मासद्वयेप्युपाकर्म
न भवेद्यदि वै तदा । आषाढे श्रवणे कुर्याद्धस्ते वा कर्कटे रवौ । तदभावेप्य
न्यस्मिन्मासे श्रवणे कुर्यान्नोदगयन इति । आचार्यः । कुर्यान्नवोपवीत
स्य श्रावणेध्ययनं न वा तदुर्ध्वं वापि कुर्वीत नैव कुर्याद्दक्षिणः क्वचित् । यदि

॥४९॥

ग्रा

त ६

वेदु[illegible]दयव्यापिनि श्रवर्क्षे घटिकाद्वयं। तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञकं॥
पर्वण्यौदयिके कुर्युः श्रावणे तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्हस्ते छंदोसामवे
दिनः। धनिष्ठासंयुतं [illegible]श्रवणांतं न यद्भवेत्। तत्कर्म सफलं च स्यादु
पाकरणसंज्ञकं। संक्रांतौ ग्रहणे चैव बुधमूढयोर्गुरुशुक्रयोः। उपाकर्म न कर्त्त
व्यं सूतके मृतकेपि च। गार्ग्यः। अर्द्धरात्रावपश्चात्‌ चेत्संक्रांतिर्ग्रहणं भवेत्।
उपाकर्म न कर्त्तव्यं परश्चेन्न दोषभाक्। गुरुभार्गवयोर्मौढ्ये [illegible]ल्ये वा
वार्द्धिकेपि वा। तथाधिमाससंसर्पमलमासादि[illegible]द्विजैः। प्रथमोपा
कृतिर्न स्यात्कृतं कर्म विनाशकृत्। प्रत्याब्दिकं तु यत्कर्म नैत्रियमाणं नदु
ष्यति। अथोत्सर्जनं। तथोत्सर्गे पञ्चमीसामानधीयते ति सूत्रकृत्। कारिका।
अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते। ग्रामाद्बहिर्विविक्ते स्यादुप
लेपादि पूर्ववत्। मनुः। पुष्ये तु छंदसां कुर्याद्बहिः [illegible]त्सर्जनं भवेत्। माघशु

रु १

बा ६

के ५

॥४९॥

पा २

क्लस्य वा प्राप्ते पूर्वाह्ने प्रथमेहनि। उत्सर्जनं भवेत्तच्चेदुक्तकालेन वै यदि। उपाकर
रकाले तु कुर्यादुत्सर्जनं बुधः। कात्यायनिः। उपाकर्मणि चोत्सर्गे गोतमादीँश्च सप्त
वै। ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः। अनध्यायान्स्मृतौ सिद्धान्परिहृत्य
त्वधीयते। यस्त्वपूर्वमधीते सो प्रारभेत शुभेहनि। अथानध्यायानाह। पक्षे द्वे ये
चतुर्दश्यामष्टमी द्वितीये तथा। प्रतिपद्दर्शपूर्णे चानध्यायाः प्रकीर्तिताः॥ चा
तुर्मास्यद्वितीयासु युगमन्वंतरादिषु। अष्टकासु चे सर्वासु तथा सोपपदासु च॥
अयने विषुवे चैव श्रवणे द्वादशी तथा। शयनी बोधिनी चैव द्वादशी च प्रकी
र्तिता। द्वितीया प्रेतपक्षस्य सा भवेत्प्रेतसंज्ञका। आश्विनस्य तु या शुक्ला द्वि
तीया प्रेतसंज्ञका। भरणी प्रेतपक्षस्य द्वितीयापि तथैव च। अनध्यायास्त्विमेनि
त्याः इति प्रोक्ता महर्षिभिः। अथ नैमित्तिकानाह। मृदा हादिकानपि। शंका च तुर्दशी
चैव तथा संख्या चतुर्दशी। नियती भूमिचलने ज्योतिषां चोपमार्जने। एतानका

ग्रा

द्व ४

लिकान्विंद्याद नध्यायांस्मृता वपि॥ चातुर्मास्यद्वितीयाआरा॥ शुचावूर्जेतप
स्येच याद्वितीया विधुक्षये। चातुर्मास्यद्वितीयास्ताः प्रवदंति महर्षयः। अथ युगा
दयः। माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी। तृतीया माधवे शुक्ला नवम्यूर्जे युगु
गादयः। अथ मन्वादयः। आश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी मता। तृतीया
चैत्रमासस्यासिता भाद्रपदस्य च। श्रावणस्याष्टमी कृष्णा पौषस्यैकादशी
सिता। सिताषाढस्य दशमी माघमासस्य सप्तमी। श्रावणे चाप्यमावस्या ज्येष्ठे पं
चदशी सिता। आषाढी कार्त्तिकी माघी चैत्री मन्वादयः स्मृताः। अथाष्टका। मार्गे पौ
षे तथा माघे नभस्ये फाल्गुने तथा। कृष्णपक्षे ष्टकास्तिस्रः सप्तमाद्दियथाक्र
मं। अथ सोपपदाः। ज्येष्ठ शुक्लद्वितीया च ह्याश्विने दशमी सिता। चतुर्थी द्वादशी
माघ एताः सोपपदाः स्मृताः॥ मृगकर्कटसंक्रांती द्वे तु दक्षिणायने। अ
थ चैव तुला मेषौ विषुवौ तौ प्रकीर्त्तितौ। चतुर्दश्यां यदा पर्व प्रागस्ताद्दृश्यते
रवेः। अनध्यायं प्रकुर्वीत त्रयोदश्यां तु सर्वदा। आसायं प्रातराभ्य त्रयोद
श्यनुवर्त्तते। अनध्यायो भवेत्तत्र भूते दर्शो भवेद्यदि। वेदविद्भिः समाख्या
ता सैव संख्या चतुर्दशी। अनध्याये ष्वधीयानां देवेंद्रः प्राह वै प्र वं॥ हंतारं

ण चेंद्रोहान्स्मृताः स्वर्गं नियांति हि। नानुरोधस्त्वनध्याये होममंत्रेषु चैव हि। वेदोपाकर
णे चैव स्वाध्याये चैव नित्यके। अथ प्रदोषः। षष्ठी च द्वादशी च स्यादर्धरात्रोदयो यदि।
न वनाद्युस्तृतीया चेत्प्रदोषो मुनिभिः स्मृतः। युग सप्तत्र मोदश्यो वर्ततिस्तन
यादधः। प्रदोषं तत्र कुर्वीत व्यैकार्धघटिकासु च। युगाश्च तुर्थ्युसप्तमी। अथ गो
दानं। गोदानं स्नातकं चैव समावर्त्तनकं तथा। चोलोपनयने चैव न कुर्याद्द
क्षिणायने। मरीचिः। गोदानाद्यं [illegible] ह विवाहश्चैत्सु परिस्थितः। या
म्यायनेपि कुर्वीत गोदानं स्नातकं च वैतौ। चकारात्समावर्त्तनं कं॥
एते न गोदानं षोडशे वर्षे केशान्ताब्दे तु श्मश्रुशब्दान्वारयेदिति
स्तत्रं। तथा च कारिका। गोदानं चौलवत्कार्यं षोडशे च तदुच्यते॥
अंकोपवेशनं नास्ति श्मश्रूणां मुंडनं भवेत्। अथ समावर्त्तनं। अ
थैतान्युपक ल्पयीत समावर्त्स्यमानः इति सूत्रं॥ कारिका। वेदव्रतः

दीन्य६ सप्त४

॥५१॥

निवापारंनीत्वाद्युभयमेववा॥ व्रतेपक्षे तु ब्रह्मचर्यमारभ्याध्ययने कृते
विद्यांतेगुरुमर्थ्येन कामार्थेकरवाणि ते। यमर्थीहेमे तत्कृत्वा ततोनुज्ञामवाप्य च।
कुर्वीत स्वयमेवैतत्समावर्त्तनसंस्कृतं। प्राप्योदगयनाद्युक्तमुहूर्त्तं स्वस्वस्य
नं स्वयं। अथ स्नातकः। विद्यांतेगुरुमर्थेन निमंत्रियकृत्वानुज्ञातस्य वा
स्नानं तस्यैव व्रतानि भवंतीति सूत्रं। कारिका। अथ शिष्यः समावृत्तो
नामोपांसु गुरुं वंदेत। उच्चैरूर्ध्वं वदेत्स्थानमिदं यस्यैष माश्रमं।
हे देवदत्त गार्हस्थ्यं वत्स्यामो भो इति ब्रुवं। यथारं यथाकुर्यादेकस्मि मं५
न्न पि वा दिने। गोदानादीनि कर्माणि विवाहात्पूर्ववासरे। एवं तंत्रे
णवा कुर्यादिति यच्छाविदोविदुः। अथ मधुपर्कादि विवाहः। ऋत्विजो व
त्वा मधुपर्कादिमाहरेत्स्नातका योपोस्थितेतायेमाद्दम मधुपर्को भव
वतिभवतीसंतामनुः। गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि।२ ॥५१॥

उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्वितां। यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता। नोप
यच्छेत तां प्राज्ञः पुत्रिका धर्मशंकया। समानप्रवरां कन्यां सपिंडां चैव गोत्रजां। नैव तां वरयेत्
ज्ञो मातृवत्सा परिकल्पिता। वाग्दानं च प्रदानं च वरणं पाणिपीडनं। सप्तपदीति पंचांगो
मुनिभिः परिकीर्तितः। तत्र वाग्दानं। कुर्याद्वैवाहिके मासि वाग्दानं द्विजसत्तमः। कुल
ज्ञानसमायुक्तं संपूज्य गणनायकं। संनिधौ द्विजदेवानां कुमारीं तनसुतायवै। त्वयास्वी
कृ यता मद्य सुरूपा दीयते मया। कायेन मनसा वाचा सम्प्रीत्या धर्मसिद्धये। पुत्रमि
त्रसुहृद्वर्गैः सम्मत्वेन निश्चितं। कन्या तेमम पुत्राय स्वीकृते वंमया धुवो। एते पासमि
धावेवम मवं शाम्यवहूये। संबंधु गोत्रमुच्चार्य दद्याद्देकन्यकापिता। हस्तौपितुर्वर
स्याध तां कुले साक्षतफलं। स्वैंदा हतेद्य पुत्राय सुरूपां मम पुत्रिकां। आसादय
विवाहार्थं द्रव्यमंगलकानि च। स्वीकृता मम पुत्राय ममाद्यतव कन्यका। सफलं चा
क्षतां दद्याद्यथाचारः परस्परं। अथ प्रदानं। कन्यायावरणात्पूर्वं प्रदानं चैव कारा
येत। संपूज्य कन्यकां दद्याद्वस्त्रालंकारभूषणां। प्रदाने पहकुलादिके णर्वृ ठादि भूषणं।

॥५२॥

लब्ध्वाशिषोथ विप्रेभ्यस्तेभ्यो दद्यात्फलानि च। अथ वरणं। प्रार्थयेद्वेदसंपन्नं मधुपर्केप
एणपूजितं। मदर्थं वृणीध्व कन्यामिति दत्वा च दक्षिणां। गोत्रोच्चं वरस्य गोत्रस्य संबंधस्या
कन्यस्य च। नप्त्रे पौत्राय पुत्राय अमुकाय वराय वै। कन्यायामपि गोत्रस्य यथापूर्वं तदुच्चरेत्।
नप्त्रीमथ च पौत्रीं च पुत्रीं कन्यां यथाविधि। कन्यासमीपमागम्य ब्राह्मणैः सह वै पिता। यु
युक्तो मो द्विजा यूयं वृणीध्वं कन्यकामिमां। प्रत्यूचुस्ते द्विजाः सर्वे वयं चैमां वृणीमहे। प्रत्युग्मे
तेति सत्कृत्य वै जपेयुर्ब्राह्मणास्ततः। अष्टौ वाथ चैव चत्वारो ब्राह्मणा वेदपारगाः। कन्याया व
रणे चैव योज्याः कर्मविदो द्विये। गच्छन्तु गोति वाक्यानि पक्षिणामं प्रियाणि च। जपेत्
निक्रंदस्सूक्तं देवीं वाचमृचं तथा। अथ पाणिपीडनं। धर्मे चार्थे च कामे च ना
तिचरितव्या त्वया। इयं गृह्णाति पाणिभ्यां पाणीति पाणिपीडनं। गृ
भ्णामि ते सौभगत्वाय हस्तमित्युग्मृचमेव गृह्णीयादित्येव पाणिपी
डनमाह वृत्तिकारः। अथ सप्तपदी। अभ्युत्क्रामयतीशान्यां वध्वः सप्त पदानि तु।
साभ्युत्क्रामेन्मंत्रैर्वै दक्षिणं पादमालभेत्। इति प्रसंगतः पंचांगोपि विवाहो दर्शितः। अ
थ मधुपर्कः। द्विराचम्य समासीनं

॥५२॥

नः कर्ता पश्चात्प्राङ्मुखो वरं। प्राङ्मुखं तं समासीनं मधुपर्केण पूजयेत्। कुलमग्रे
परीक्षेत ये मातृतः पितृतश्चेति यथोक्तं पुरस्ताद्बुद्धिमते कन्यां प्रयच्छेत् बु
द्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेतेति सूत्रं। कारिका। यथोक्त
लक्षणां कन्यां उक्ते काले समुद्वहेत्। स्याद्दाभ्युदयिकं श्राद्धं पूर्ववद्दायवासरे।
अपरेद्युः कृतस्नानो हतवस्त्रधरो वरः। स्वलंकृतः सितच्छत्रो यदग्नीर्याति
बंधुभिः। वृतो वधूगृहं गत्वा मधुपर्केण पूजितः। स्वगृह्योक्तेन विधाना
द्वहेत्सा कन्यां स्वशाखिनां। वरोथ प्रतिगृह्णीयात् स्वशाखोक्तविधानतः।
देशाचारानुधर्मेण विवाहः कार्य एव तु। तथा च सूत्रे। अथ खलूच्चा
वचा जनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयादिति। अलंकृत्य क

दि

न्यामुदकपूर्वं दद्यादेशीब्रास्थ्य विवाह इत्यादिरुद्दंतीं रुदतीं हरेत् ॥ स राक्षस इत्युक्तमष्टविवाहः ॥ तथा च मनुः ॥ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥ चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ॥ राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥ आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयं ॥ आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ॥ अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ॥ कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ सहोभौ चरतां धर्ममिति वाचानुभाष्य तु ॥ कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥ ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः ॥ कन्याप्रदानं स्वाच्छंद्यादासुरो धर्म उच्यते ॥ इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ॥ गांधर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः ॥ हत्वा छित्वा च भित्वा च क्रोशंतीं रुदतीं गृहात् ॥ प्रसह्य क-

श्री २

त्रि

ताहा५

न्याहरणं राक्षसो विधिरुच्यते ॥ सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ॥ स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः ॥ संतिष्ठेत् प्राङ्मुखी कन्या तिष्ठेत् प्राङ्मुखो वरः ॥ मुहूर्ते शोभने काले त्वंतर्धाय वरं तयोः ॥ स्वक्षतास्सुमुहूर्ते तु क्षिपेतां शिरसोर्मिथः ॥ क्षिपेत् कन्या क्षतान् पूर्वं पश्चाच्चैव क्षिपेद्वरः ॥ नरः कुबेरादिभिर्मंत्रैः क्षिपेत् कन्याक्षतान् द्विजः ॥ अग्निं वा वाचयित्वाथ यथाचारं यथाचरेत् ॥ ततश्चोदङ्मुखस्तिष्ठेत् सभार्यः कन्यकापिता ॥ प्राङ्मुखायस्थितायाथ कन्यां दद्याद्वराय वै ॥ अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते ॥ इतरेषां तु वर्णानामितरेतरकाम्यया ॥ दंपत्योः रक्षणार्थं हि बध्नीयात् कंकणं तयोः ॥ कंकणैकमेकस्य बध्नीयातां तु दंपती ॥ अनादेशाद्दक्षिणं प्रतियादिति भाष्यकारः ॥ शौनकः ॥ द्विगुणेनैव सूत्रेण पंचधा वेष्टनं तयोः ॥ तेनाप्यधोर्ध्वं चोर्ध्वाधः प्रकोष्ठे बंधनं तयोः ॥ तथा च स्मृतिः

॥५८॥

रक्षार्थं दक्षिणे हस्ते बध्नीयात्कंकणं तयोः॥ बंधनं कन्यकापूर्वं वरपूर्वं विमोचयेत्॥ सू-
त्रं चतुर्गुणं कृत्वा दंपत्योर्वेष्टितं चयत्॥ रक्षार्थं कंकणं प्राज्ञेष्टिकेन समन्वितं॥ विप्रे-
ण मंत्रितं त्वचापुंसां बध्नीयाद्दक्षिणे करे॥ अथवा वामके स्त्रीणां बहुसाम्यस्य चैव तु॥
इत्यनेन केनचित्कन्याया वामकरे बध्नंति स कश्चिद्देशाचारः॥ देशधर्मानुसारत
इति व्यवस्था ज्ञातव्या॥ कन्यायै वाससी दत्त्वा बध्नीयाद्वाससी तयोः॥ बध्नीया-
न्मंगलं सूत्रं कुंकुमाक्तं सुशोभनं॥ इत्यादिकं चीयेत॥ अथ वेदिकालक्षणं॥ हस्तो वि-
च्छ्रितां चतुर्हस्तां चतुरस्रां समंततः॥ स्तंभैश्चतुर्भिः संयुक्तां विवाहे वेदिकां
शुभां॥ विस्तारितां हस्तचतुष्टयेन हस्तोच्छ्रितां मंदिरवामभागे॥ स्तंभैश्चतु-
र्भिः कृतनीलांगीं(?) वेदीं विवाहे प्रवदंति संतः॥ अन्यपक्षः॥ कन्याहस्तैः
पंचभिः सप्तभिर्वा वेदीं कुर्यात्कूर्मपृष्ठोच्छ्रितांगी॥ रम्ये हर्म्ये निर्गमा द्वामभा

॥५८॥

तू २

गे जायापत्योराशिषो वाचयित्वा॥ अथ मंजीवेदीका॥ प्राक्पश्चिमोर्ध्व(?) पदषट्कयुक्तमुदीच्यया-
म्यानि पदानि पंच॥ एवंविधा ज्योतिषरत्नविर्भिर्वेटोः शतायुष्यवती हि वेदीका॥ अन्यपक्षः॥
आचार्यस्य पदैः षड्भिश्चतुर्भिरथवा पदैः॥ विस्तृता चतुरस्रा च बेटो वेदीकरोन्नता॥ लं-
बाभित्तिर्द्वि हस्ता दुन्नता त्रिंशदंगुला॥ अष्टावष्टौ प्रकर्तव्यास सोपानान्यथ पार्श्वयोः॥ तद-
ग्रे कलशाकारमिति यज्ञविदां मतं॥ अथ पीठं॥ अष्टत्रिंशांगुलं पीठं उन्नतं स्यात्षडंगु-
लं॥ अष्टांगुलं च विस्तारं कुर्यादौदुंबरादिना॥ अथ होमः॥ कारिका॥ होमदेशं
व्रजेयातां प्रतिगृह्य करौ मिथः॥ आत्मनो दक्षिणे पार्श्वे वधूंतामुपवेशयेत्॥ वि-
वाहस्यादिने यस्मिन् दिवा वा यदि वा निशि॥ होमं तत्रैव कुर्वीत यथानुक्रमणेन
तु॥ होम इति विवाहहोमस्यार्थः तावद्विवाहो नैव स्याद्यावत्सप्तपदी भ

॥५५॥

वेत्॥ तस्मात्सप्तपदी कार्या विवाहे मुनिभिः स्मृता॥ वृद्धमनुः॥ एकत्वं संगता भर्तुः पिंडे
गोत्रे च सूतके॥ स्वगोत्राद्भ्रश्यते नारी विवाहे सप्तमे पदे॥ गृहप्रवेशहोमं तु होमं वै
वाहिकं च हि॥ एकतंत्रेण वा कुर्यादेकस्मिन्ननलेपि वा॥ खवागेसमागः पत्नी लाजा
न् हुत्वोपवेशयेत्॥ यजुः सप्तपदादूर्ध्वं होमांते चैव बह्वृचः॥ सायमौपासनं कुर्या
दस्तं याते दिवाकरे॥ सभार्यो विधिना चैव तस्मिन्नेव हुताशने॥ कारिका॥ अथ
यस्मिन् विवाहाग्निरुत्पन्नो हनि तस्य तु॥ तत्सायंतनमारभ्य वन्हिं परिचरेत्स्वयं॥
रात्रावतीतः कालश्च सायं तदुपक्रमः॥ आनौ संभवे पत्नी पुत्रादय इति स्थितः॥ स्म
अथ रात्रिभागः॥ रात्रिं त्रिभागं कुर्वीत द्वौ भागौ पूर्ववासरे॥ परस्मिंस्तृतीयो भागो॥
विवाहे सूतके ऋतौ॥ मध्ये अग्नौ विनष्टे। चतुर्थमध्येप्यनले विनष्टे संधानम

॥५५॥

॥ ५

ग्ने स्त्वथ लौकिकस्मिन्॥ औपासनात्पूर्वमथापि नष्टे विवाहहोमं विधिवच्च कुर्यात्॥ विवा
हहवनात्पूर्वमनले शांतिमागते। परिणीयादिकं कृत्वा होमशेषं समापयेत्॥
अत्र कन्या ऋतुमती चेत्॥ प्रयोगपारिजातके। विवाहहोमे प्रक्रांते कन्या यदि रजस्व
ला॥ त्रिरात्रं दंपती स्यातां पृथक्शय्यासनाशने॥ चतुर्थेहनि संस्नाता तस्मिन्न
ग्नौ यथाविधि। विवाहहोमं कुर्वीत कन्यादानादिकं तथा॥ चतुर्थमध्ये कन्या चेद्भ
वेद्यदि रजस्वला॥ त्रिरात्रमशुचिस्त्रीका चतुर्थेहनि शुध्यति। युंजान होमं कुर्वी
त प्रायश्चित्तं विधीयते॥ श्रियं संपूज्य येद्वै तस्या पुनर्होमो विधीयते॥ अथ रात्रौ
दानं॥ कन्यादानं निशीथे चेद्दूरायोपोषिताय च॥ उपोषितः सुतां दद्याद्द्वास्यादि
॥ ५ ॥ षु चतुर्ष्वपि॥ अन्यपक्षः॥ कन्यादानं निशीथे चेद्दिवा भोजनमाचरेत्॥ पुनः स्ना

वाजपेयं दद्वीपिता कन्यां प्रयच्छति ॥ उक्तां समुद्वहेत्कन्यां सावित्रीग्रहणं तथा ॥ गां
धर्वासुरयोरेवं विधिरेष उदाहृतः ॥ अथ कन्यादाः ॥ पिता पितामहो भ्राता पि
तृव्यो गोत्रजो गुरुः ॥ मातामहो मातुलो वा कन्यादा बांधवाः क्रमात् ॥ पित्रादिदा
त्रभावे तु कन्या कुर्यात्स्वयंवरं ॥ इत्येवं केचिदाचार्याः प्राहुर्महति संकटे ॥ अथा

य न्य ः शाखिने दानं ॥ स्वशाखीयवरो न स्यात्कस्मै दद्यात्तु कन्यकां ॥ स्वगृह्योक्त
विधानेन दद्यात्तां परशाखिने ॥ पूजयेन्मधुपर्केण स्वशाखावरखा विधिना व
रं ॥ आकन्यादानपर्यंतं पिता कुर्यात्स्वशाखतः ॥ अथ दंपतीनियमः ॥ तत्रे
दं सूत्रं ॥ अत ऊर्द्ध्वमक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधः श
यानौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैव दर्शिरिति ॥ तत्र स्मृतिः ॥ विवा

तां ।
दं हं पती स्यातां त्रिरात्रं ब्रह्मचारिणौ ॥ अलंकृता वधूश्चैव सहशय्यासनाशनौ ॥ कारिका ॥
वध्वा सहैव कर्तव्यो निवासः श्वशुरालये ॥ चतुर्थरात्रमत्रैव केचिदेवं वदंति हि ॥ अथ
चतुर्थी ॥ उक्तायां पररात्रे तु चतुर्थ्यां कन्यकापिता ॥ कुर्वीत मंगलस्नानं भार्यायाश्चैव
हितस्य तु ॥ दंपती मंगलस्नानं कृत्वा वस्त्रं च धारयेत् ॥ ताभ्यां च वाससी द
द्याद्देरीणीपू रयेदथ ॥ चतुर्थीमध्ये ज्ञायंते दोषा यदि वरस्य चेत् ॥ द
त्तामपि पुनर्दद्यात्पितान्यस्मै विदुर्बुधाः ॥ आचार्याः ॥ प्रवरैक्यादि दोषाः
स्युः पतिसंगादधो यदि ॥ दत्तामपि हरेद्दद्यादन्यस्मादिति केचन ॥ हेमाद्रिः ॥
कलौ तु पुनरुद्वाहं वर्जयेद्यादि गालवः ॥ कस्मिंश्चिद्देश इच्छंति न तु सर्वत्र केचन ॥

॥५८॥

इति पुनरुद्वाहः॥ वरस्य पित्रे मात्रे च दद्याद्वस्त्राणि वै ततः॥ वरमातुः करे दद्याद्दशपात्रं सपूजितं॥ बलिदानं ततः कुर्याच्चतुर्दिक्षु यथाक्रमं॥ अनेन बलिदानेन प्रीयतामिति देवताः॥ वंशदानमिदं पुण्यं वंशानां वंशवृद्धये॥ वंशस्य दीयते दानमतः शांतिं प्रयच्छ मे॥ अस्मदादीनुसुहृद्धं धूनमुत्कार्यातिभवग्रहं॥ मातः पालय भावेन कन्यारूपेण वत्सलां॥ कन्या संपालिता स्माभिः क्षणमेतच्च वन्नतः॥ दीयते ते सुता याध्य प्रीतये पार्वतीपते॥ कन्या संपालिता याभ्यामतिस्नेहेन पुत्रवत्॥ इदानीं तव पुत्राय दत्ता स्नेहेन पाल्यतां॥ इति वरगृहकर्म॥ अथ वधूप्रवेशः॥ तत्रेदं सूत्रं॥ प्रमाण उपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेदिति॥ कारिका॥ विवाहानंतरं गच्छेत्स भार्यः स्वी

॥५८॥

तृ२

यमंदिरं॥ यद्ग्रामांतरे तस्यात्तत्र यानेन गम्यते॥ विवाहमारभ्य वधूप्रवेशो मध्ये

सं शुभः षोडशवासरांतः॥ निषिद्धतारा तिथियोगदोषो न तत्र चैवं मुनयो वदंति॥ आ षोडशदिनादर्वाक् नववध्वाः प्रवेशने॥ तिथिवासरताराणां दोषस्तत्र न विद्यते॥ यथाचारस्तथा कार्यः॥ विवाहमारभ्य वधूप्रवेशे युग्मे तिथौ षोडशवासरांते॥ नवासमाने यदि पंचमे न्हि शस्तस्तदूर्ध्वं न दिवा प्रशस्तः॥ वधूप्रवेशनं कार्यं पंचमे सप्तमे पि वा॥ नवमे शुभे वारे सुलग्ने शशिनो बले॥ उद्वाहश्चतुरष्टदश ष४

ऋ३ दिने… वधूप्रवेशनं मासे द्विचतुःषष्ठे ष दश सुश्रीः पुत्र आयुः प्रदं॥ वर्षे द्वि व्य३ द्विचतुः षोडश मशुभं पंचादसुस्थापरैः पूर्वापुण्य [illegible] र्थाविभवदा वधूप्रवेशो भवेत्॥ वधूप्रवेशो न दिवा प्रशस्तो न पप्रवेशो न निशि प्रशस्तः॥ दि

॥५८॥

वाच राज्ञो च गृहप्रवेशः॥ सकीर्तितः स्यात्त्रिविधः प्रवेशः॥ अथ देवकोत्थापनं॥ स
मे च दिवसे कुर्याद्द्विवतो ह्युत्थापनं बुधः॥ षष्ठे च विषमे नेष्टं त्यक्त्वा पंचमसप्तमौ॥
प्रतिपद्दिनमारभ्य षोडशेऽहनि मध्यतः॥ मंडपोद्वासनं कार्यं दुर्गाहे च प्रतेर
रा॥ व्रत इति उपनयने दर्शनाहान्नाध्यन इत्यर्थः॥ विवाहात्प्रथमे पौषे त्वाषाढे
चाधिमासके॥ न च भर्तृगृहे वासश्चैत्रे तातगृहे तथा॥ वंशदानं विनोपस्तु
४ रा मंडपोद्वासनं यदि॥ अज्ञानाल्कु[illegible]तेन मूढो दंपत्योः क्षयमाप्नुयुः॥ स्मृत्यर्थसारे॥
वरे देशांतरगते त्रीन्ऋतून्संप्रतीक्षते। कन्यान्यस्मै प्रदातव्या वाग्दाने तु कृते सति॥
पंचत्वं चेद्रोगग्रस्तं वाग्दाने यदि वै कृते॥ कन्यान्यस्मै प्रदातव्या तथास्य सप
दापुरो॥ कृते सं[illegible]पदे भर्तुर्वियोगो यदि जायते॥ न देया पुनरन्यस्मै कलौ क
स१

॥५८॥

न्यामनीषिभिः॥ अथ प्रतिकूलं॥ स्मृतिचंद्रिकायां॥ कृते वाग्निश्चयेपि स्यान्मृत्युः कर्म
र्थस्य गोत्रिणः॥ तदा न मंगलं कार्यं नारीवैधव्यदं ध्रुवं॥ गर्गः॥ वाग्दानानंतरं यत्र कु
लयोः कस्यचिन्मृतिः॥ तदा द्वाहो नैव कार्यः स्वपक्षक्षयदो यतः॥ वरदर्शनकः॥
वरवध्वोः पिता माता महश्चैव मातामही चैव पितामही॥ पितृव्यस्त्री सुतो भ्राता भ
गिनी चाविवाहिता॥ एभिरेव विपन्नैश्च प्रतिकूलं बुधैः स्मृतं॥ अन्यैरपि विपन्नै
श्च केचिदूचुर्न तद्भवेत्॥ मांडव्यः॥ दंपत्योः पितरो भ्राता तत्पत्नी पस्तु सोदरः॥
पितृव्यः सोदरश्चैव पितामह पितामही॥ एषामन्यतमः कश्चिन्मृतो भवति मानु
षः॥ कृते वाग्निश्चये पुंसां प्रतिकूलं प्रजायते॥ दीर्घरोगाभिभूतस्य दूरदेशस्थित
स्य च॥ उदासवर्तिनश्चैव प्रतिकूलं न विद्यते॥ प्रतिकूले तु संजाते विवाहं नैव

॥५९॥

सुत २

कारयेत् ॥ प्रतिकूलेपि केप्याहुः कर्त्तव्यं शांतिपूर्वकं ॥ प्रतिकूले कालमाह ॥ पितुर्मातुश्च प
त्न्याश्च वर्षमर्द्धं तदर्द्धकं ॥ भ्रात्रोः सार्द्धमासं अन्येषां माससंमितं ॥ नदंते शांतिकं
कृत्वा यथोक्तविधिना ततः ॥ पुनश्चैवाप्यवाह्वानं कृत्वा लग्नं विधीयते ॥ प्रति
कूले सपिंडानां मासमेकं विवर्जयेत् ॥ शांतिं कृत्वा विधानेन नूतो लग्नं विधीय
ते ॥ संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना ॥ शांतिरुक्ता गणेशस्य पूजोक्त
ख्या समाचरेत् ॥ श्रियं विष्णुं तथा गौरीं स्कंदं नयमथापरं ॥ स्वस्थं च प्रार्थयेद
त्स्यात तन्मंत्रेण वै क्रमात् ॥ सहस्रमयुतं वापि ब्राह्मणैः कारितं जपं ॥ एते
षां प्रतिमा पूज्याः आदित्यादि नवग्रहास्ततः ॥ शांतिसूक्तविधिना कुर्यात्कल
शस्थापनादिकं ॥ समिद्भिश्चरुणा चैव होमः कार्यो यथाविधि ॥ ततो

॥५९॥

तु

व्याहृतिभिर्होमं शतमष्टोत्तरं हुनेत् ॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ कल
शस्थोदकेनैव सिंचेयुर्दंपती चैतो ॥ आचार्यं पूजयेद्वस्त्रालंकारभूषणैः ॥
ऋत्विग्भ्यो दक्षिणां दद्याद्ब्राह्मणान्भोजयेत्ततः ॥ प्रतिकूलविधिः प्रोक्त इत्येवं पूर्व

कृ ४

सूरिभिः ॥ अथ चाशांतिकं यस्तु निषेधे सति दारुणे ॥ यः करोति शुभं गर्वाद्विघ्न
स्तस्य पदे पदे ॥ अथ पितरि मृते शुभकर्मनिषेधः ॥ मृते ताते जनन्यां च वर्षं व
र्षार्द्धमेव च ॥ न कुर्याच्छुभकर्माणि कुलधर्मास्तथैव च ॥ पितुरब्दमशौचं स्यात्ष
ण्मासं मातुरेव च ॥ मासत्रयं तु भार्यायास्तदर्द्धं भ्रातृपुत्रयोः ॥ अन्येषां तु सपिं
डानां मासमेकं मुदाहृतं ॥ उक्तकालावधिर्यावत्तावन्नैव शुभक्रिया ॥ दशाहान
तरं प्रोक्तं अशौचं यदि जन्मनो ॥ शुभार्थं एव जानीयात्सूतके हि सपिंडने ॥
विवाहादि प्रकुर्वीत यदा महति संकटे ॥ सपिंडीकरणादूर्द्धं मासिकान्यपकर्ष

२

॥६०॥

च॥ कन्यायाश्चातिकालश्चेद्दूरस्यापि भवेद्यदि॥ नस्योद्वाहेन दोषोस्ति तथा चैवोपना
यने॥ शुभकर्माणि कार्याणि निरन्ने सूतकेपि तु॥ इत्युक्तत्वात् सपिंडानां केचिन्नेच्छंति मा
नवाः॥ व्याघ्रः॥ प्रेतक्रियाम निरस्य न कुर्याच्छोभनक्रियां॥ विधिर्भवेत्सपिंडानां ना
परेषामयं विधिः॥ अथ विवाहादिषु सूतकोत्पत्तिः॥ चौले चैवोपनने विवाहे च
महामखे॥ त्रिषट्दशैकविंशत्या प्रारंभे नास्ति सूतकं॥ तथा च॥ एकविंशत्यहर्य
ज्ञे विवाहे दशवासराः॥ त्रिषट् चौलोपनयने नांदीश्राद्धं पुरो दिने॥ प्रारंभो वरणं
यज्ञे संकल्पो व्रतसत्रयोः॥ नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया॥ व्रतयज्ञवि
वाहेषु श्राद्धे होमे जपार्चने॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं॥ प्रारंभाद्
र्ध्वमाशौचे विवाहः कार्य एव तु॥ व्रतादौ पूजने चैव प्रारंभे नास्ति सूतकं॥ वरादशौ

॥६०॥

चकः॥ ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां॥ कर्मण्यक्रियमाणे तु मध्ये चेत्सूतकं
भवेत्॥ यावत्कर्म समाप्तिः स्यात्तावन्नाप्नोति सूतकं॥ विनानेत्यकमन्येषु कर्मस्वशौचो
च मिष्यते॥ विश्वरूपे॥ विवाहादिषु मध्ये च सूतके सति चांतरा॥ पूर्वसंकल्पितं द्र
व्यं दीयमानं न दुष्यति॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके॥ शेषमन्नं परैर्देयं
दातृन्भोक्तृंश्च न स्पृशेत्॥ सूतकेपि ग्राह्याणि॥ विवाहे नियमानाह गर्गः॥ नां उत्क्रानि.
२ दीश्राद्धे कृते चैव यावन्मात्र विसर्जनं॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च॥
अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च॥ ब्रह्मयज्ञं चाध्ययनं नदीसीमातिपा
तनं॥ उपवासव्रतं चैव श्राद्धभोजनमेव च॥ नैव कुर्युः सपिंडाश्च मंडपोद्वा
सनावधि॥ मंडपोद्वासनात्पूर्वं नांदीश्राद्धे कृते यदि॥ ये कुर्वंति नरा मोहाद्दपस्य
स्यंवजंतिते॥ नांदीश्राद्धे कृते चैव पित्रोः श्राद्धं कृते पि च॥ हामोहादुपवसेद्यस्तु

नरकं प्रतिपद्यते॥ पित्रोः प्रत्याब्दिके प्राप्ते नांदीश्राद्धं न कारयेत्॥ यदि मोहाद्द्विजः
कुर्यान्मांगल्यमशुभं भवेत्॥ निवर्तयंति मांगल्यं स्वधया मंदबुद्धयः॥ मांगल्यविमु
खाः श्राद्धदपरस्वं व्रजंतिते॥ मुहूर्तं न लभेदन्यत् कथं वैवाहिकं तदा॥ समाप्याब्दिक
मप्यन्यत्कृत्वाभ्युदयिकं ततः॥ देशकालभयाद्वापि समाप्तिर्न भवेत्॥ वैवाहि
कं द्विजः कुर्यात् संकटे मुनयो विदुः॥ सपिंडानेव कुर्वीरन्नूने केम्मामिष्टहेपित्र्या॥ नै
वदेशं नैव दोषः स्वाहाकारो भवेद्यदि॥ अथ विवाहादूर्ध्वं वर्ज्यमाह॥ स्नानं स
चैलं तिलमिश्रकर्म प्रेतानुयानं करकप्रदानं॥ अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मं
गलतोब्दमेकं॥ मासषट्कं विवाहित्रतमारंभणं न च॥ जीर्णभांडादिनत्याज्यं गृहसं
मार्जनं तथा॥ ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबंधनात्॥ आत्मनो मुंडनं नैव वर्षं व
र्षार्द्धमेव च॥ विवाहोपनयादूर्ध्वं वर्षं वर्षार्द्धमेव च॥ न दद्यात्कुलकन्यायै पिंडान्नूनं ति

लैरर्चयेत्पितॄन्॥ वृद्धेरुपरि कर्तव्यं मातापित्रोर्मृतेहनि॥ पिंडनिर्वपनं कार्यं पितृव्यादेरपिं
डनं॥ मातापितृणामब्दे तु विवाहादिषु सर्वदा॥ तिलपिंडस्तु कर्तव्यं अन्यश्राद्धं विव
र्जयेत्॥ स्मृत्यंतरे॥ महालये गयाश्राद्धे मातापित्रोर्मृतेहनि॥ कृतोद्वाहोपि कुर्वीत पिं
डनिर्वपणं सुतः॥ सत्यव्रतः॥ पिंडदानं परित्यज्य संकल्पं कुरुते यदि॥ संततेस्तु वि
नाशः स्यात्संपदा हरणं भवेत्॥ पित्रोर्दैवमृताहे तु गयायां च महालये॥ पिंडनिर्व
पणं कुर्यात् कृतोद्वाहोपि यः सुतः॥ अथैकोदरविवादि॥ प्रस्तूद्वाहो नैव कार्यश्चैक ता
स्मिन् दुहितृद्वयोः॥ न चैकजनन्योः पुंसोर्विवाहश्चोपनायनं॥ एकजन्ये तु कन्य
द्वपुत्रयोर्नैकजन्ययोः॥ कन्याद्वे तु न चैकस्मै प्रदद्यात्तु कथंचन॥ एकमातृप्रसू
तानामेकस्मिन्वत्सरे यदि॥ विवाहं नैव कुर्वीत वदंति मुनयोन्यथा॥ विवाहस्त्वे
कजन्यानामेकस्मिन्तु दये कुले॥ नाशं करोत्यवर्षे स्यादेका विधवा भवेत्॥ एकोद

र्योः करतलग्रहणं यदि स्यादेकोदरयोर्वरयोः कुलदहनं च॥ एकाब्देन तु विधवा भवतीति कन्या
न्यंतरे विष्णुभट्टपृथुचौलरोधे। न मुंडनात्त्यंडनमूर्द्ध्वमिष्टं न पुत्रयोर्मुंडनमेकव
र्षे॥ न पुंसवि वाहोर्द्ध्वमत्तु त्रयेपि विवाहकार्यं दुहितुश्च कुर्यात्॥ ज्योतिः॥ पु
र्द्ध्वं विवाहात्तनयस्यनैव कार्यो विवाहो दुहितुः समार्द्धं॥ अप्राप्य कन्या श्वसुरालयं तु व
धूप्रवेशः स्यगृहं न चादौ॥ एकोदरप्रसूतानामेकस्मिन्नेव वत्सरे॥ न कुर्यान्मंगल
त्रीणि विवाहं चोपनायनं॥ चकाराच्चौलं॥ एकोदरप्रसूतानां विवाहं चोपनायनं॥
चौलकर्म तथा चेति मंगलत्रयमुच्यते॥ एकस्मिन् मंडपेप्येके न कुर्यान्मंगलत्रयं॥
यदि भिन्नोदराणां स्यात्समाप्यैके पुनर्भवेत्॥ भिन्नोदराणामेकस्मिन् कुर्यान्मंडपेपि
ता॥ समाप्य मंगलं चैके पुनः कुर्याच्चिनादिकं॥ स्मृत्यर्थसारे॥ ऊढ्वा पुत्रो न पिता
विदध्यात्पुत्र्यंतरस्योद्वहनं कदाचित्॥ यावच्चतुर्थदिनमंगलस्य समापनं तावद

सो विदध्यात्॥ पुत्रापरिणयादूर्द्ध्वं यावद्दिनचतुष्टयं॥ पुत्र्यंतरस्य कुर्वीत नोद्वाहमिति सूत्र
यः॥ पुत्रस्याप्युपलक्षणं॥ अथ यामले॥ ज्योतिः॥ एकस्मिन्वत्सरे चैववासरे मंडपे
पि च॥ कर्त्तव्यं मंगलं स्वस्त्राभ्रात्रोर्यमलजातयोः॥ अथ संकटे प्रवृत्तिमाह॥ ज्योतिः॥
एकोदर्योर्वरयोरेकदिनोद्वाहितयोर्भवेन्नाशः॥ न तत्र एकवर्षे केप्याहुः सं
कटे च शुभं॥ न प्रतिषिद्धं॥ न लसंप्राप्ते संकटे महति॥ एकोदरसंभवयोरेकाहे मं
डपे काले॥ संकटे॥ तथा च स्मृत्यंतरे॥ न चैकजन्ययोः पुंसोर्विवाहस्त्वेकवत्सरे॥
अब्दभेदे शुभं केचित्प्राहुर्भाति संकटे॥ व्रते चौलोपनयने भवेद्याच्च दिनत्रयं॥ क
न्यादानं न कर्त्तव्यं विवाहादिति सूरयः॥ व्रतबंधनमेकस्य विवाहके॥ एकस्मिन्न
पि वान्यस्मिन् दिने कुर्यात्तु वै पिता॥ मध्ये च व्रतबंधस्य विवाहो यदि वा भवेत्॥
कालाभे सुमुहूर्त्तस्य कन्यायास्तस्य च॥ कन्याविवाहमध्ये चेद्विवाहः स्यात्सुतस्य
तु॥ पितैव तु तदा कुर्यादिति केचिद्वदीरितं॥ रजोभवेद्यदा तत्र कथं स्यान्मातृपूजनं॥

नान्दीश्राद्धं भवेदेकं स्वस्तिवाचनपूर्वकं ॥ एकत्र हि कर्ता स्याद्दाने केचिदपि कर्मसु ॥ अष्टवर्गो भवे
देकः संकल्पस्तु पृथक् पृथक् ॥ गणेशः क्रियमाणे नाम्येकं स्यान्मातृपूजनं ॥ नान्दीश्राद्धं
भवेदेकं होममंत्राः पृथक् पृथक् ॥ मंडनोपरि मुंडनं ॥ संहितासारावल्यां ॥ चौलं मेखल
मेवोक्तं वर्जयेद्वत्सरत्रयं ॥ भ्रातुस्त्रये पुनर्यावन्न कुर्याच्छुभमंगलं ॥ कुले भ्रातृत्रयाद्वाप्यु
ढानां तु मुंडनं ॥ प्रवेशो निर्गमः पश्चान्न कुर्यान्मंगलत्रयं ॥ न पुंविवाहोर्ध्वमृतुत्रयेपि
विवाहकार्यं दुहितुश्च कुर्यात् ॥ न मंडनाच्चापि हि मुंडनं च गोत्रैकतां चाब्दिनाद्धमदः ॥ कु
ले ऋतुत्रयादर्वाक् मंडनाच्च तु मंडनं ॥ अब्दभेदे प्रकुर्वीत मंडनान्मुंडनं भवेत् ॥ पुत्रोद्व
हान्नैव पुत्री विवाहः स्याद्दृतुत्रये ॥ अब्दांतरान्मुंडनं च नैकदा मुंडनद्वयं ॥ फाल्गुने चै
त्रमासे तु पुत्रोद्वाहोपनायने ॥ अब्दभेदेन दोषः स्यादित्याचार्यो ब्रवीदथ ॥ गर्गः ॥
दोषः स्यादूर्ध्वमुद्वाहात्कुले चेदुपनायने ॥ न दोषः पुरुषोद्वाहादूर्ध्वं कन्याविवाहके ॥
व्यासः ॥ पुत्रोद्वाहात्परं दोषो दुहितुः स्याद्विवाहके ॥ नैव दोषः सपिंडेषु न दोषो भिन्नमा
तृके ॥ भृगुः ॥ फाल्गुने चैत्रे विवाहः स्याच्चैत्रे चैवोपनायनं ॥ अब्दभेदात्सकृत्विलिन तुम

यविलंने वे ॥ अथ परिवित्तादि ॥ स्मृत्यर्थसारे ॥ दाराग्निहोत्रादीनां च कुले ते
योगमतेस्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तस्तु पूर्वजः ॥ पितृव्यपुत्रे याप
त्ने परदारसुतादिषु ॥ विवाहाधानयज्ञादौ परिवेत्रापदूषणं ॥ षंढांधबधि
रस्तब्धजडागादरपंगषु ॥ कुकुबामनरोगार्थश्च कुंजेविकलांगिषु ॥
सात्यपत्ते च रूपनस्थेनिविंद्रिये ॥ मूके न्मनेषु सर्वेषु न दोषः परिवेद
ने ॥ कन्याविषयेपि प्रयोगपरिज्ञातके ॥ एकमातृप्रसूतानां पुत्रीणां परि
वेदने ॥ दोषः स्यात्सर्ववर्णेषु न दोषो भिन्नमातृषु ॥ विवाहानधिका
रः स्याज्ज्येष्ठकन्या स्थिता यदा ॥ तदनुज्ञां विनाप्यपि कनिष्ठामुद्वहे
न्नदा ॥ कालेप्रतिक्षणे न स्याद्ज्येष्ठे न दोषभाक् ॥ परिवेत्तो भवे

॥६४॥

पस्तु पतितः कन्यकापि च॥ अथासंस्कृतकन्यायां रजोदोषः॥ स्मृत्यंतरे॥ असं
स्कृता तु या कन्या रजसा चेत्परिप्लुता। भ्रातरः पितरस्तस्याः पतिताः स्युर्न संश
यः॥ तथा चेति हस्ते॥ पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता॥ सा कन्या वृष
ली ज्ञेया तत्पतिर्वृषलीपतिः॥ अथ स्त्रीणां रजोदोषप्रसंगतः कथ्यते॥ रागजं रो
गजं चैव द्रव्यजं कालजं तथा॥ स्त्रीणां चैव रजः स्त्रीणां कालजं लक्षते॥ प्रोक्तं
कालजं दोषकृद्भवेत्॥ यावत्संवत्सरं तावन्नित्यं तो दशवत्सरात्॥ मासि मासि रजः
स्त्रीणां कालजं तत्प्रचक्षते॥ रागजं रोगजं चैव द्रव्यजं चापि यद्भवेत्॥ अकालेऽय
दि चेत्स्त्रीणां तद्रजो नैव दुष्यति॥ पंचाशद्वर्षादूर्ध्वं नैव दोषः॥ याज्ञवल्क्यः॥
रजःस्रावे तु नारीणां रजोदोषो दिनत्रयं॥ चतुर्थे दिवसे स्नाता स्पर्शनादेव
निंदिता॥ शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला। दैवे कर्मणि पि
त्र्ये च पंचमेऽहनि शुध्यति॥ स्मृत्यंतरे॥ रजस्वलायाः पुनरेव चेद्रजः
प्रादृश्यते ष्टादशवासरात् शुचिः॥ अष्टादशाहे यदि चेद्दिनद्वयादेकी

॥६४॥

न विंशतिदिनात्ततः परं। रजः पुनाष्टादशवासरेषु नः आप्नोति पयो वन शालनीवधू। अहे
ण साधु सुध्यति दैवपित्र्ययो रजो नियुक्तं सुचिमाप्नुवेसति। रजस्वला यदा स्नाता पुनरेव
रजस्वला। अष्टादशदिनादर्वाग् अशुचित्वं न विद्यते॥ ऋतुकाले व्यतीते नु यदा नारी रजस्व
ला॥ तत्र स्नानेन शुद्धिः स्यादष्टादशदिनोत्तरा॥ दिनाधे षोडशाद् दर्शा ...नीयाचाति यौ
वना॥ पुना रजस्वलापि स्याच्छुद्धा स्नाने न केचन॥ रात्रेः कुर्यात् त्रिभागं तु द्वौ भागौ पूर्व
वासरे॥ ऊर्ध्वं स्नाते मले चैव वशीयांसांशाः परेहनि॥ ... राजा ... समुत्सं नेम...
रजसि सूतके। पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः॥ ... चारः॥ न तु
सर्वत्र॥ अथ द्वितीयविवाहनिमित्तं॥ स्मृत्यर्थसारे॥ अप्रजां दशमे वर्षे स्त्रीप्रजां
द्वादशे त्यजेत्॥ मृतप्रजां पंचदशे सद्यः त्वप्रियवादिनीं॥ स्मृत्यंतरे॥ व्याधि
तास्त्री प्रजार्थं ध्यात्युन्मत्ता विगतार्तवा॥ अदुष्टा लभते सागं तीर्थतो न तु धर्मतः॥

॥६५॥

अग्निस्विष्टादिसु मरणं बहुभार्यः सवर्णया। कारयेद्बहुलं ज्येष्ठयागृहितानवेत्।
सुरूपां सुप्रजां चैव सुभगां मालिनः प्रियां। धर्मानुचारिणीं भार्यां न सुते गृह्णीजस
त्तमः। अग्निसंप्रयोगः। जीवत्स्वेव ज्येष्ठपत्न्यां चतुर्थं स्त्री पुनरुद्वहेत्। कृत्वा मं
गलसूत्रं वालं मधुपर्कादि पूर्ववत्। सर्वं कनिष्ठभार्यायावहनं तत्र चैव हि। कनिष्ठ
भार्यायाः सर्वं वैवाहिकं वस्तं च ज्येष्ठभार्याग्नौ कुर्यान्न संशयः। विधिवज्ज्ये
ष्ठभार्याग्नौ कुर्याद्वैवाहिकं च यत्। तदभावे तु लौकिकाग्नौ सर्वं वैवाहिकं भवेत्। व
क्ष्ये हमग्निसंयोगं पत्न्योर्ज्येष्ठकनिष्ठयोः। निधाय ज्येष्ठभार्याग्निं स्थंडिले दक्षि
णे चैनं। तदुत्तरे कनिष्ठाग्निं स्थंडिले तं निधाय च। पृथक् स्थंडिलयोरग्निं समाधा
य यथाविधि। तत्रैव स्वाज्यभागांतमन्वाधानादिकं ततः। जुहुयाज्ज्येष्ठभार्याग्नौ
समन्वारब्ध आहुतिः। अग्निमीळे इति त्रिर्निर्वापश्च यथाक्रमं। ततः स्विष्ट ॥६५॥

कृतं कृत्वा होमशेषं समापयेत्। समिध्यैनं समारोप्य तयोर्नयो निरिसत्वा। प्रसव
ेसनया कनिष्ठाग्नौ निधाय ततो। आज्यभागांतमन्वादि कृत्वा सनदादितः। अग्नाव
ग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। तस्मै जुहोमि हविषा घृतेन मादे
वानां मोमुहद्भागधेयं मो अस्माकं मो मुहद्भागधेयं। समन्वारब्धे तान्यां पत्नी
भ्यां जुहुयाद्घृतं। अग्निनाग्निः समिध्यते अग्निनेति च। पाहिनो अग्ने
एकया तिसृभिश्च ततः परं। अस्थिछदित्यमंथनं ... भिः परं। ततः
स्विष्टकृतं हुत्वा होमशेषं समापयेत्। ततो योपासनं कुर्यात् सायं प्रातर्यथाक्रमं।
अथोपासनाग्न्योः संयोगः। संयोगो जायते चाग्न्योर्गेहे रोपासने स्युतु। निद
ध्यात्तं विभज्याग्निं पूर्वपश्चिमयोर्द्विशः। आद्ये तु पूर्वभागाग्नौ आयुष्मती
कृतीर्हुनेत्। ... देवघर साधा साद्देवानामपीत्यथ। द्वितीये पश्चिमे स्थेऽग्नौ
वा कृतिर्द्वे हुनेदथ। स्वेणस्तोरकचार्यां अक्रंदद्ग्निं आधाय यथा ... सेका ... मने

व

॥ ६६ ॥

ता१ स१

मास्तुषीरिति। गृहदोषग्निसंसर्गे गृह्याग्निर्जायते यदि। कृत्वा चारपर्यन्तं क्षामायाज्याहु
तीर्जुहुनेत्। प्रमादाद्गृह्याग्निसंयोगे माह्याग्नेर्यस्य च भ्रुवेत्। जुहुयात्पूर्ववत्सो
संवर्गायाहुतिद्वयं। अग्निकार्यं कृते चेत्स्यात् गृह्याग्नौ ब्रह्मचारिणः। प्रायश्चि
त्तं गृहीकुर्याच्चास्मिन्नेव कृताशने। पाहि नो अग्न इत्येका यत्र वेत्थ वनस्पते। अ
नाज्ञातं यदे सेका जुहुयादाहुतित्रयं। अर्थ्योपासनातीतन्दिनप्रायश्चित्तं। का
रिकाग्निसहोमेत्यादि कांतसंस्कृतं संज्यं च पूर्ववत्। चतुष्कं होमगृहीताज्यं मनः
स्वस्याहुहायथा। अर्वाक्द्विरात्रं जुहुयाद्यास्मिन्नासप्तरात्राच्चमनस्वतीका।
एकादशाह सप्तह तंतुमत्यास्याद्द्वादशाहे ध्रुवम ग्नि [illegible]॥ सूत कांतरितेव
होमनोयाभूर्भुवस्वरों मध्येपर्वाग्निसंधानात्पुनः संधं विधीयते। आद्वाद
शबिनादर्वाक्प्रायश्चित्तं कथं भवेत्। तत्रं तत्काज्यभागांतम मास्येसादि ॥ ६६ ॥

समन्वं कृत्वा स्विष्टकृतादि स्याद्धोमशेषं समापयेत्। दिवसाद्द्वादशादूर्ध्वं कुर्याद्धोम
विवाहवत्। गृह्याग्नावेव कुर्वीत प्रायश्चित्तनिमित्तकं। तदभावे तु कुर्वीत लौकिके
ग्नौ यथाविधि। प्रातर्होमोपवासोम प्रमादान्न कृतो यदि। कृत्वाग्न्याहुतिं स्त्र्याज्य
मतीनेष्याहुतिं हुनेत्। प्रायश्चित्तविशेषस्य यत्र नोक्तो विधिर्भवेत्। हुनेदाज्याहु
तीस्तत्र भूर्भुवः स्वरितीहुनुः पुनराधानं॥ स्त्रीदक्ष्या पतितः शूद्रो रचेत्पुत्रं पुरी
षकं॥ स्पृशेदग्निसभिहस्तं चेत्पुनराधानमिष्यते। समिधश्चेत्स तत्र तापानाशाः
स्याद्दंगएव च। पुनराधानमेष्वंति केचिद्यत विदोजनाः। सापिस्तन्तपत्ता
पूर्वमग्निश्चेत्सशाम्यति। पुनराधानवत्कुर्यादपाश्चसादि सर्वं। अथव
ध्रुवरोपासनं॥ तत्रैवस्मृतिः। तदा हुर्वाचा पत्नीकाग्निहोत्रं कथमेवं हातीति। जु
तथावरसमृतिः॥ मृतानामपि भार्याणां वैदिकं यो सजाह्निजः। तुपाधीनापिय

कर्मयावज्जीवंसमाचरेत् ॥ अन्येकुत्रामर्यापिपत्नीत्वानुगृहमेधिनः ॥ अग्निहोत्र
मुपासीतेयावज्जीवमनुव्रताः ॥ अथविधिमाह ॥ उद्धृतमग्निंप्रणयेनचाद्येष्वग्नि
हुत्वासामिन्द्रवाहरेत् ॥ आरोहणंचाप्यवरोहणंचह्युमन्त्रैरवधिपुरानलस्य
रर्थ्यंकृत्वानतोहोमंसायंप्रातर्यथाविधि ॥ प्रतपेसमिधंवापिपाणिवापुन
पत्तपेत् ॥ प्रत्यवरोहणंनेवनूचेवापणंतथा ॥ विधुरस्यविधिकश्चिद्दुकोय
मिनिसूरिभिः ॥ अपरातभार्यस्यपुनर्विवाहविषये ॥ संग्रहे ॥ प्रमदामृतिवस
रादित्वःपुनरुद्वाहविधिर्यःदापावेत् ॥ विषमेपरिवत्सरेशुभःसमवर्जेतुमृति
प्रदोभवेत् ॥ पत्नीवियोगेप्रथमेचवर्षेनोचेद्द्वितीयेवर्षेपुनरुद्वहेत्तः ॥ अयुग्ममा
सेतुशुभप्रदःस्यात्द्विराष्टगर्गप्रमुखावदन्ति ॥ पत्नीयेतिरावेवाहःस्यादयुग्मे
वत्सरेशुभः ॥ युग्मवर्षेविनाशस्यात्गार्ग्यस्यवचनंयथा ॥ अपुत्रिणिमृतायां

पतिस्याचतुर्थविवाहिकं ॥ युग्माद्युग्ममासेवाविवाहःशुभदोमतः ॥ प्रजावत्यां
चभार्यायांमृतायांब्राह्मणस्यतु ॥ प्रथमेब्देनकर्तव्योविवाहोऽशुभदोभवेत् ॥
तथाचगर्गः ॥ सतेजनसंयाजनकेगतायांद्वितीयवर्षेप्रकरोतिशोभनं ॥ करोति
मोहात्प्रकरोतिहानिंवदन्तिगर्गात्रिपराशराद्याः ॥ इतिमृतभार्यकस्यविधिः ॥
अथार्कविवाहविधिः ॥ अकृत्वार्कविवाहंतुतृतीयांयदिचोद्वहेत् ॥ विधवासा
भवेत्कन्यातस्मात्कुर्याद्विचक्षणः ॥ अर्कस्यसंनिधौगत्वाकुर्यात्स्वस्त्यादिवाच
नं ॥ नांदीश्राद्धंहिरण्येनह्यर्ष्यगन्धैःप्रपूजयेत् ॥ पूजयेन्मधुपर्केणवरमा
चार्यहस्ततः ॥ अर्कस्यपुरतस्तिष्ठन्सार्थ्यंयेतंद्विजोत्तमः ॥ त्रिलोक्यपदासीनं
सप्ताश्वच्छाययासहितोरवेः ॥ तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु ॥ अर्कं
गेरभिषिंचाप्यश्वेतवस्त्रेणावेष्टयेत् ॥ कुर्यात्संतंतुनिर्श्वेवगंधपुष्पैःसमर्पयेत् ॥

॥६८॥

८३

गुडोदनं नैवेद्यं तांबूलं चनिवेदयेत्। अर्कं प्रदक्षिणीकृत्वा जपेन्मंत्रमिमं बुधः। मम प्री
तिकरा चेयं मया सृष्टा पुरातनी। अर्कजा ब्रह्मणा सृष्टा सर्वप्राणिहिताय च। वृक्षा
णामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः। तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय। इति
संप्रार्थ्य तां विप्रः कन्यावरणमाचरेत्। गोत्रं सस्य संबंधमुख्यापोत्रिपोरूपं।
आदित्यस्याथ सवितुरर्कस्य च यथाक्रमं। अत्रिपौत्रीं तथा नप्त्रीं गोत्रे काश्यपमि
मथ। आचार्यमुखतः कुर्यात्सुमुहूर्ते दिवं वपत्र। मंत्रमुच्चार्य तां सर्वार्या वायोस्य
वरस्य च। अर्ककन्यामिमां विप्रा यथाशक्त्या विभूषितां। गोत्राय शर्मणे तुभ्यं
दत्तां विप्र समाश्रय। इत्थं कृत्वा यथोक्तं चावदूद्धाविवाहलग्नोः सहाकंकणं चाथ बं
ध्नीयात्तु वस्त्रं मंगलसूत्रकं। स्वशाखोक्तविधानेन ततन्मंत्रेणकारयेत्। गा
यत्र्या वामि कुर्वीत केचिद्देवं वदंति हि। निक्षेप चतुरः कुंभान् अर्कस्य परितो बरः॥

॥६८॥

घटान्सिवेष्टयेत्सूत्रैर्बाह्ये स्याद्दिचतुष्टये। सवस्त्रं प्रतिकुंभं च त्रिसूत्रेणैव वेष्टयेत्। हरिद्रा
गंधसंयुक्तं पूरयेच्छीतलं जलं। प्रतिकुंभे महाविष्णुमंतोदेनेति पूजयेत्। अर्कं च पूजये
द्भक्त्याभ्यामयत्रेणप्रतीक्ष्य चे। अर्कस्योत्तरभागे तु स्थंडिलं कारयेद्बुधः। वरस्तत्रै
व चाज्येन जुहुयादाहुतीरथ। शाउहुती स्ववेलोवसं गोपि रिच्छ चैकैया। यस्मै त्वा
कामकामाय वयं सम्राज्यजामहे। तमस्मभ्यं कामं दत्वा येद घृतं पिव। यस्मै त्वंकाम
कार्येसचैकयानतः परं। व्याहृतिभिश्चैव जुहुयात्कुर्यात्स्विष्टकृतादिकं। आचा
र्यायाथ गां दद्याद्दक्षिणां चैव शक्तितः। पुनरर्कं च संपूज्य प्रार्थयेत्। आयुर्दे
हि यशो देहि प्राज्यो देहि वसूनपि। देहि मे कदिनं पुष्टिं स्वस्थानेत्वं स्थिरो भव।
इत्यर्कविधिः। अथ पुण्याहवाचनविधिः। द्वात्रिंशदंगुलं दीर्घं तस्मं तावच्च तुर
स्रकं। रेखे द्वे कोणतः कोणं तिर्यक्कुर्वीत पार्श्वयोः। कोष्ठानि कारयेत्तत्र द्वात्रिंशाहं

॥ ६१ ॥

व १ स्वयानितु। पद्मासास्थयोस्तस्यपुरतोगजस्तुंडवत्। पश्चिमेकलशाकारं निर्मितं अल
णापुरा॥ तदेवस्वस्तिकं चेति प्रवदंति महर्षयः॥ तंदुलैः संलिखेद्धर्मावादौ तु भक्र
मेण॥ तन्मध्ये स्थापयेद्राश्योः सजलं कलशद्वयं॥ सौवर्णं राजतं वापि कुंभं स्वचारत
पूरितं॥ पात्रेद्वे विन्यसेत्तत्र सौवर्णं राजतेपि वा। सफलं कांस्यपात्रे वा न्यसेत्तंदुलपू
रिते। सुवर्णपुष्पपत्रेस्य पंचरत्नसमन्विते। पत्नीपुत्रैः समायुक्तः शुभार्थी ब्रा
ह्मणैः सह। पुण्याहवाचनं कुर्यात् सर्वे वृद्धिकर्मसु। विवाहादिषु सर्वेषु गर्भाधा
दिकर्मसु॥ नांदिश्राद्धं समुद्दिश्य स्वस्तिवाचनमाचरेत्। स्वस्तिवाचनमात्रेषु
सर्ववाम्युद्धिकर्मणां। आदावेत्प्रकर्तव्यमिति यज्ञविदां मतं॥ अथ षोडशसं
स्कारकर्माण्याह॥ भाष्यकारः॥ गर्भाधानं पुंसवनं सीमंतो जातकर्म च। नामनि
ष्क्रमणं चान्नप्राशनं नामकर्म च। तथोपनयनं चैव महानाम्नीव्रतं। उपनिषच्च महा
गोदानं समावर्तनकं तथा॥ विवाहाग्निसपिंडकं चेति संस्काराः षोडशैवतु। एते वै मुनिभिः

॥ ६१ ॥

प्रोक्ताः कर्तव्या हि द्विजन्मनां॥ अथ नांदिश्राद्धं। स्मृत्यर्थसारे। स्वपितृभ्यः पिता दद्यात् सुत
संस्कारकर्मसु। यावद्विवाहः पुत्रस्य तावदेव हितं सुतः। नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे
बुधः। अतऊर्ध्वं सुतः कुर्यात् स्वित्त्वाणां तद्धि वै पितुः। नांदिमुख्येकर्मणि संप्रवृत्ते पितर्यप
तो जीवति तस्य पुत्रः। एषां च कुर्यात्स्वपितास्वयं च तेषां हि कुर्यादिति शास्त्रसिद्धं॥
यदा जीवपिता वा नांदिश्राद्धं कुर्याद्विधानतः। पितुर्महादीनां एष धर्मः सनातनः। मातुः
श्राद्धं तु पूर्वं स्यात् पितृणां तदनंतरं। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं। एकैक
स्मिन्दिने श्राद्धमेकैकं वृद्धिसंज्ञकं। शुभार्थी विधिवत् कुर्याद्दैककस्मिन्नपि वा दिने। हे
माद्रौ। नांदिमुख्ये विवाहे च प्रपितामहपूर्वकं। अथ पादप्रक्षालनविधिः। अप्रा
वाहे दक्षे स्नानं विप्रपादाभिषेचनं। रवेराभिमुखः कुर्यात् संध्यावंदनमेव च। अत्र
विशेषः॥ नांदिश्राद्धे तु चैव द्वादशानामपि सर्वदा॥ विप्राणां क्षालयेत् पादौ प्राङ्मु
खः स्वप विप्रश्च। विप्राणामुपविष्टानां प्राङ्मुखानां तु सर्वदा। पादौ प्रक्षालयेद्धु

द्दे संविष्टः पसगाननः । न गन्धाद्धे न व श्राद्धे सापिंडप्रेतकर्मसु । निष्ठतः क्षालनं कुर्यादन्यत्रो
पविश्य ऽद्भुवि । श्राद्धपक्षे विवाहे च दीक्षायामागतेसुरौ । तिष्ठतः क्षालनं कुर्यान्त्रिराशाः
पितृयोगेताः । विवाहोत्सवतीर्थेषु श्राद्धे चैव तु सर्वदा । विप्राणामुपविष्टानां पादप्रक्षा
लयेद्द्विजः । अथ विवाहमासानाह । माघफाल्गुनवैशाखज्येष्ठमासाः शुभावहाः ।
विवाहे मार्गशीर्षोपि देवलस्य मते च । पौषोपि मकरस्थेर्के चैत्रे मीनगते रवौ । आषा
ढे मिथुनादित्ये कर्कटः परपीडनं ॥ मीनराशिस्थिते सूर्ये त्रिंशत्तिवासरे यदि । विवा
हः शुभदः प्रोक्तो न तु मेषे कदाचन । यदि रविगतमीने विंशतिवासरे भानभावतिरव
कुदोषश्चैत्रमासे विवाहः । यदि रविगतमेषे चैत्रमासे विवाहः सकलसुखविनाशः
सर्वदा वर्जनीयः । मार्गमासि तथा ज्येष्ठे विवाहं चोपनायनं । ज्येष्ठपुत्रदुहित्रोस्तु
यत्नेन परिवर्जयेत् । न जन्मधिष्ण्ये न च जन्ममासि न जन्मकाले यदि नैव दद्यात् ॥
ज्येष्ठे न मासि प्रथमस्य सूनोस्तथा सुतायाः अपि मंगलानि । तथा ज्योतिः । जन्ममासि

या१

न च जन्मभे तथा नैव जन्मदिवसे पिकारमेत् । आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न तु जा
तु मंगलं । अथ ज्येष्ठत्रयं । ज्येष्ठे न ज्येष्ठयोः कार्यं स्त्र्यान्योः पाणिपीडनं । तयोरेकतरे ज्येष्ठ
ज्येष्ठमासे पि कारयेत् । ज्येष्ठापंचकमाचार्यैस्तज्ज्येष्ठाचतुष्टयं । ज्येष्ठात्रयं निषिद्धं स्या
ज्ज्येष्ठाद्वयं तु मध्यमं । ज्योतिरर्णवे ॥ कन्यावरौ यदि स्यातां माघगर्भसमुद्भवौ । तयोर्
वर्षे ज्येष्ठानक्षत्रं चापि वै यदि । ज्येष्ठमासोपि वै ह्यपि ज्येष्ठापंचकमित्यथ ॥ कुर्याच्च
तु नरो मोहाद्वाद्यस्तु मृत्युर्भवेत्तयोः ॥ ज्येष्ठाचतुष्टयं चैव ज्येष्ठात्रयं मध्यापि वा । निषि
द्धं स्यादथ ज्येष्ठादितयं पञ्चशुभप्रदं भवेत् ॥ अथ वरगुणानाह । ज्योतिःसारे । कुलं
शीलं वपुर्विद्यावयो वित्तं सनाथता । गुणाः सप्त वरे तस्मिन् तस्मै कन्या प्रदीयते । अ
धो मूकः क्रियाहीनो ह्यपस्मारी नपुंसकः । दूरस्थः पतितः कुष्ठी दीर्घरोगी न रोनसः ।
मूकोंधो बधिरस्तब्धः पंगुः कुब्जो नपुंसकः । कुष्ठी रोगी ह्यपस्मारी दशदोषाः प्रकीर्तिताः ।

अथ कन्यागुणानाह। रूपं शीलं कुलं कांतिर्वयो विद्यं सनातथा। यस्याः सप्तगुणा वध्वा वरणुया
तां च बुद्धिमान्॥२॥ इति श्रीनारायणविरचितायां धर्मप्रवृत्तौ गर्भाधानादि पंचदश संस्कारणं॥
अथ सप्तम पंचमयोः सापिंड्यं वर्ण्यते। पिंडेन सह वर्तते स पिंडः। सपिंडस्येदं सापिंड्यं।
तत् द्विविधं। सगोत्रे चान्यगोत्रे च। तत्र सगोत्रे मनुराह। लेपभाजः श्चतुर्थाद्याः सपिंडाः
पिंडभागिनः। पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति। याज्ञवल्क्यः कृतत्राति वि
षय एव तेषां नान्यत्रेति। तातिव्यतिरिक्तेपि सापिंड्यमन्यथोक्तवान्। भाष्यकारः।
संतानं विघतेयस्मात्तत्कन्यायास्य सुतस्य च॥ तत्रैवासप्तमादर्वाक् अन्यगोत्रात्तु जाय
ते। संततिः पुरुषस्यापि स्त्रियो ह्यपि च वा पदि। सापिंड्यं तद्विजानीयाद्दूरबंधो
र्विवाहके। पितृतः सप्तमादर्वाक् मातृतः पंचमादधः। सपिंडता तदभावेन नोद्वह
त्तत्र कन्यकां। तथाचार्याः॥ संतानं विद्यते यस्मात् पूर्वजात् पुरुषात्ततः। तन्मूर्यादेग

॥७१॥

गोद्धीमान् वरं यावत्तां कन्यकां॥ असपिंडां च वरयेत् पितृतः सप्तमात्परं॥ मातृतः पं
चमादूर्ध्वं असमानार्षगोत्रजां॥ यास्तव न्यः॥ मूलगोत्रस्य गोत्रात्तु उद्वहेदष्टमीं॥
अन्यगोत्रा त्वन्यगोत्रां षष्ठीं समुद्वहेत्॥ पंचमात्सप्तमात्पूर्वं कन्या सुद्वहेत्ये यदि।
स्वसारं मातरं विद्धि द्विजः स्यात् गुरुतल्पकः। आचार्यः। सापिंड्यं मुनिभिः प्रोक्तं मा
तृतः पितृतः क्रमात्। तत्सापिंड्यं विजानीयात् कर्मदोषरवासिनो॥ सापिंड्यं प्राकृत
चार्याः संकोच्य पिस पिंडतां। ज्ञातव्यं तद्धि धर्मज्ञैर्नर्मदायास्य दक्षिणे। पंचमी सप्तमी
चैव मातृतः पितृतः तथा॥ तृतीयाच्चातिसमातृतः पंचातीतोतिवेपितुः सं गमहेच
त्वारि मुद्वहेत् कन्यां चतुर्थः पंचमीमपि। पराशरमतात्षष्ठीं पंचमोनतु पंचमी। सप्तमी
पंचमी चैव चतुर्थीं तृतीयामपि। षष्ठी समुद्वहेत् कन्यां पंचमो न तु पंचमी। शंकरः॥
गव्यानामार्षजौ पक्षौ पंचमः पंचमी यदि। विवाहो न तु कर्तव्यः पुनस्त्विक शुभा

७२॥

वहेत्॥ तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि। विवाहयेन्मुनिः प्राह परत्राप्ययमेव हि
सा॥ शाकलः॥ एवैषां पूर्वजा स्त्री त्रौ पितरोरपि च संगतिः। पंचमः पंचमी कन्या न तत्र व
रयेद्द्विजः॥ कन्येह पूर्वजा स्याता संततिः स्यान्नयोरपि॥ पंचमः पंचमी तत्र वरः कन्
यां समुद्वहेत्। कन्यापुत्रौ न संभूतौ पूर्वजा संततिस्तयोः॥ यदि स्याद्वरयेत्तत्र
पंचमः पंचमी च हि॥ आचार्यः॥ कन्यावरस्य सापिंड्यं मातृसंज्ञा भवेद्यदि। स्वसृसं
ज्ञाथवा पुत्री नैव तां वरयेद्बुधः॥ हेमाद्रौ चतुर्थीं पंचमीं वापि षष्ठीं वा मातृसंततिकां।
स्वसृसंज्ञां चैव पुत्रीसंज्ञां तां परिवर्जयेत्॥ तथा च हेमाद्रौ। यत्नोक्तः सापिंड्यनिव
त्तिपूर्वं तत्रैव कन्या यदि मातृसंज्ञा॥ पुत्री यदि स्याद्भगिनी यदि स्यात्तदा विवाहे न
कदाचिदेव। पुत्री विवाहे कदाचनाहुः॥ पुत्रिकां समुद्वहेद्द्विजः। केचिदेवं वदंति हि। भगि
नीं मातरं चैव परिवेत्तुः पतितो भवेत्। आचार्यः॥ धात्रीं पुत्रीं स्वसारं च नैव तां च ॥ ७२॥

पं

रयेद्द्विजः॥ केचिदाहुः क्वचिद्देशे पुत्रिकामुद्वहेद्द्विजः। तृतीयां वा चतुर्थीं वा मातृपितृ
तः॥ दक्षिणेनुद्वहेत्कन्यां स्वसारं मातरं विना॥ जननीं भगिनीं चैव पुत्रिसंज्ञां च क
न्यकां। नैव तां वरयेद्विप्रो गालवो मुनिरब्रवीत्। तथा च व्याघ्रपादः। उद्वहेद्दक्षिणे
विप्रान् मातुलस्य चैव सुतां उद्वहेन्नोत्तरे विप्रो ह्येष धर्मः सनातनः॥ आचार्यः॥
मातुलस्य सुतां विप्रो दक्षिणे तां समुद्वहेत्। वर्जनीया प्रयत्नेन सैव वाजसनेयि
तथा च स्मृतिः॥ मातुलस्य सुतां केचित् केचित् पैतृष्वसुः सुतां। विवाहे तां क्वचिद्देशे
संकीर्णापि सपिंडितां। असपिंडेपि केचित्तु नेच्छमाह। पितृव्यभार्याभगिनीं च त
त्सुतां सपत्नमातुर्भगिनीं च तत्सुतां। नैवोद्वहेत्तां यदि चेत्प्रमादाच्चांडालयोनिं प्र
वकारणं भवेत्। पितृव्यभार्याभगिनीं तत्सुत्रीं च परित्यजेत्। सापत्न्यभार्याभ
गिनीं तत्सुत्रीं च परित्यजेत्। तथा चापस्तंब चतुर्णां च स्वमह संबंध भगिनी॥

नतयोरुद्वाहः तत्कन्या सा कन्या भगिनी भवेत्। सावित्री यस्य यो दद्यात्तत्कन्यां नाविवा
हयेत्। तत्रो होमतत्कुले वापि विवाहो नैव दोषभवेत्। गोत्रं त्वान्तरं विषयमाह। वाजसने
यी। समानप्रवरो पित्रो मातृगोत्रे वयस्य च। विवाहो नैव कर्तव्यः सा कन्या भोगिनी भ
वेत्। पैत्रे प्रवर भिन्नत्वं चिंतनीयं न मातृके। कुलं मातृकं गोत्रं वर्जं कात्यायनो ऽब्रवीत
गोत्रं मातुलपुत्राय वर्जयेत् प्रवरान्न तु। सपुत्राया सुतगोत्रं प्रवरांश्च न चिंतये
त्। अथ गोत्रनिर्णयः। भृगवंगिरः कश्यपात्रिवसिष्ठागस्त्यगाधिजाः। सप्त
र्षयस्तेभ्यो गणो अष्टादश भवेत्। भृगोः पंचगणा पूर्वमष्टावंगिरसो गणाः।
अत्रेश्चैकगालिन इत्यष्टादशात्र गणाः। जामदग्न्यो वीतहव्यस्तथा गृत्समदाभिधः
व्याघ्रपाद्विश्ववस्य ष्टगो पंचगणाः स्मृताः। जामदग्न्यवत्साश्च श्रीवत्सा वत्सा इति
नो मांडव्य मांडूक मांडूक्यैमथ्यायनाः। वैरोहित श्च वाल्मीकिः पाणिनी जमदग्निकः। म

विद्रोनार्ष्टिषेणौ च रूक्षो बिदश्च अपि। प्राचीनयोग्य वैदाघा जामदग्न्यगणर्षयः। अ
स्यादितो दत्तो द्वयानां त्रि पंच त्रिप्रवरा अमी। भार्गव च्यावनाप्नवानौर्व जामदग्न्येति
पंचप्रवराः। शुद्धजामदग्न्यस्य त्रिप्रवराः। भार्गव च्यावनाप्नवानेति। क्रूष्टिषेणा
र्ष्टिषेणयोः पंचप्रवराः। भार्गच्यावनाप्नवानार्ष्टिषेणानूपा इति। विदादीनां पंचप्रव
राः। भार्गवच्यावनाप्नवानौर्व बैदा इति। एवं च नु थौ प्रवरैर्द्वित्र्याप्येको गणो यं।
प्रवरक्यं भिसाम्येन मिथोमी विवाहिनः। इति जामदग्न्यगणाः। वीतव्यं च पस्क श्च वा
वधूलो मौनमौक्ष सौ। शार्करा क्षि श्च सार्ष्टिश्च त्तालंकायनजै मिनी। जीवसायन आश्वा
बालिसावालिश्च गणर्षयः। वीतहव्यादयः सर्वस्युस्त्रिप्रवरा अमी। भार्गव वैतहव्य
सावेदसा इति। एतदेव र्गका रमिथो मी न विवाहिनः। उभौ गार्त्समदस्यैतौ रतीया गणा
व्यतौ। अनयोः प्रवराः। भार्गव गार्त्समदशौनका इति। एवं प्रवर साम्येन मिथो ऽमी विवा
हिनः। अथ वैन्यश्च पार्थश्च पंचमो गणरध्यने। प्रवरा भार्गवो वैन्य पार्थ इत्येव ते त्रयः।

एते ष्वेवं प्रकारकामिथो। मीन विवाहिनः। मिथो विवाह्याः पंचैते स्मृताभार्गव माहृदं।
जामदग्न्या दयः पंच मिथो गास्त्या मिदं विना। अथांगिरो गणः। गौतमो भारद्वाजः कपिः
कण्वोथ मुद्गलाः। विरूपो हारितो विष्णुवृद्धस्यो वाष्मो मतः। तत्रास्योचिमिथ्योत्रि पा
जकक्षीवदीर्घतामसाः। वामदेवो बार्हद्युक्थ्यो गौतमस्य गणर्षयः। आपद्व त्रिप्रव
राः पंचप्रवरोत्तिमः। तथाहि। अंगिरसायास्य गौतमा इति। अंगिरस गौतम मोचि
थ्या इति। अंगिरस गौतमौशिजा इति। अंगिरस गौतम काक्षीवता। आंगिरस गौत
म दैर्घतमसा इति। आंगिरस गौतम वामदेवा इति। आंगिरस गौतमोचिथ्योशिजबा
र्हद्युक्थ्या इति। प्रवरद्व्यर्षिसाम्येन पप्यो मीन विवाहिनः। अथ भारद्वाज गणः। भरद्वाजो
थ कुक्षोमि वैश्य औजो पनिस्तथा। सर्वस्तंबः स्तंबराद्वः स्तंबाश्चापि कलस्तथा। रौ
२८ गाक्षो शिशिरिक्षिलनक्षो बाहस्पि। तथा मीनवचा गार्ग्यः कपिः कपिलस्तपि। एते
सप्तदशाख्याता भारद्वाज गणर्षयः। अत्रादितः कथितानां प्रवरा स्मि प्रकीर्तिताः। आंगिर

स बार्हस्पत्य भारद्वाजा इति॥ शौंगशैशिरि भिरक्षिलाः पंचप्रवराः॥ आंगिरस बा
र्हस्पत्य भारद्वाज कात्यकीला इति॥ नक्षादीनां पंचप्रवराः॥ आंगिरस बार्हस्पत्य
भारद्वाज सैन्य गार्ग्या इति॥ प्रवरद्व्यर्षिसाम्येन मिथोऽमी न विवाहिनः॥ अ
थ कपिगणः॥ गौतमादिवदेवायं गणः पुत्राष्टकान्विताः॥ अतो गार्ग्यः क
पेर्भेदस्त्वातंत्र्येण विशेषतः॥ भरद्वाजैः सहातोस्य विवाहोंगीकृतो खिलैः॥ गा
र्ग्यं स्वं स्वं विहायाथ विवाहः शुभदो भवेत्॥ तथाचोक्तं स्मृत्यर्थसारे॥ कपिप्रासिद्धा
युदि। तावहद्वौ स्वतंत्र एकोस्य परोस्वतंत्रः॥ तत्रस्वतंत्रस्य कवेर्विवाहं भि
यो भरद्वाज कुले न चाहुरिति॥ ग्रंथांतरेप्ययमर्थः॥ प्रकारांतरेण दर्शितः॥
तत्र कातिचिद्गरद्वानभिधायोक्तं॥ नालः परेषां हरितादयस्ताम्मिथो वि
वाहस्तु कपीनयास्येति॥ अविवाहेभ्यः पर्युवैदस्थानानां कपीनां विवा
हास्तीस्युक्तं भवति॥ आश्वलायनगृह्यपरिशिष्टे तुस्पष्टतेष्वाभारद्वाजेषु कपी

७५॥

शापि॥ भरद्वाजकुलेषु यां चिद्विवाहममिधायोक्तं॥ एतेषां तु विशेषोपमहा
र्षभिधायनैः॥ अलक्षयेश्च कपिभिर्विवाहस्त्रिभिरिष्यते॥ अयं कपिस्त्रिःप्र
वरकः॥ आंगिरसामहिच्चयोरुक्षा इति॥ अत्र कपिभिरिति बहुवचनं तत्पुत्रा
भिप्रायेण॥ तेचाप्युक्ताः॥ यरस्थिति तरस्थापि पिविंदुराच्चूः पतंजलिः॥ भूयसि
धारिणि कृश्चैव जलंधरेति चाश्टधा॥ कपिपुत्राः समाख्याता स्तेषां कपि वेद
ष्यते॥ कपिवादित्यनेन एतेषां भारद्वाजकुले विवाह सिद्धिरित्युक्तं॥ कपि
पुत्रत्वोक्त्या मिथो मीनाविवाहिनः॥ इत्युक्तं॥ अत्र प्रयोगपारिजाते तु॥ भ
रद्वाजगणस्यापि तथा कपिगणस्य च॥ विवाहो न विधेयः स्यादन्योन्यं
न कदाचनेपि॥ अथ कण्वगणः॥ आंगिरसाजासमीढः॥ कण्वाश्चा
पित्रयोः समी॥ मिथो विवाहं नार्हंति समानः प्रवरा यतः॥ केचित्प्रवरानन्या
नेवाहुः॥ आंगिरसा घोर कण्वा इति॥ अथ मुद्गलाः॥ मुद्गलश्च त्रिवेदी च ताक्ष्यों
आर्ष्टिषेणवच॥ मौद्गल्यश्चेति पंचैते मुद्गलस्य गणर्षयः॥ एतेषां त्रि ॥ ७५॥

द्रा

प्रवराः। आंगिरसभार्म्यश्वमौद्गल्या इति। प्रवरैक्ये न पंचापि मिथो
मीनविवाहिनः। अथ विरूपः। विरूपः पृषदश्वपार्श्वदश्वोरथीतरः। आंग
ष्टाश्च षडेते स्याद्विरूपस्य गणर्षयः। एतेषां त्रिप्रवराः। आंगिरस पार्श्वदश्व
वैरूप्या इति। एतदेवं प्रवरका मिथो मीनविवाहिनः। अथ हारिताः। हारीत
श्चांबरीषश्च मांधाता यौवनाश्वकः। कौत्सः पैंग्यः शंखदर्भौ तातो हैमगवाविं
दः। कौमारश्चदशैते हारितस्य गणर्षयः। एतेषां त्रिप्रवराः। आंगिरसांब
रीष हारिता इति। आंगिरसांबरीषयौवनाश्वा इति द्विधा। तुल्यैकप्रवरत्वेन
मिथो मीन विवाहितः। अथ विष्णुवृद्धाः। विष्णुवृद्धः शठमठमत्रानाश्चाष्ट
भ्रणाः। नीतुंनिर्मद्गण्येकाम्यारुणिः सात्यकिरिस्यपिच्चतुर्दशैते विख्याता
विष्णुवृद्धगणर्षयः। एतेषां त्रयः प्रवराः आंगिरस विष्णुवृद्ध बादरायणा इ
ति। आंगिरसपौरकुत्सेच त्रसदस्या इति। तुल्यैकप्रवरत्वेन मीथो मीनविवा
हिनः। इत्यांगिर प्रवरगणः॥

धर्मदमोरेभः शांडिलश्च सौनातिमर्भिगृदिसलधा॥ धन्वंतरिः शांडिलश्च देवलः कश्यपा अमी॥

॥७६॥

अत्रानिषिद्धमाह। दंचातां त्रिसामान्याद् विवाह त्रिषु द्वयोः। भृग्वंगिरोग
णे ष्वेवं शेषेष्वेकोपि वारयेत्। शेषेष्विति कश्यपादिस्वर्थः॥ अथ कश्यपः।
कश्यपः काश्यपावत्सारासितौ निध्रुवस्तथा॥ वैश्वांपायनभृत्तां शुरुमेधो
निध्रुवा अमी॥ कश्यपादीनां त्रिः प्रवराः। काश्यपावत्सारासिता इति॥ नि
ध्रुवादीनां त्रिः प्रवराः। काश्यपावत्सारनैध्रुवा इति। रेभादीनां त्रिः प्र
वराः॥ काश्यपावत्साररैभ्या इति॥ प्रवरद्व्यार्षिसाम्येन मिथो मी
न विवाहिनः॥ अथात्रिगणः। आद्योत्रिः प्रथमस्तित्वास्ति दत्तश्चंद्र
पर्वादिनः॥ आत्रेयावामरथ्याश्च गविष्ठिरसमाह्वयः॥ पौर्वातिथ्यौ
तिथिश्चापि वंकुतं कथं जयो॥ सुमंगलो बीजवापि सोमा गर्भ्याश्च त्रि
यं स्नाताः। अथादिवामरथ्यानां त्रिः प्रवराः भवंति॥ आत्रेयार्चनान
सश्यावाश्वा इति॥ अत्रिवत्कृतगणयोः॥ प्रवरे क्यापि भिन्नशब्दा ध्याय

॥७६॥

नाह्लेद इत्युक्तिः। सुमंगलानां त्रिः प्रवराः। आत्रेयसुमंगलश्यावाश्वा इति।
आद्येथेरपिभेदेन मिथो मी न विवाहिनः॥ अथ वसिष्ठगणः। आद्यो व
शिष्ठो वासिष्ठ उपमन्युरतः परं। आरभेद्वसुरूपें देप्रमदश्च पराश
रः। पराशरो व्यासदृक्तिः कुंडिनो गण इत्यपि। सांख्यायनो जातूक
र्ण्यः कौंडिन्यश्च ततः परं। मैत्रावरुणिरित्येते वसिष्ठस्य ग
णर्षयः। आद्यस्य प्रवरे कः स्यान्नतस्तु प्रवरास्त्रयः। तत्र व
शिष्ठस्यैकमेकप्रवरः। वशिष्ठानां त्रिः प्रवराः। वशिष्ठशक्तिः प
राशर्या इति। कुंडिनादीनां त्रिः प्रवराः। वाशिष्ठमैत्रावरुणिकौं
डिन्या इति। प्रवरद्व्यार्षिसाम्येन मिथो मी विवाहिनः॥ अथाग
स्त्यगणः। अगस्तिश्च तपागस्त्यो दीर्घच्युत इति त्रयः। इध्मवा

दी

हः सोमवाहः सारवारस्त्रयोप्यमी॥ प्रवरांतविरूल्येन मिथो मीन विराहि
नः॥ आत्रकेचिदाक्षिपंति। एकगर्भसमुत्पन्ना एकत्वे नाम स्वसंभवे।
मैत्रावरुण्योरनयोर्गणभेदः कथं भवेदिति॥ अत्रोच्यते॥ द्वयो
रेवचयोत्पत्तिर्नैकजातस्य साधनं॥ समानसमयोत्पत्तेर्नो मैक्य
मविचारत॥ मैत्रावरुणयोस्त्वेके भेदादैक्यं कथं भवेत्॥ प्रसू
तिग्रहन कुंभप्राणशून्योन कारणं॥ पतित्वाभागभेदेन नतयो
रेतसोर्द्वयोः॥ पृथगेव समुत्पन्नो भिन्नाविति समंजसं॥ अथ वि
श्वामित्र गणः॥ विश्वामित्रो देवरातश्चाधितो गालवो मनुः॥ तन्सोल
पूलिखिल्यो याज्ञवल्क्यश्च कौशिकः॥ उल्को बृहदग्निश्च

घृ म्नः शालावलस्तथा। शालंकायन शालाक्षस्तथा शालावतौ दरो॥ औ
मतो दैवतरसः कामकायन संज्ञकः॥ देवश्रवाश्वाथ धनं धनधानंज
यावुभौ॥ मधुच्छंदा अजाश्वा जारो हिणो रौहिणाष्टकः॥ लोहितः पूर
णः पारिधायश्चयपारणौ॥ कृतोरो क्षपूकात्सोच सप्तील श्वा घ
मर्षणः॥ सनुः पनस धम्नोचवा वग्यौज्जिठरस्तथा॥ एकहव्याभिवे
रपश्च शालंकापन संज्ञकः॥ नाराक्षो लोहिताक्षश्च जनुश्चापीड
यो शिकः॥ घल कौशिक इत्येते विश्वामित्र गणर्षयः॥ प्रवराश्चाप
एवोक्ता विश्वामित्रगणस्य तु॥ विश्वामित्र देवरातानां त्रिः प्रवराः॥
विश्वामित्र देवरातौदम इति॥ श्रौमता दिचतुर्णां त्रिः प्रवराः। विश्वामित्र दे

श्रीसरस्व

॥ ७४ ॥

विश्वामित्रदेवरातदेवलाइति ॥ धनंजयादिचतुर्णांत्रिप्रवराः
विश्वामित्रमाधुछंदसाध्याइति ॥ रोहिणादीनांत्रिःप्रवराः विश्वा
मित्ररोहिणाष्टकाइति ॥ अष्टकादिषत्रिःप्रवराः विश्वामित्र
ष्टकपूरणाइति ॥ कृतादिचतुर्णांत्रिप्रवराः विश्वामित्रकात्यकी
लाइति ॥ अघमर्षणानांत्रिःप्रवराः विश्वामित्राघमर्षणापि
देयाइति ॥ सालंकायनादिषणांत्रिःप्रवराः विश्वामित्रसालंका
यनकौशिकाइति ॥ इतिविश्वामित्रगणप्रकरणं ॥ एकएव
ऋषिर्यावत्प्रवरेष्वनुवर्ततेतावत्समानगोत्रत्वमन्यत्रभृग्वंगि
घ रोगणातएवमुक्तौभेदेगणेभ्यश्चाद्द्वाभ्यांचाद्द्वाभ्यपि ॥ सामान्ये
नोद्वहेत्प्राप्तसोमविरोधात्रनिगद्यते ॥ भार्गवांगिरसादीनां ॥ ७८ ॥

श्रीगजानन

घ

स्वगणादनुप्रवर्तितः ॥ स्वगोत्रसमत्वस्तेषांनोद्वहेत्तेष्वपिचेतो
अन्येस्वंस्वंगणंहित्वाविवाहेतुगणांतरे ॥ गणांतरेपितुल्याख्यानां
द्वहेयुःपरस्परं ॥ प्रदर्शयामस्तुल्याख्यान्गणभेदव्यवस्थितान्
स्वतंत्रश्चास्वतंत्रश्चद्वौकपीगणभेदनः ॥ कवाक्षीलोपरद्वाजे
विश्वामित्रगणद्वये ॥ विश्वामित्रावेतद्व्यशालंकायनइष्यते ॥
विश्वामित्रात्रिगणयोर्विद्यतेचधनंजयः ॥ विश्वामित्रेणांगणा
भारद्वाजस्यकेशिनः ॥ अतोयंद्विप्रवचनेनोद्वहेत्तद्गणद्वये
संकृतिःकृतिमाषश्चन्क्षौबुर्गौबगवस्तथा ॥ शौडिवेव्याघ्रपादश्चभ
रद्वाजकुलोद्भवाः ॥ क्रयक्रीतावशिष्ठेननोद्वास्यास्तद्गणद्वये ॥
जामदग्न्यैर्देवरातोविश्वामित्रकुलेर्पितः ॥ तत्पुत्रतयानेषवि
वाह्यस्तद्गणद्वये ॥ काश्यपेनवशिष्ठेनक्रीतागौतमवंशजाः ॥
आत्रेयाःषिल्लीकुलिस्मातिराजचारिस्तपेवन्च ॥ तेरजःक्षीरजा

॥७९॥

बाहुःसैरध्रिराजन्यकाः॥ स्वाशुचिस्यापुलिंगाश्वलाकाक्षीनादंद
बकाः॥ त्रयोदशैते ऋषयः समस्वाम्याश्च मुनीकृताः॥ रात्रौ मम तको
कालितथैवैतेव्यवस्थिताः॥ अतो गणत्रयेप्येते न विवाह्याः कथं
न च॥ एवं निर्मितमुद्वाहं परिसर्व्यप्रायदि॥ तथा च समजंतरका
र॥ जमदग्निगणस्यापि विश्वामित्रगणस्य च॥ कतत्रो निरि
अंगेभ्य नान्योन्यं पाणिपिडनं॥ कश्यपस्य गणस्यापि वसिष्ठ
स्य गणस्य च॥ संकृतिरुतमाषाभ्यां विवाहो न परस्परं॥ अत्रे
यस्य गणस्यापि विश्वामित्रगणस्य च॥ धनंजयाख्य गोत्रे
णनान्योन्यं पानिपिडनं॥ भरद्वाजगणस्यापि तथा कपिग
णस्य च॥ विवाहो न विधेयस्यादिसेवमुनमो ब्रूवन्॥ मौद्
ल्यस्य गणस्यापि विरूपस्य गणस्य च॥ परस्परं न कुर्वीत पा ॥७९॥

णिपिडनसत्क्रियां॥ द्व्यामुष्यायणकाः सर्वे दत्तवक्रीतकादयः॥
गोत्रद्वयपितोद्वाहस्यः अंगत्रो निरायोर्यथा॥ आचार्यः॥ द्व्यामु
ष्यायणकस्येव नोद्वाहो गोत्रयोर्द्वयोः॥ तस्य पसस्य तजन्म
गोत्रमेव विदुर्बुधाः॥ गुरोः सगोत्रप्रवरा नोद्वाह्याः क्षत्रवै
श्ययोः॥ सगोत्रोस्य न क्षिद्रोश्च विप्रेराचार्यगोत्रजाः॥ असंप्र
ज्ञात बंधूनामाचार्यप्रवरास्मृताः॥ पश्चात्ता स्मिन्विवाहेपि
सगोत्रैः सह नेष्यते॥ आज्ञानादथवाज्ञानाद्यस्तु वै यदि चो
द्वहेत्॥ समानप्रवरां कन्यां मातृवत्परिपालयेत्॥ तथा च॥
समानप्रवरां कन्यां सपिंडां चैव गोत्रजां॥ नैव तां वरयेत्प्राज्ञो
मातृवत्परिपालयेत्॥ इति श्रीनारायणविरचितायां सं
प्रवृत्तौ गोत्रप्रवरनिर्णयप्रकरणं॥ ॥५॥ श्रीकृष्णार्पणमस्तु॥

॥७८॥

॥८०॥ अथजीवत्पितृकश्राद्धविधिः॥ आमश्राद्धंगयाश्राद्धंश्राद्धंचापर
पक्षिकं॥ नजीवत्पितृकःकुर्यात्तिलैःकृष्णैश्चतर्पणं॥ नजीवत्पि
तृकःकुर्यान्मुंडनंतैलपिंडंचयत्॥ महालयंगयाश्राद्धंश्राद्धंचपि
पितृतर्पणं॥ श्राद्धादिकंयदाकर्तुमशक्तश्चेत्पितायदि॥ तदा
पुत्रेणकर्तव्यमवश्यंपितुराज्ञया॥ पाराशरः॥ विद्यमानेपि
पितरिश्राद्धंकर्तुमुपस्थितः॥ पितृवत्पितृपित्रादेःकुर्याच्छ्रा
द्धमत्रांसयः॥ तथाच॥ वृद्धेचतीर्थसंन्यस्तेतातेचपतितेस
ति॥ एभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः॥ उद्वाहेपुत्र
जननेपुत्रेष्ट्यांसोमकेमखे॥ तीर्थेब्राह्मणआयातेषडेतेजी
वतःपितुः॥ गृह्यपरिशिष्टे॥ अन्वष्टक्यंगयाप्राप्तेमासस्यांच
त्रमृतेन्हनि॥ मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति॥ अ
न्वष्टक्यप्रतिप्रेतपक्षनवमीश्राद्धमित्यर्थः॥ नजीवत्पितृकःकु ॥८०॥

र्याच्छ्राद्धंमातुःक्षयादृते॥ ऋतेतुनवमीश्राद्धान्मृतेतच्चहिलुप्यते॥ तथाचगो
भिलः॥ जीवमानःपितायस्यमाताचम्रियतेयदि॥ प्रेतपक्षेनवम्यांतुमातुः
श्राद्धंविधीयते॥ माहालयेनवम्यांचश्राद्धंमातुर्मृतेहनि॥ कुर्यात्सपिंडवि
धानेनपितर्यपिचजीवति॥ तावत्स्यान्नवमीश्राद्धंयावद्वर्त्ततेपिता॥
तदवलुप्यतेश्राद्धंमृतश्चेद्यदिवैपिता॥ सुवासिन्यांमृतायांचयच्छ्राद्धं
प्रतिवत्सरं॥ सुवासिन्यैप्रदातव्यंब्राह्मणैःसहभोजनं॥ अथसापत्नमातृ
तविशेषः॥ सारावल्यां॥ एकभर्तृकपत्नीनामपुत्रानिधनंगता॥ अन्य
स्याःपुत्रस्त्वपिकर्ताभर्तैवितत्रतु॥ अत्रकेचिद्विशेषमाहुः॥ सापत्नज
नीयस्यपित्रोश्चजीवतोर्मृता॥ अपुत्रायदिसाचापितस्याःकार्याक
यंक्रिया॥ मनुः॥ सर्वासामेकपत्नीनामेकाचेत्पुत्रिणीभवेत्॥ सर्वा
स्तास्तेनपुत्रेणपुत्रिण्योमनुरब्रवीत्॥ एकैवपुत्रिणीतासुस्वपु
त्रानिधनंगता॥ तस्याःक्रियादिकंकेनकर्तव्यंपतमध्यिकं॥ एकै
नेवतुकर्तव्यंज्येष्ठपत्नीसुतेनच॥ जन्मज्येष्ठेनयामातुःसपत्न्या

॥८९॥

अपि कर्म यतः ॥ तस्यासौ व पनं पुत्रः पित्रोस्तु जीवतोरपि ॥ साप
त्नमातुः कुर्वीत पैतृमेधिककर्म च ॥ चकारात्सपितिसांवत्सरीमं
पि कुर्यादित्यादि सर्थे ॥ मृतामातरि जीवत्यां सापत्नजननीय
दि ॥ पितामह्यादिभिः कुर्यात्सपिंडनं तु तर्पणं ॥ अथ बहुपत्नी
कपुत्रपितृविषयं ॥ एकैषां पतीनां सर्वासां संततिये सुतः ॥
पितुर्मरणकाले तु ज्येष्ठपत्नीसुतोग्रजः ॥ अथ कर्माधिका
रिणः ॥ पुत्रानाह ॥ याज्ञवल्क्यः ॥ औरसो धर्मपत्नीजस्तत्स
मः पुत्रिकासुतः ॥ क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ गृ
हे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ॥ कानीनः कन्यकाजातो
मातामहसुतः स्मृतः ॥ अक्षतायां क्षतायां वा जातः पौनर्भवस्
तः ॥ दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥ क्रीतश्च ता

॥८९॥

भ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः ॥ दत्तात्मा तु स्वयं दत्तो गर्भे
विन्नः सहोढजः ॥ उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः ॥
पिंडदोंशहरश्चैषां पूर्वाभावे परः परः ॥ मनुः ॥ यातिन पितृहिताः
पुत्राः प्रसंगादन्यबीजजाः ॥ यस्य ये बीजतो जातास्तस्य ते ने
तरस्य तु ॥ प्रयोगपारिजाते ॥ ज्येष्ठ एव सुतः कुर्यादविभक्तैः
सहानुजैः ॥ पित्रोर्वार्षिकं श्राद्धमन्येषां न च तैः सह ॥ प्रसंगात्पा
र्वणेन च विधिना क्षेत्रजौरसौ ॥ कुर्वातामितरे कुर्युरेकोद्दिष्टं
सुतादयः ॥ औरसः पार्वणेनैव पित्रोर्वै विधियतः ॥ दत्तपुत्रादि
यः सर्वेप्येकोद्दिष्टविधानतः ॥ द्व्यामुष्यायणका दद्युर्द्वाभ्यां पि
डोदके पृथक् ॥ श्राद्धं कुर्युस्तयोश्चैव पित्रोर्दीक्षा गृहीतयोः ॥ य
स्य या बीजतो जातस्तस्यैव तु पार्वणं स्मृतं ॥ एकोद्दिष्टमथान्यस्य
विधिरेष तु दाहतः ॥ पितुश्चैव गृहीतस्य मातुश्चैव तथैव च ॥

॥८२॥

दत्तः कुर्यात्तयोरेव नान्येषां तु कदाचन ॥ अथान्याधिकारः ॥ पुत्रः पौत्रश्च तज्ज
श्चपुत्रिकापुत्र एव च ॥ पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ॥ भगिनी भा
गिनेयश्च सपिंडोधनतार्यै पि ॥ एतेष्वभिहिताः केचित्स्वचीभावे परः परः ॥

प

अनुनीताधिकारि[illegible] ॥ विश्वरूपे ॥ असंस्कृतेन पुत्रेण पत्न्या वापि समंत्रकं ॥
अग्निदाहं प्रकर्तव्यमन्यत्सर्वं तु कारयेत् ॥ कुर्यादनुपनीतोपि मंत्रवत्सैत्त्व
मेधिकं ॥ यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवार्षिकः ॥ कृत[illegible]चूडस्तु
कुर्वीत उदकं पिंडमेव च ॥ स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेत् ॥
कृतचूडोनुपनीतश्च पित्रोः श्राद्धं समाचरेत् ॥ उदाहरेत्स्वधाकारं न तु वेदा
क्षराण्यसौ ॥ न ह्यस्मिन्युज्यते किंचिद्यावन्मौंजीनिबंधनात् ॥ नाभिव्याहारयेद्ब्रह्म स्वधा
निनयनादृते ॥ स्वधानिनयनं प्रेतकार्यमित्यर्थः ॥ पुत्रेसति निषेधः ॥ पुत्रेषु विद्यमा

स

॥८२॥

ने पुनान्यो वै कारयेत्स्वधां ॥ अनुकल्पोऽपुत्रस्य श्राद्धं कुर्यात्सनाथकं ॥ प्रा नामा
तो भवेद्यत्र तीर्थं वास्य गृहे पिता ॥ प्रेतकार्याणि तत्रैव कुर्यादन्यत्र नैव तु ॥ अपुत्रवि
षये ॥ पत्नी कुर्यादपुत्रस्य पुत्रिकापुत्र एव वा ॥ कनीयान्भ्रात्रजो वाभिपूर्वाभावे
परः परः ॥ अथ वपनविधिः ॥ आचार्यः ॥ निषेधे सत्यपि क्षौरे पित्रोरेव मृतेहनि
नि ॥ वापयेयुः सुताः पित्रोर्मरणश्रवणेपि च ॥ संवर्तः ॥ गंगायां भास्करक्षेत्रे मा
तापित्रोर्मृतेहनि ॥ आधाने यज्ञकाले च षट्सु वै वपनं स्मृतं ॥ मातामह पितृव्या
णां मातुलाग्रजयोर्गुरोः ॥ श्वशुरश्चैव राचार्ययोः स्वामि पत्न्योर्मृतौ पितुः स्वसुः ॥
मातुः स्वसुर्भगिन्याश्च ह्युपाध्यायस्य चैव हि ॥ एषां [illegible] केचिद्बुधाः प्राहुर्मरणे व

प

पनं विधीयते ॥ इति कर्मैकदेशविषयं ॥ तथा च धौम्यः ॥ निमित्ता वा विना कापि पि
त्रोस्तु मरणे सुताः ॥ वपनं कुर्युरन्येषां कुर्यात्कर्ता सयोग्यनेत् ॥ प्रथमेह्नि कर्ता ॥
सगोत्रो वा यदि स्त्री यदि वा पुमान् ॥ प्रथमेहनि यो दद्यात्स दशाहं समापयेत् ॥

॥८३॥ ३ विधावां द्वे पि

अस्ति संचयनात्पूर्वं पुत्रो यदि समागतः ॥ तदादि सकलं कर्म पुत्रः कुर्याद्यथाविधि ॥ गदतस्मात्सि
गिनः ॥ स्मृति सारे ॥ दहनं यदि हिताग्नेस्तु कुर्यात्पुत्राग्नि नास्ततः ॥ अनाहिताग्नेर्विधिवद्द
हेदौपासनाग्निना ॥ विधुरं चैव दद्यात्प्रेतं लौकिकाग्निना ॥ यतिप्रसंधौ कपालाग्नौ
तु षाग्नि कौ बील कन्ययोः ॥ आश्वलायनः ॥ आत्मारोपशरीरस्य नष्टेन स्यात्
पावकः ॥ शवदेहे पि नैव दक्षिणः पाणिरर्सिचेत् ॥ लौकिकाग्निं स्त्रियापि च पा
पाणिं पुत्रो जेपसुजेत् ॥ उपानरोतस्योतेतित हमीमग्नेनयेतिस्य ॥ स्याद्द्वादस्या
ग्राह्टलीतनत हमीं तुकुदयाछूतं ॥ तसोस्यास्मपयेतप्रेतमास्यपि कीक्रिया ॥
स्नानं प्रेतस्य पुत्रादि दैवं वीस्वाधेः पूजयेत्ततः ॥ नग्न देहं दहेन्नैव किंचिद्देयं
१८। परित्यजेत् ॥ प्रमादग्निविछित्तिः पत्नी चेत्स्यात्सन्निधौ प्रेतस्य दहनं कुर्यात्कोपं
पुत्रो यथा ... जः ॥ प्रायश्चित्तात् कृतिर्दुसोपक्षते माहृतीरपि ॥ देहे प्रेतं ततः पु
त्रस्तोनैवापासनाग्निना ॥ द्विपत्यसंसृष्टाग्निविधिः ॥ न भवेदग्निसंयोगः मत्स्या ॥८३॥
ज्येष्ठकनिष्ठयोः ॥ ज्येज्येष्ठायदि मृता पूर्वं मग्नि तेत्रैणतां दहेत् ॥ परं वेमे वहिस्य

किष्या भार्या कनिष्ठा यदि वा मृता ॥ निर्मथ्याग्निं दहेत्तेन वन्हिना विधिवच्चतां ॥ भा
र्ययोरग्निसंयोगे जाते ज्येष्ठकनिष्ठयोः ॥ यदि काचिन्मृता भार्या दाहस्तस्याः कथं भवे
त् ॥ संसृष्टाग्निं विभज्याथ दक्षिणोत्तरयोरपि ॥ ज्येष्ठायाद्दक्षिणो भागः कनि
ष्ठायास्तथोत्तरः ॥ वहनीयदिस्तायां ज्येष्ठादागः स्यात्साहुरपि ॥ यस्या एवय
थास्तां ॥ स्वं तं स्वांगं नियोजयेत् ॥ दाहादि कर्म कुर्वीत मंत्रावृत्तिरत्र मेधिकें ॥ प्रथमे ए
नियः पुत्रः सदशाहं समापयेत् ॥ अथ नव श्राद्धानि ॥ प्रथमे न्हि तृतीये न्हि पंचमे
सप्तमे तथा ॥ नवमैकादशे चैव नवश्राद्धं प्रकीर्तितं ॥ यदि रात्रौ मृतस्तस्य समाप्ति द
त्तस्य चेत् ॥ परे हस्सु दिते सूर्ये कार्यो सास्यादकक्रियाः ॥ तिलोदकास्ता तथा
पिंडान्नव श्राद्धानि यानि च ॥ न कुर्याद्रात्रौ संध्यायां यदि स्यान्निःफलं भवेत् ॥
उत्तरीय शिलायां त्रिवारं व्युत्क्रम विपर्यये ॥ पूर्वदत्तांजलिर्दद्यात्सिंगश्चापि त
थैव तु ॥ मध्ये दशैसतिकथं ॥ पित्रोरा ... शौचमध्ये पुत्रादि दशैः समागतः ॥
तावदेवोत्तरं चैतत्पर्यवसा ... शतु रंअंत देशी तेदशीश्चेत्तत्र सर्वं समापये
त् ॥ पित्रोस्तायावदाशौचं दद्यात्पिंडतिलांजलिं ॥ गदशाहमध्ये दशश्चेत्पिं
डदानं तिलोदकं ॥ औरसः प्रसेदद्यान्नच दशौ समापयेत् ॥ प्रागर्द्ध्वे चास्यदा

दत्त ३ २

सुधा २

द्वयोर्द्वशात मध्यमौरसः ॥ पितरौ तु विना न्येषां दर्शे चैव समापयेत् ॥ द्वशात मध्ये य
दि दर्श आ ॥ तद्या द्वशा तैलिले वारि पिंडनं ॥ पुत्री [illegible] दत्तक औरसौ वा इष्टाः सुता
स्तेत्रेस समापये युः ॥ दर्शांत रस्थिते तु त्रै क्रियाः कार्या यथाविधि ॥ निमित्तो वोवि
मसैवीं संयुक्तौ दर्शतनं विना ॥ दशाहाभ्यंतरे पित्रोर्मरणं श्रूयते यदि ॥ पुत्रे पैवाथवान्ये
नमंत्राग्निनैव दग्धयोः ॥ प्रेते राज्ञि तस्मिष्टाः स्युः कर्तव्यं षोडशादिकं ॥ सपिंडीक
रणं चैव यथाकाले समुद्भवं ॥ मंत्राग्निनैव दग्धस्य पिंडदानादिक क्रियाः ॥ न स्र[illegible]ताः
स्युः प्रमादाद्दशाह स्यंते स्ये यदि ॥ अथैवस्मिन्दिने वर्मे यदा के तु मुपक्रमेत ॥ पिंडोदक
क्रियाः कार्याश्च शौचं दत्तनं विना ॥ अथास्थिसंचयनं ॥ कुर्जन्म दाने मुख्येषु येनं दाग्नि
पारभे ॥ पूर्वोत्तरा पश्चात्सोनास्थिसंचयनं चरेत् ॥ त्रिपुष्करं ॥ त्रिपादृक्षं
तिथिवर्क्षप्राजापते वासवे रुग्ररौरवौ मौमेच मुनिभिः प्रोक्तं त्रिपुष्करं
नंदाप्रकाम भूतशो माके यदि जेगुरो ॥ तुक्रमघायां रो तिष्यं पंचके
षु त्रिपादृक्षे ॥ उन त्रयं प्रेत दाहम स्थिसंचयनं तथा ॥ न कुर्याघदि चे
त्तं तं दायेप्रदापयेत ॥ मद्बुतु स्मृविदानं स्याद्धेमदानं त्रिपादृक्षे ॥ नारे त
याद्धदेवसे नासो दानं विधीयते ॥ निमित्तेः पिप्रेते त्राद्धं पेन कार्यं ॥ अनेता चार्याः
निमित्ताबा निमित्तानां कुर्यु श्राद्धमदैवतं ॥ मघासुच्यत तोन्य त्रनाधिरः कृष्ण ॥

सु

पिंच स्तोडश्रा ॥ एकैनेव तु कार्याणि स्त्रविभक्त धनेष्वपि ॥ तथा मनुः ॥ वृषो
सर्गं [illegible] तः कुर्यात्पित्रोश्चैकादशेऽहनि ॥ अवश्यकुष्य कालेतु विधिना [illegible] कोवृ
मुत्सृजेत् ॥ वृषोसर्गं [illegible] पुत्रो मातुः [illegible] कुर्यादेकादशेऽहनि ॥ सहोमं वि
धिवच्चैव पितर्यपिच जीवति ॥ पतिव्रता सपुत्रा या [illegible] वृषा सर्गं समा
चरेत् ॥ इति केचिद्वदंत्यन्येन कार्यमिति केचन ॥ इति वृषोसर्गः ॥ अथ घश्रा
द्धं ॥ मनुः ॥ असपिंडक्रिया कर्म द्विजातेः संस्थितस्य च ॥ अदैवं भोजयेच्छ्रा
द्धं पिंडमेकं च वर्जयेत् ॥ अथ श्राद्धमसुद्धापि कुर्यादेकादशेऽहनि ॥ कुर्तुस्ता का
[illegible] ॥ ब्राह्मणं भोजयेदाद्ये होतव्यमनले पिवा ॥ पुनश्च
विक्रीसुद्धिरसुद्धिः पुनरेव सः ॥ आद्या दिषोडशश्राद्धं कुर्यादेकादशेऽहनि ॥
भोजयेद्द्विजं द्विजाव निर्भवहि हि ॥ अथाश्राद्धं न कुर्वीत मोहदेकादशे
एकोद्दिष्ट विधानेन दैवहीनं तु न प्लवेत् ॥

८५ ॥

हनि ॥ दाहादि सकलं कर्म पुनः कुर्याद्यथाविधि ॥ सपिंडीकरणं यावन्नावत्सादिकमेव हि ॥ विप्रस्यैव विधिः ॥ और्ध्वकार्यं प्रेतक्रियादिकं ॥ छ ॥ छ ॥ छ ॥ अथ सपिंडीकरणं ॥ सपिंडीकरणं कुर्यात्सदैवं द्वादशेऽहनि ॥ तदभावे त्रिपक्षादौ षण्मासे वैकादशे ऽपि वा ॥

रि

मृते पितरि यस्याथ विद्यते च पितामहः ॥ तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः ॥ त्रयाणामपि पिंडानामेकेनापि सपिंडने ॥ पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितिः ॥ पितुः पुत्रेण कर्तव्यं पिंडदानं पुत्रस्य न कदाचन ॥ यदि स्नेहेन वा कुर्यात्सपिंडीकरणं विना ॥ अथान्येऽपि मः ॥ गालवः ॥ अन्यैर्मातामहस्य सापिंड्यं वियोगाद्यैः कारितं ॥ न सापिंड्यं पुनः कुर्याद्युत्क्रमाद्यत्र नास्तु नः ॥ पितामहे जीवति पितामहं तत्र प्रक्रमः ॥ पुत्राभावे ॥ स्नाकलः ॥ पुत्राभावे स्वयं पत्नी स्वभर्तुर्नाममंत्रकं ॥ सपिंडीकरणं कुर्यात्ततः पार्वणमेव च ॥ गालवः ॥ अपुत्रे संस्थिते कन्तीनभार्ये वा कु ॥ ८५ ॥

कर्मणि ॥ तत्र पत्नेद कुर्यात्सापिंडं पार्वणं यथा ॥ पार्वणमिति सर्वत्र ॥ अपुत्रपौत्रे दौहित्रं श्राद्धमित्यर्थः ॥ न्यायचार्याः ॥ अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडतां ॥ स्वस्त्रादिभिः सहैवास्याः सपिंडीकरणं भवेत् ॥ अपुत्रायास्त्रीतः पिंडमन्येषु पिंडेनियोजयेत् ॥ परोक्षो जीवति चेद्यस्याः श्वश्र्वादिषु नियोजयेत् ॥ कालादर्शे ॥ पत्न्याः कुर्यादपुत्रायाः पौत्रैर्मात्रादिभिः सह ॥ सापिंड्यमनुयाने तु जनकेन सहात्मजः ॥ अथानुगमने ॥ बोधायनः ॥ ऊं ॥

यां

पिंडं त्वनुगतायास्तु भर्तृपिंडे नियोजयेत् ॥ प्राक् प्रत्यक् विजने द्वे धा ह्येकैकं विभज्य त्रिधा ॥ प्राग्वगान् पितृन् पिंडेषु संयोज्य विधिनन्नतः ॥ प्रत्यगास्तथा मातृ पिंडेषु च यथाक्रमं ॥ कृते पिंडादिसापिंड्ये मातुः श्राद्धं पृथग्विधा ॥ अथ कोऽपि तथा मातुः पितामह्यादि पितृक्रमात् ॥ अथ ब्रह्मचारिसपिंडीकरणं ॥ आश्वलायनगृह्ये ज्येष्ठेवथं ॥ गोभिलः ॥ ज्येष्ठः सापिंडसपिंडीकरणं क्वचित्कथं स्याद्ब्रह्मचारिणः ॥ वस्वादि पितृरूपेषु योजयेद्ब्रह्मरूपिणं ॥ ४१

८६॥ नं कुर्यात्तु द्वादशाहे नुजैः सह ॥ यद्वा चेत्तु सान्निधिस्थो नुजो पिता ॥ व्या
घ्रः ॥ ज्येष्ठे न वा क ॥ निष्ठेन कृतं चेद्दौरसेन यत्नः ॥ सगुणं स्यात्स पिंडांतम
न्येन कृतमन्यथा ॥ आचार्याः ॥ द ९ र ग्राहा श्चेद्धि पुत्रो मरणं श्रूयते य
दि ॥ कु त्वास्तौ व पवंद्याद्दर्भ मंत्रौ ति लोदकं ॥ नोत्तरीयं पिंडदानं नव श्रा
द्धं ॥ न वे दिवा नैव कुर्याद्धि तिलापात्रं ॥ पूर्णे यस्य सपिंडने ॥ ज्येष्ठो पि हि सुतः
कुर्यात्सपिंडीकरणं पुनः ॥ कृते वा नीयसा वापि श्राद्धे यदि सपिंडने ॥ ज्येष्ठो
पि हि सुतः कुर्यात्सपिंडीकरणं पुनः ॥ सपिंडीकरणं नाम श्राद्धं पार्वणवद्भवेत् ॥
सं अर्घ्य संयोजनं नाम पितृर्घ्ये योजनं नवा ॥ द्वितीयादौ निरर्वा निमासि
कान्यपि कारयेत् ॥ ऊनान्यपि यथा काले संप्रासान्येव कारयेत् ॥ निवर्त्य सप
त्नीभतत्वा र्मिला कालांतरे पिरचेत् ॥ ऊनादीनि च सर्वाणि मासिकान्याब्दिका

॥८६॥

रयेत् ॥ प्रेतकर्मान्तविषयं ॥ अथ सन्निधान पुत्र विषये ॥ शाकलः ॥ पित्रोर्म
रणकाले तु स्वचेत्स्यात्सन्निधौ सुतः ॥ अन्यः कुर्याद्दशाहांतं न तु सर्वं कि
दाचन ॥ तथा च स्मृतिः ॥ देशांतरस्थो पितरौ मृतौ चेदन्यान कुर्यात्सकलं
च पैतृकं ॥ दाहं विना सकलकर्मेति लोदकादि ज्येष्ठस्तु कुर्यादनुजैः सपिंडं
पौत्रिकः ॥ पुत्रं विना स्त्वन्येन दाहादि ● प्रेतकार्यं भि । ~~कृतावं~~ मपुनः ~~कर्म ज्येष्ठ~~
कुर्याद्दौरसो दहनं विना ॥ गोपिलोपि ॥ अन्येन केनचित्सित्रोः कृते पिहि सपिंडने ॥
विना दाहं पुनः कर्म ज्येष्ठः कुर्यात्सहानुजैः ॥ ऊनमासिकं ॥ सपिंडीकरणं श्रा
द्धं कृत्वा स्यादूनमासिकं ॥ नष्टौ चेयेद्दिनं तत्र व्याघ्रस्य वचनं यथा ॥ विधवाया
ह्यपुत्रायाजीवपत्यास्तथैव च ॥ मासिकानि व्रतस्थस्य नैवोर्ध्वं स्यात्सपिंडनात् ॥
व्रतस्थो ब्रह्मचारी स्यात् ॥ त्रिपक्षे द्वादशे पक्षे च तु विंशति पक्षके ॥ पक्षत्रिपंचके
चैव षंयमध्यादिपंचके ॥ तथा च स्मृतिः ॥ ऊनं स्याद्द्वादशाहे तु त्रिपक्षे कादशे

॥८७॥ दिने॥ षष्ठीहि द्वादशेत्रोपक्षे पक्षादो चतुर्विंशके॥ ऊनं त्रिपक्षकं चैवस्यात्
षण्मासिकं तथा॥ पुनाद्यं प्रतिमासीयं कुर्याच्छ्राद्धं निषोडश॥ प्रतिमासे मृता
हनु यावत्संवत्सरं भवेत्॥ तावदेव हि कुर्वीत श्राद्धं मासिकसंज्ञकं॥ सपिंडीकर
णादूर्ध्वं सदैवं पार्वणेन तु॥ मृताहे मासिकं कुर्यात्प्रतिमासं तु वत्सरं॥ अपकर्ष
यतो वर्षी मासिकान्येकवकारयेत्॥ त्रीणी चैवार्घ्यपात्राणि पिंडांस्त्रीन्येव निर्वपे
त्॥ सपिंडीकरणादूर्ध्वं कुर्याच्छ्राद्धं निषोडश॥ [illegible] कास्कन्ये नानिना न्यथा
यं विनैव तु॥ प्रथमाद्दिपि कर्तव्यं॥ [illegible] श्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं॥ प्रथम
थमब्देपि कुर्वीत सपिंडीकरणे कृते॥ नित्यनैमित्यकं श्राद्धं तीर्थश्राद्धादिकं च यत्॥
सपिंडीकरणादूर्ध्वं [illegible] पुत्रः कुर्याद्यथाविधि॥ सपिंडमेकोद्दिष्टं॥ निर्ण
यार्णवे॥ सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते॥ [illegible] गिन्ये पुत्राय स्वामिने मातुलाय
च च॥ ॥८७॥

३४ अजन्मनः॥ मातामहानामप्येकं पार्वणं श्राद्धमाचरेत्॥ एकमातृकपुत्राणामेकश्चेत् ४२ ॥८८॥
मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणं॥ एकोद्दिष्टं कनिष्ठानां ज्येष्ठानां पार्वणं मतं॥ माधवीये॥
एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितं॥ त्रीन्तु उद्दिश्य यच्छ्राद्धं पार्वणं मुनयो विदुः॥ पितृव्यस्य
अपुत्रस्य भ्रातुर्वा [illegible] पुत्रवान् भवेत्॥ सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥ प्र
तिवत्सरं कार्यं मातापित्रोर्मृतेऽहनि॥ पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि॥ सपिंडी
करणादूर्ध्वमेकोद्दिष्टं भवेत्सदा॥ सदैवं [illegible] श्राद्धं पिंडमेकं तु निर्वपेत्॥ इति क
श्चिद्द्वाचारः॥ अथ कर्तुर्नष्टश्राद्धं॥ तत्राह वृद्धशौनकः॥ अव्यवस्थां तेविमृकारव्यं
श्राद्धं प्रथमवत्सरे॥ कुर्यात्पार्वणं तत्रैव व्याघ्रस्य वचनं यथा॥ सांवत्सर विमृका
५ रव्यं अकृत्वा प्रथमाब्दिकं॥ यः श्राद्धं कुरुते मोहात्तेन प्रकुर्मनिःफलं॥ अतका
यौर्द्धिकमित्यर्थः॥ यः करोति विना पुत्रं श्राद्धं [illegible] चैवामुकस्य [illegible]॥ मृतश्च द्यदिकन्नी
६ स्य श्राद्धं लोपो भवेदिह॥ पित्रोः श्राद्धं विनामातुः सपत्न्या अपि लुप्यते॥ तन्नक

कर्तव्यमन्येन ज्येष्ठकर्तरि वैयदि॥ पित्रोः श्राद्धं विनान्येषां न कुर्याच्छ्राद्धमेव हि॥ व
र्त्तीमृतश्च ज्येष्ठः स्यात्कनुजैः कार्यमेव तु॥ पित्रोः श्राद्धं विनान्येषां यदि स्नेहेन पा
र्वणं॥ एकोद्दिष्टं भवेद्वापि पिंडदानं कृतावृतं॥ अथ पितामहश्राद्धं॥ पितामह
श्राद्धं स्यपयच्छ्राद्धं षोडशादि सपिंडनं॥ अपुत्रस्य तु कर्तव्यं पौत्रेण प्रथमाब्दिकं॥
पृथक्प्रत्याब्दिकं तस्य वर्णवर्णेन तद्भवेत्॥ पित्रा सहैव तच्छ्राद्धं वर्संदो भवे
त्पितुः॥ तथा च स्मृतिः॥ पितामहः पितुः पश्चात्संचत्वंयदिगाच्छति॥ पौत्रेण का
दशाहादि कर्तव्यं श्राद्धषोडशं॥ नेतयोः त्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः॥
पितुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकं॥ अथ विभक्तश्राद्धं॥ आनंताचा
र्यः॥ विभक्तास्त्वेकः पृथक् कुर्युः प्रतिसांवत्सरादिकं॥ एकेनैवाविभक्तेषु कृतं स

र्वैस्तु कृतं॥ भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते॥ विभागे सति धर्मोपि भि
द्येत पृथक् पृथक्॥ सर्वैस्तु मतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येनैवाविभक्तेन सर्वै
रेव कृतं भवेत्॥ तथा च स्मृतिः॥ पित्रोः श्राद्धं पृथक् कुर्युः॥ सं॥ अविभक्ताधनेनैव च॥ ए
कत्र ... र्वैरिव पितीलाः स्युः र्नसंशयः॥ अथ विभक्ताः सापत्न्यभ्रातरः कुर्यु
स्तु विभक्ताः पृथक् पृथक्॥ आमावास्यादिकं चैव पितुः प्रत्याब्दिकं विना॥ संग्रहे॥
अविभक्ताः सुताः पित्रोरेकं कुर्युर्मृताहिकं॥ देशांतरे पृथक् कुर्युर्दर्शश्राद्धा
नुमासिकं॥ ग्रामांतरं व्रजेयुश्चेद्विभक्ताः सुता यदि॥ दर्शे मासिकं श्राद्धं कुर्यु
पित्रोः पृथक् पृथक्॥ अथ मृताह विषयं॥ तत्र स्मृतिः॥ अज्ञानाद्वा प्रमादाद्वा ये
मृताहमतिक्रमेत्॥ स्थानया नित्रा तं गत्वा चांडालः स्यात्पुनः पुनः॥ रजस्वला
यां भार्यायां मृताहे यः परित्यजेत्॥ सर्वै नरकमायांति यावदाभूतसंप्लवं॥ तथा च॥

॥८१॥

मृतस्य वाथ कर्तुर्वा भार्या यदि रजस्वला ॥ यो निष्क्रमेन्मृतानां तु रौरवं नरकं व्रज
त् ॥ आब्दिके समनुप्राप्ते यस्य भार्या रजस्वला ॥ पंचमेहनि तं श्राद्धं तत्कुर्यान्नि
तोहन्नीयेन तु भार्याविकृती चेत द्विषयं स्मृतिः ॥ आपुत्राय द्विभार्यासं प्राप्ते भर्तुरा
ब्दिके ॥ रजस्वला भवेच्छ्राद्धं कुर्यात्तत्पंचमेहनि ॥ अन्यथा नोद्धृ ॥ सपिंडमासिकं चै
व ह्यमावास्यादिकं यत् ॥ अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वला ॥ अपत्नी
कः प्रवासी च यस्य भार्या रजस्वला ॥ सिद्धान्नेनैव कर्तव्यं पित्रोः प्रत्याब्दिकं दिके ॥ श्रा
द्धविघ्ने द्विजातीनां आमश्राद्धं प्रकीर्तितं ॥ आमावास्यादि नियतं माससंवत्सरादृते ॥
अथामश्राद्धं ॥ आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि ॥ आमश्राद्धं द्विजः कुर्यात् स्त्रि
प्रतिसाब्दिकं विना ॥ तीर्थे नग्नौ प्रवासे च श्राद्धमन्नेन कारयेत् ॥ आमावास्यादिकं चैव
व चिद्वृवं वदंति हि ॥ सिद्धान्नेन तु विधिर्यः स्यादामश्राद्धे प्ययं विधिः ॥ आवाहनादि सर्वं
स्या सिंडदानं तथैव च ॥ यद्धा श्राद्धे जातिस्यः क्रतं वा श्रौतमेव च ननाम्नोकरणं कुर्या

श्रा ॥८१॥

त् पिंडस्थाने तु निर्वपेत् ॥ अनारभ्यं भोजनांगं च यत्कर्म विकिरं तथा ॥ उच्छिष्टभागि
नां भागमामश्राद्धे विवर्जयेत् ॥ स्मृत्यंतरे ॥ आमश्राद्धं यदा कुर्यात् पिंडदानं कथं भवेत् ॥
गृह्यपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ॥ अथ हिरण्यश्राद्धं ॥ अन्नाभावे द्विजः
कुर्यादामश्राद्धं मामेन वै यतः ॥ तदभावे हिरण्येन सदैवं पार्वणे न तु ॥ अन्नाद्वि
गुणमामं स्याद्धिरण्यं स्याच्चतुर्गुणं ॥ द्रव्याभावे प्रवातस्य पर्याप्तं वापि कारयेत् ॥
अथ विधिः ॥ संकल्पं सूक्तपठनं द्विजनेमास्तथैव च ॥ भाजनाच्छादनं चैव
द्यखो वरणमेव च ॥ आवाहनार्घ्य विकिरं प्रदक्षिणं पितृस्तुतिं ॥ वि
सर्जनाच्छादने च हेमश्राद्धे विवर्जयेत् ॥ अथैकस्मिन् दिने श्राद्धानि ॥
एककालिंगतानां तु बहूनामथवा द्वयोः ॥ तंत्रेण श्रपणं कुर्याच्छ्राद्धं चैव पृथक्
पृथक् ॥ भवेद्यदि सपिंडानां युगपन्मरणं तदा ॥ संबंधी क्रममालोच्य तत्क्र
माच्छ्राद्धमाचरेत् ॥ मृता पूर्वं पिता स्याद्दो द्वितीयस्य सुतः पुनः ॥ कुर्यात्स

॥ १० ॥

श्चान्हतीयस्य सन्निपाते द्वयं क्रमः ॥ अशक्त विषये उक्तमेतत् ॥ ननु श्चान्तवि
षये ॥ श्राद्ध द्वयं न कुर्वीत पाके नैके न कश्चन ॥ यदि यः कुरुते मोहात् श्राद्ध
तस्य वृथा भवेत् ॥ शक्तोसत्सां पृथक् कुर्यात् पृथक् पाकेन वै क्रमात् ॥ नि
वर्त्यै किं पुनः कुर्याद् दार्चयिता वा भवेत् ॥ पित्रोः श्राद्धे तु संप्राप्ते नच वेत्स्यर्यु
षितो पिवा ॥ प्रेत पूर्वं सुतः कुर्याद् अन्यत्रासति योगतः ॥ अथ सहगमनं
॥ एक चित्यां समारूढौ दंपती निधनं गतौ ॥ तयोः श्राद्धं पृथक् कुर्याद् एकस्मिं
काल एव तु ॥ पृथक् पाकेन वै श्राद्धं पित्रोरपि पृथक् पृथक् ॥ वैश्वदेव
दिकं सर्वं पृथगेव विधीयते ॥ वैश्वदेवादिक मिति वैश्वदेवार्घ्याग्नौक
रणं पिंड विकरादिक मित्यर्थः ॥ स्मृत्यंतरे ॥ निमंत्र्यादौ पितुः श्राद्धे
वै पित्र्ये च वेद्द्विजान् ॥ निमंत्रयेत्ततो मातुः ॥ श्राद्धे विप्रान्यथा क्रमं ॥ प्रक्षाल
पेत् क्रौ पादौ द्विजानाम यमात के ॥ उपक्रमे च ततां तमेवं स्या ॥ १०

× नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयं ॥ श्राद्धं कृत्वा पुनः श्राद्धं न कुर्या
न्मात् केपि च ॥ अथैकस्मिन् दिने श्राद्ध द्वयं निषिद्धं ॥ सुधाणी वः
श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न विद्यते ॥ नैमित्तिकं न यदि
स्यादिनेराद्दे कं भवे यदि ॥ द्विबहु निमित्तानि जायेरन्नेकवासरे ॥
नैमित्तिकानि कार्याणि निमित्तो त्यनु क्रमात् ॥ श्राद्धं स्यादेकदैवस्यमेक
मुद्दिश्यैव यदि ॥ श्राद्ध द्वयं न कर्तव्यमेकस्मिन्नेकवासरे ॥ कालादर्शे ॥
नित्यदार्शिकयोश्चोदकुंभमासिकयोरपि दार्शिकस्य युगादेश्च दार्शि
कोल्लभ्ययोगयोः ॥ दार्शिकस्यच मन्वादेः ॥ संप्राप्ते श्राद्धकर्मणि
॥ प्रसंगादितरस्यापि सिद्धे रत्नरमाचरेत् ॥ नित्य श्राद्ध दार्शिक युग
मन्वाल भ्ययोगेषु ष द्वु न्निरूपात्मकमेकदैवत्यं भवति ॥ उदकुंभ मासि
कयोः प्रत्याब्दिके च त्रिरूपात्मकमेक दैवत्यं तस्मादेतादृशा श्राद्धद्वयं
त्रयं वा न कुर्यादित्यर्थः ॥ देवताभेदे सति श्राद्ध द्वयं त्रयं वा कर्तव्यमेव

स१

॥१९॥

तत्रा स्वाह ॥ नित्यस्य चोदकुंभस्य निरसामासिकयोरपि ॥ दर्शस्य चै
दकुंभस्य दर्शमासिकयोरपि ॥ नित्यस्य चाभ्दिकस्यापि दर्शिकाभ्दि
कयोरपि ॥ युगाद्याभ्दिकयोश्चापि मन्वाद्याभ्दिकयोरपि ॥ प्रत्याभ्दिक
स्य चालभ्ययोगस्य विहितस्य च ॥ संपाते दैवलाभेदा श्राद्धयुग्मम स
माचरेत् ॥ दर्शे प्रत्याभ्दिके प्राप्ते श्राद्धस्यान्तत्र वै कथं ॥ आदौ प्रत्याभ्दि
कं श्राद्धं कुर्याद्दार्शं ततः परं ॥ श्राद्धे सपिंडे प्राप्ते पिंडहीनं नु वैयदि
श्राद्धं कृत्वा सपिंडं तु पिंडहीनं मथाचरेत् ॥ सपिंड पिंडसहितं श्रा
द्धमित्यर्थः ॥ प्रत्याभ्दिके यथा श्राद्धयुग्मं मन्वंतरादिकं ॥ आसंचेन्न
च कुर्वीत नैव दार्शं युगादिकं ॥ श्राद्धेने वर्तते हव्यं देवस्य केचन ॥ सि
द्धिस्याद्दत्तदैवस्य श्राद्धस्य च विनाभ्दिकं ॥ अथ श्राद्धमहिमा ॥

॥१९॥

श्राद्धकाले तु सर्वेषु श्राद्धं कुर्वीत मानवाः ॥ आयुः प्रज्ञा यशः कीर्तिर्धनं प्रजाः
श्रीश्च विवर्द्धते ॥ श्रद्धया क्रियते श्राद्धम न्नेनाच्छादनेन च ॥ दक्षिणया च
यथाशक्ति श्राद्धं लक्षिप्रं च क्षते ॥ आ काशे तारकासंख्या सूक्ष्मसंख्या
महीतले ॥ श्राद्धकाले तु दानस्य पुण्यं वक्तुं न शक्यते ॥ एतौ वर्णौ बाधवारौ
व्यंतरभावे पितामहं ॥ तत्काले दत्तं चेत् तत्सार्थाः पितरो ध्रुवं ॥ अज्ञानाद्वाप्र
मादाद्वा नास्ति स्याद धवा यदि ॥ निराशाः पितरस्तस्य तत्काले चेन्मरी
चते ॥ आमश्राद्धे ॥ दक्षिणा द्विगुणा देया यथा चार्याय दीयते ॥ पितृपक्षे
पि दातव्या पितृस्थाने विशेषतः ॥ यच्च संकल्पितं द्रव्यं या पितृसमेन दीय
ते ॥ स याति नरकं घोरं यावदाभूत संप्लवं ॥ सूतके श्राद्धहनि क्षणे दत्ते
स्तुसंकल्पं प्राविधि ॥ पादप्रक्षालनाद्वूर्ध्वं विप्राणां नास्ति सूतकं ॥

५१

१ए२

॥१२॥

यदि स्यात् सूतकं श्राद्धे पादप्रक्षालनादधः ॥ श्राद्धकर्म न कर्तव्यमित्येवं शौनकोऽब्रवीत्
॥ अत्र व्याघ्रः ॥ आब्दिके चैव संप्राप्ते ह्याशौचं जायते यदि। आशौचे तु व्यतिक्रान्ते तत्र श्रा-
द्धं विधीयते ॥ व्याघ्रः ॥ पित्रोः प्रत्याब्दिके प्राप्ते सूतकं यदि जायते। तदन्ते सूतके
श्राद्धं कुर्यादेकादशेऽहनि ॥ तत्रापि करणासंभवे दर्शे वा कुर्यात् ॥ दैवात्प्रत्याब्दि-
के श्राद्धे लंघिते मृतसूतके ॥ आशौचानंतरं कुर्यात्तन्मासे तु क्षयेऽपि च ॥ तदह-
श्चेत्प्रदुष्येत केनचित्सूतकादिना ॥ सूतकानंतरं कुर्यात्पुनस्तदहरेव च ॥ मृता-
हे न भवेच्छ्राद्धं दैवात्प्रत्याब्दिकं यदि ॥ एकादश्यां वा कुर्यादमायां कुर्यादिति दक्षि-
णः ॥ गोभिलः ॥ प्रत्याब्दं तु व्यतिक्रान्ते प्रमादात्कार्यमेव तत् ॥ दर्शे [illegible] चरुस्त-
थामैकादश्यां तदब्दिके ॥ अथ मृताहमासौ न विज्ञायेते ॥ किं माहेश ॥ न ज्ञायते मृ-
ताहश्चेत्प्रोषिते संस्थितेऽपि च ॥ मासश्चेत्प्रतिविज्ञातस्तद्दर्शे स्यात्तदाब्दिकं ॥ श्रा-
द्धं विघ्नसमुत्पन्नेऽप्यविज्ञाने मृतेऽहनि ॥ एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः ॥

॥१२॥

यदा मासो न विज्ञातो विज्ञातं दिनमेव च ॥ तदा चाषाढके मासि माघे वा तद्दिनं भवे-
त् ॥ दिनमासौ च विज्ञातौ मरणस्य यदा पुनः ॥ प्रस्थानमासदिवसौ ग्राह्यौ ह्यौ-
र्ध्वदैहिकक्रियाविधौ ॥ अथ ब्राह्मणाभावे ॥ पात्राभावे परं कृत्वा पितृयज्ञविधिं नरः
॥ निर्दिश्यापि च मम्भुष्य यत्र पात्रं ततो नयेत् ॥ सर्वाण्यन्नानि विक्षिपेद्गोगवे
दद्यात्तथाप्सु च ॥ ननु पात्रस्य लोपोऽस्ति पेमकस्य विशेषतः ॥ अथ द्रव्या-
भावे ॥ अग्निनावादहेत्कक्षं श्राद्धकाले समागते ॥ तस्मिन्नोपवसेद्दिनि
जपेद्वा श्राद्धसंहितां ॥ सर्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः ॥ सूर्यादि
लोकपालानामिदमुच्चैः पठिष्यति ॥ न मेऽस्ति वित्तं न धनं न चान्यच्छ्राद्धो-
पयोग्यं स्वपितॄन्नतोऽस्मि ॥ तृप्यंतु भक्त्या पितरो मयैतौ भुजौ कृतौ वर्त्मनि
मारुतस्य ॥ अथ श्राद्धकालः ॥ याज्ञवल्क्यः ॥ अमावास्याष्टकावृद्धिः
कृष्णपक्षोऽयनद्वयं ॥ द्रव्यं ब्राह्मणसंपत्तिर्विषुवः सूर्यसंक्रमः ॥ व्यतिपातो
गजच्छाया ग्रहणं चंद्रसूर्ययोः ॥ श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्ति-

॥१३॥

ता:॥ अथ षण्णवत्यः॥ अमा मनुयुग क्रांति धृतपात महालयः॥ अन्वष्टकाश्च
तिथयः॥ षण्णवत्यः प्रकीर्तिताः॥ षण्णवत्यस्य श्राद्धविशेषः॥ श्राद्धदेवता
नि॥ त्रिदैवत्यं स्मृतं ह्येतच्च षड्दैवत्यं तु दार्शिके॥ वृद्धौ तु नवदैवत्यमष्टकासु नवै
व च॥ दर्शे नित्ये युगादौ च मन्वादौ ग्रहणे तथा॥ संक्रांतिषु भरण्यां च षड्दैवत्यं वि
धीयते॥ शातातपः॥ नांदीमुख्ये एकोद्दिष्टे गंगायां च मृतेऽहनि॥ पितामह्या
दिभिः सार्द्धं मातुः श्राद्धं समाचरेत्॥ अष्टकासु च वृद्धौ गयायां च मृतेऽहनि
॥ मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिना सह॥ वि[illegible]दर्शे॥ मातुर्यायाष्टकाव
द्धिस्मृताहेषु महालये॥ श्राद्धं कुर्यात्पृथक् दैवतं तत्र वानुगतावपि॥ अत्र कश्चि
द्विशेषः॥ प्रयोगसारे॥ अष्टकासु च वृद्धौ च गयायां च मृतेऽहनि॥ चंद्रसूर्यो
परागे च व्यतिपाते महालये॥ मातुः श्राद्धं पृथक् कुर्यादन्यत्रापि पतिना सह॥
पितरो यत्र पूज्यंते तत्र मातामहा अपि॥ वृद्धौ तु नवदैवत्यं षड्दैवत्यं तु दार्शि
के॥ महालये गयाश्राद्धे ज्ञेयं द्वादशदैवतं॥ प्रयोगसागरे॥ आषाढ्याः पंचमप ॥१३॥

क्षे श्राद्धं कुर्याद्दिने दिने॥ उद्दिश्य नवदैवत्यमित्येवं मनुरब्रवीत्॥ अथैकस्मि
न्दिने कुर्यात्सर्वासु द्विजसत्तमः॥ महालयात्मके श्राद्धे न स्यात्सद्वी भवेत्
अथ पिंडरहित श्राद्धानि॥ हेमाद्रौ॥ संक्रांतौ ग्रहणे पाते युगमन्वंतरादि
षु॥ भरण्यां चापि कुर्वीत श्राद्धं पिंडविनैव तु॥ संग्रहे॥ मन्वादौ च युगादौ
च ग्रहणे चंद्रसूर्ययोः॥ संक्रांतिषु च सर्वासु श्राद्धं पिंडविना भवेत्॥ पिं
डहीनं तु यच्छ्राद्धं संकल्पाख्यं प्रचक्षते॥ तच्चापि हि द्विजः कुर्यादित्येवं
मुनयोऽब्रुवन्॥ आवाहनार्घ्यपिंडाश्च विकिरोच्छिष्टपिंडकौ॥ स्वधो
च्चारणौकरणे संकल्पे सर्ववर्जयेत्॥ अथ श्राद्धनियमः॥ दंतधावनतां
बूलं क्षौराभ्यंगमभोजनं॥ रत्यौषधपरान्नं च श्राद्धकर्ता विवर्जयेत्॥ अ
त्र कश्चिद्विशेषः॥ आमश्राद्धं तथा नित्ये काम्यश्राद्धे महालये॥ निषिद्धं ने

॥८॥

वनांबूलमितिशालातपोब्रवीत॥ दर्शेचापरपक्षेच चसंक्रांतिमनुयुगादिषु
॥ श्राद्धंकृत्वाततोभुक्त्वातांबूलंखादयेद्बुधः॥ यस्तुपितृघ्नःसैषुतांबूलं
यरिखादयेत॥ भवेत्पुत्रैःपापिष्ठोनिर्दोषाःपितरोगताः॥ श्राद्धकाले
षुसर्वेषुश्राद्धकर्तातुयोद्विजः॥ नकुर्यात्क्षौरमभ्यंगंतथैवस्त्रीनिषेव
णं॥ अथापरपक्षे॥ पारिजाते॥ कन्यागतेसवितरियान्यहानिषोडशाच
॥ क्रतुभिस्तानितुल्यानितेषुदत्तंमथाक्षयं॥ अहःषोडशकंयत्तुशु
क्लप्रतिपदासह॥ चंद्रक्षयाविशेषेणसापिदर्शस्तिथिर्मता॥ आदौमति
कृप्रति॥ नभस्यापरपक्षेतुश्राद्धंकुर्याद्दिनेदिने॥ नैवनंदादिवर्ज्यस्या
नैववर्ज्याचतुर्दशी॥ नभस्यापरपक्षेतुमनाहनिपितुर्यदि॥ करोतिकन्यः

श्राद्धंपितॄणामक्षय्यंभवेत॥ भरणीप्रेतपक्षस्यमहतीपरिकीर्तिता॥ अस्यांश्राद्धं
कृतंयेनसगयाश्राद्धकृद्भवेत॥ नंदाभार्गवर्के भौमेषुचतुर्दश्यांद्विजन्मसु॥ ए
षुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात॥ कृतेनेमितिकाम्यश्राद्धंयस्तुमघो
तुनि॥ तथातज्ज्येष्ठपुत्रस्यनाशःस्यादितिकीर्तितं॥ प्रजापत्येनपौष्णेनमघायां
भार्गवेतथा॥ यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रविनश्यति॥ मघायांचत्रयोद
श्यां॥ कन्यासंस्थेदिवाकरे॥ पिंडदानपरित्यज्यश्राद्धंतत्रविधीयते॥ याज्ञवल्क्यः
॥ प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं॥ शस्त्रेणतुहतायेवैतेभ्यस्तत्रप्र
दीयते॥ समतःभागतस्यापिपितुःशस्त्रहतस्यच॥ एकोद्दिष्टंसुतःकुर्याच्च
तुर्दश्यांमहालये॥ चतुर्दश्यांतुयच्छ्राद्धंसपिंडीकरणेकृते॥ एकोद्दिष्टविधानेन
नतत्कुर्याच्चस्त्रघातिनां॥ सपिंडीकरणादूर्ध्वंमृतस्यविधूदादिभिः॥ कुर्याद्

॥९५॥

नप्रेतक्षेपेत्वेकोद्दिष्टं पितुः सुतः ॥ निषिद्धानि परित्यज्य तिथिवाराधिकानि च ॥ पक्षे
कस्मिन्दिने कुर्यात् शुभे वापि महालये ॥ पारिजाते ॥ अमापात भरण्यां च द्वादश्यां
पक्षमध्यके ॥ यथा त्वाक्रिच नक्षत्रं वारं वारं विचारयेत् ॥ अपुत्रो नाग्निकश्चैव
विधवा ब्रह्मचारिणः ॥ दर्शे मिहालयं कुर्यात् कुर्यान्पुत्रवान्गृही ॥ अभा
वेदिन्ना भावे तीर्थे चैव महालये ॥ एकमप्याशयेद्विप्रं मर्घ्यं पिंडान्पृथक्पृ
थक् ॥ अथ सन्यासि श्राद्धं ॥ स्मृत्यर्थसारे ॥ एकोद्दिष्टं न कर्त्तव्यं सन्यासि
नां कदाचन ॥ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते ॥ एकादशाहे संप्राप्ते पु
त्रः कुर्वीत सत्क्रियां ॥ पिंडग्रहणमात्रेण नैव प्रेतो भवेद्यतिः ॥ अतः पुत्रेण क
र्त्तव्यं पार्वणं तस्य सर्वदा ॥ एकोद्दिष्टं न कर्त्तव्यं यतीनां नैव सर्वदा ॥ अहन्येका
दशे तेषां पार्वणं तु विधीयते ॥ सपिंडीकरणं तेषां न कर्त्तव्यं सुतादिभिः ॥ प्रति

॥९५

मासे तु कर्त्तव्यं मृताहे मासिकादिकं ॥ सन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथा
विधि ॥ महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तु ॥ अथ श्राद्धे ब्राह्मणनियमः ॥
कारिका ॥ शुचिर्निमंत्र्य द्वौ दैवे त्रीन् विप्रान् पितृकर्मणि ॥ दैवे पित्र्ये यथैकैकं
सपिंडीकरणं विना ॥ बृहत्पाराशरः ॥ प्राङ्मुखौ दैविके विप्रौ पितरस्त्रिरुद
ङ्मुखाः ॥ एकैको वा स्यपत्र स्यादसंपत्तौ विधिक्रमः ॥ संपत्तावेकपात्राणामेकैक
स्य त्रयस्त्रयः ॥ त्रिपित्र्ये द्वे ब्राह्मणाः प्राक् चत्वारो वैश्वदेविके ॥ वृत्तिकारः ॥
सत्क्रिया देशकालौ च द्रव्यं ब्राह्मणसंपदः ॥ पंचैता विस्तरो हंति तस्मान्नेहेत
विस्तरं ॥ द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा ॥ मातामहानामप्येवं
तंत्रं वा वैश्वदेविकं ॥ याज्ञवल्क्यः ॥ यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् ॥
अन्नपात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतने कृत्वा ततः श्राद्धं समाचरे
त् ॥ प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे ॥ प्रयोगे ॥ आमंत्रणं गत्वा विप्रं नि

॥९८॥

वारयति दुर्मतिः ॥ ब्रह्महत्यामवाप्नोति श्रुद्रयोनिषु जायते ॥ आमंत्रितस्तु यो विप्रो
भोक्तुमन्यत्र गच्छति ॥ नरकाणां शतं गत्वा चांडालेष्वपि जायते ॥ श्राद्धकर्त्ता पर
श्राद्धं दर्शे चेद्यस्तु भुंजति ॥ नरकं प्रतिपद्येत भोक्ता कर्त्ता तिर्यक्त्व ॥ भ्रातरो
पितृपुत्रौ च तथा श्रोत्रीयमेव च ॥ द्विजमप्यनधीतारं श्राद्धे यत्नेन वर्जयेत् ॥
भ्रातरौ पितृपुत्रौ तु नैकवर्गे निमंत्रयेत् ॥ पृथग्वर्गे धिवा देवे चैतानपि नियो
जयेत् ॥ ब्राह्मणान्वेदसंपन्नान् भ्रातृ पितृसुतानपि ॥ पृथग्वर्गे नियुंजीत वि
प्र... दविवर्जितान् ॥ एकैकमपि विप्रं तु वर्गे वर्गे नियोजयेत् ॥ देवे पित्र्ये अथ
वान्यस्मिन्न... विप्रं वेदवर्जितं ॥ अथ श्राद्धदेशः ॥ पर्णवि ॥ दक्षिणाप्र
वणे देशे... दोस्वर्ग हे पुषा ॥ भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्न
तः ॥ परकीयप्रदेशे तु निर्वपेन्नुयः ॥ तद्भूमिस्वामिपितृभिः श्राद्धकर्म वि
हन्यते ॥ ...वी पर्वताः पुण्या नदीतीर्थानि यानि च ॥ सर्वाण्यस्वामिका

मि

न्याहु... तेषु परिग्रहः ॥ वनानि गिरयो नद्यस्तीर्थान्यायतनानि च ॥ देवखातं
... स्वामिका... तेषु न विद्यते ॥ पुनः श्राद्धे निर्णयः ॥ प्रमादात् कृतं चेत्स्याद...
करणे... ॥ अकृते पिंडदाने हि पुनः श्राद्धं समाचरेत् ॥ पितृपात्रे च नेस्थान
ति... चेद्गमतेयदि ॥ स्पृष्टोसिं पिंडं श्वमार्जारैः पिंडो भिन्नः पितुर्यदि ॥ अग्नौ
कृते तु नाशोग्नेः स्याच्छ्राद्धं तत्परेहनि ॥ आपिंडदानपर्यंतं न किंचिदपि वै भ
वेत्... दाचेद्भवेत्त्र पुनः श्राद्धं समाचरेत् ॥ अथ विशेषवचनं ॥ अकृते
पिंडदाने तु पिता चेद्गमतेयदि ॥ कृतापाकं पुनः कुर्याच्छ्राद्धं तत्र विधानतः ॥
९ मार्जारश्वसंस्पर्शे पिंडे... ते तु पितुर्यदि ॥ पुनः पिंडाः प्रदातव्या तेन पाकेन तत्
क्षणं ॥ पितामहादिदेवानां ब्राह्मणो वमते यदि ॥ सर्वमन्नं समादाय हुनेद
ग्नौ तु नैऋते ॥ प्रणवेनाहुतिं चादावंते स्याद्भूर्भुवः स्वरों ॥ आहुतिर्जुहुया

१८॥ त्रिंशन्मंत्रैः प्राणादिपंचकैः॥ द्वात्रिंशदाहुतीरेवं हुत्वा पिंडान् प्रदापयेत्॥ सर्वेषां
शाखिनामेव विधिरेष उदाहृतः॥ सपिंडीकरणं चैव प्रेतश्राद्धं मृतं यदि॥ सपिं
डीकरणं कुर्यात् पुनः पाकेन तत्क्षणात्॥ मासिकं च गयाश्राद्धं प्रत्यब्दं च महाल
ये॥ पिताचेद्वमनं कुर्यात् पुनः श्राद्धं समाचरेत्॥ संक्रांतिपक्षिपातेषु युगम
न्वष्टकासु च॥ पिताचेद्वमते दर्शे पुनः श्राद्धं न कारयेत्॥ श्राद्धदिने निःक्रां
ते श्राद्धलोपः॥ श्राद्धानि स्वस्यकालेषु प्रमादादकृतानि चेत्॥ अतीता
नि च सर्वाणि प्रत्यब्दं मासिकं विना॥ ...॥ ॐ नमासेषु निःसेषु तथा
ने मासिकेषु च॥ उत्कर्षं चापकर्षं च न कुर्याद् दृष्टकासु च॥ अथ जीवत्पितृ
क स्याश्राद्धं॥ [illegible] पितामहे स्थिते यस्य पिता प्रविशिपद्यते॥ ...
पिंडविकनामानाचैकस्य प्रपितामहे॥ ...॥ श्री राम राम राम॥ ॥१८

चै १

...॥ ... पिंडे पितरणां वद्धाज्जीवत्पितामहः॥ प्रपितामहस्यैकैकं पितुः प्रसा
... कार्यं ...॥ अथ श्राद्धे द्विमे वैश्वदेवः प्रसंग्यहे॥ वद्ध्राचारौ क्षये चांते दर्शे मध्ये
... ने॥ महालये च पिंडांते वैश्वदेवं चतुर्विधं॥ मध्ये इति दर्शे अयोत्तर
... कृपा केन वैश्वदेवं कर्तव्यं बलिहरणादिकं श्राद्धं तत्र च॥ ततः प्रसु
तिः॥ पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च॥ वैश्वदेवं न पित्रर्थं न दर्शे वै
श्वदेविकं॥ ससर्वे ते॥ अग्नौ करेण तेमंतु उचोदूने द्रौ द्वौ हुती॥ पृथक्पाकेन
दर्शे विधिरेष उदाहृतः॥ अग्नौ करणसंपन्ने विशेषमाह॥ दर्शे विसर्जना
दर्वाक् उत्तराच मनाहरं॥ वैश्वदेवं ततः कुर्यात् केचिद्देवं वदंति हि॥ अनाहि
ताग्निर्यो दर्शे कृता श्राद्धं विधानतः॥ पित्रशेषेण वै कुर्याद् वैश्वदेवं ततो द्विजः॥
अथाहिताग्निविषयं॥ पक्षांते वामी निर्वर्त्य वैश्वदेवं तु साग्निकः॥ पिंडयज्ञं ततः
कुर्यात् सिंजन्वाहार्यकं बुधः॥ प्रत्यब्दे मासिके चैव श्राद्धं स्यात् विधानतः॥ तच्छेषेण च
कुर्वीत वैश्वदेवं द्विजोत्तमः॥ चराद्दात् द्व्येकादिष्ट पिंडे यं॥ सोऽग्मः॥ यथैव स्मिन्यः
न्येव श्राद्धानि सार्वहूनि चेत्॥ ह्यश्राद्धानि सर्वाणि वैश्वदेवं चरेदथ॥ अ...

॥१८॥

दौहित्रश्राद्धं ॥ससव्रतः॥ मातामहो विपद्येत यदि चेत्पुत्रवानपि॥ कुर्या-
न्मातामहश्राद्धं पौत्रो वै वर्तते पिता॥ प्रतिपद्याश्विने शुक्ले कुर्वन्मातामहं पि
[illegible] मातुले दौहित्रः कुरुते श्राद्धं सपिंडं पार्वणं च॥ व्यासः॥ कुर्यान्मा- ३
तामहश्राद्धं प्रतिपद्याश्विने सिते॥ सपितापि सपिंडं तु जीवत्सपोऽपि च
मातुलः॥ दौहित्रस्य तु यच्छ्राद्धं [illegible] प्रचक्षते॥ सर्वत्रैतोपमा
चारी वदंति मुख्यः नपो हि लतः॥ पुत्राभावे पत्न्यभावे पि बहुकर्तृ विष
यांशास्त्राचार्यैः॥ पुत्रस्यैव हि वाप्यस्य कर्तारो [illegible] जादयः॥ [illegible] पदिस्य:
केन वर्तन्या आपुत्रस्य चैव क्रिया॥ एक एव तु कुर्वीत असंबद्ध [illegible] तकर्मसु॥ भ्रा
तृजो [illegible] एवापि स सुतैव बहुकर्तृषु॥ गर्गः॥ ज्येष्ठस्य संनिधौ नस्या
दनुजोनाप्पि सत्क्रिया॥ सःस्यात्प्रियतमो यस्य सोपि सो बहुकर्तृषु॥
[illegible]॥ पुत्रस्तेनावितायस्तु श्रीयकारी च पालितः॥ स एव कुर्या
दपत्यस्य पुत्रस्य चैव क्रिया॥ ॥ इति श्रीनारायणविरचिते तापांच ॥१८॥
मे [illegible] नानाविधश्राद्धप्रकरणं॥ ५॥ अथाशौचविधिरभिधी

॥ [illegible] त्रिविधं जातकं मतं॥ मासत्रये चतुर्थे च गर्भस्रावः उच्यते॥ पातः स्यात्पंचमे षष्ठे
यते॥ जातकं मृतकं चैव द्विविधं सूतकं स्मृतं॥ स्रावः पातः प्रसूतिः सप्तमादिषु॥ ॥१८॥
मासैः संख्या दिनं मातुः स्रावे सूतकमिष्यते॥ स्नानेनैव विशुध्यंति सपिंडाश्चापि
नैव पिता॥ पाते मातुर्यथामासास्तावदेव दिनं भवेत्॥ सूतकं तु सपिंडानां पितुश्चै
कदिनं भवेत्॥ प्रसूतौ चैव सर्वेषां दशाहं सूतकं भवेत्॥ क्षत्रस्य द्वादशाहं
विट्शूद्रयोः पक्षमासिके॥ त्रिदिनं यत्र विप्राणां क्षत्राणां स्याच्चतुर्दिनं॥ ॥
विशां पंचदिनं तत्र शूद्राणां च दिनाष्टकं॥ नाभिच्छेदात्ततः पूर्वं जीवन्जातो मृतोऽथ
दि॥ मातुः पूर्णमतोन्येषां पितुश्च त्रिदिनं समं॥ मृतस्य प्रसवे चैव नाभिच्छेदनतः
परं॥ मातुः पितुश्च सर्वेषां ज्ञातीनां पूर्णसूतकं॥ पूर्णमिति दशाहमित्यर्थः॥ मृतकं मृ
तकेनैव सूतकं सूतकेन च॥ शावेन शुद्ध्यते सूतिः शावं सूतेन शुध्यति॥ सूतिरि
ति जातकं शावमिति मृतकमित्यर्थः॥ न तुल्यमधिकं जाताद्यावन्मल्पं भवेद्यदि॥
शुध्यते जातकेनैवाधिके तुल्ये स्वकालतः॥ जातसूतकी न तुल्यं नाधिकं तस्मा-ज्ञा
त कात् शावं अल्पं यदि [illegible] ते॥ जातसूतकेनैव शावं शुद्ध्यति॥ तुल्यं वा अधिकं वा
शावं चेत्स्वकाले नैव शुध्यतीत्यर्थः॥ तुल्यं तुल्येन शुद्धिः स्यादल्पं चैव नाधिकेन तु॥
शुद्धिरन्यो नाधिकस्य न भवेत्तु [illegible] च न॥ दशाहे सप्तमे यादवो वृद्धिः तीयं सूतकं यदि॥

॥८९॥

श्रा१

॥११॥ एवं पञ्चसूतके नैरद्वितीयं तु विमुच्यते॥ रात्रौ चेत् प्रथमे यामे द्वितीयं सूतकं भवेत्॥
ऊर्ध्वं दिनद्वयं प्रोक्तमर्धरात्रादधोपि चेत्॥ अर्धरात्रादधोपि चेत् सूतकं तत्रापि दिन
द्वयमेव सर्वथा॥ तृतीये प्रहरे वापि यदि स्यात् सूतकं पुनः॥ तदा त्रिरात्रमाशौचं सर्वेषा
मेव निश्चितं॥ सूतकाद्यायदाशौचं तथा चैव निदर्शयेत्॥ मृतस्य च सुतस्यापि
पूर्णमाशौचमिष्यते॥ यावत्सूतकमस्पृश्या माता प्राक् स्नानतः पिता॥ सर्वे पां
खं तु सपिंडानामस्पृश्यं न सूतके॥ यावदाशौचमस्पृश्या तावत्तस्यैव सुता॥
सपिंडास्तावदस्पृश्या यावत् स्यादस्थिसंचयः॥ [illegible]ोपनयनात् सर्वं पुत्रो य ५८
दि विपद्यते॥ त्रिरात्रं त्रिदिनमाशौचं दशाहं [illegible] नासरं॥ मृतस्यानुपनी
तस्य दशाहान्तरं यदि॥ ब्राह्मणं विप्रमर्दिय चतुर्थे ह्नि भोजयेत्॥ पुत्र
[illegible] कन्याया अनुपलक्षणं॥ आदंतजन्मनः सद्य आचूडान्नैशिकी क्रिया॥
त्रिरात्रमाव्रतादेशादिति सेदसाभोगत्रिणां॥ मरणं कन्यकायाश्चेद्यावद्वर्षत्रयं
भवेत्॥ सद्यः शुचिः सपिंडानां तदूर्ध्वं महरेव तु॥ पुत्रिकाशौचमपि पित्रोः पुत्र ॥११॥
[illegible]वत्त्रिरात्रमपि गम्यते॥ ऊनद्विवर्षकं प्रेतं न दहेन्निखनेद्भुवि॥ श्री॥

चं१

पूर्णे द्विवर्षे प्रेतं [illegible] दहेद्दिशा [illegible] कोऽपि वा॥ एकादशपिंडान्नं स्याद्द्विवर्षे स्युर्वै यदि॥
निक्षिपेद्भुवि प्रेतं न दाहो नोदकक्रिया॥ असंस्कृतसपिंडानां मरणं श्रूयते यदि
न कुर्यात् स्नानमाशौचं मतिर्नास्ति सूतके॥ असंस्कृतसपिंड नौ मिश्रा अनुपनी
तस्तौ तान्नाम्नि सर्वथा॥ पंचवर्षं यदि च्येद्बुधे द सपिंडो ह्यसंस्कृताः॥ तत्र स्नाने न शु
द्धिः स्यादिति प्राहुर्मनीषिणः॥ वाग्दानानन्तरं यत्र यदि कन्या प्रमीयते॥ आ
शौचं त्रिदिनं तत्र पितृपक्षो भवेत्कुले॥ कन्याशौचं विवाहोर्ध्वं पितृगोत्रेण न
विद्यते॥ पुरुषत्रयपर्यन्तं विवाहात्पूर्वमेव हि॥ दत्तानामपि तु [illegible] तथा
[illegible]तना॥ अबंधुवर्गी स्त्रीके [illegible] जनने कापि [illegible] तर्णं माता
सो५ [illegible] सर्वे सोदराणामुपलक्षणार्थं॥ पितृगेहादतो न्यत्र दिये कन्या प्रमीयते॥
तत्र स्यात् सपक्षिणी पित्रोर्नीचान्येषामघं भवेत्॥ दशाहात् परतः कन्यामरणं
यदि३ श्रूयते॥ आशौचं दिनं त्रिपित्रोर्नान्योपाभिमितिर्णयः॥ स्नानाशौच मतोन्येषां पि
त्रोः स्नानेन शुध्यति॥ पित्रोः स्नानमथान्येषां नैव पाशौचान शुध्यति॥
दशाहाभ्यंतरे पित्रा मरणं श्रूयते यदि॥ अवशिष्टदिनैः शुद्धिः पु

॥१००

पं २ तृ ऋ १ दि २

त्राश्चैवाघयोगः स्मृताः ॥ दशाहात्तु मरणं पित्रोर्बहि श्रूयते यदि ॥ श्रवणादि दशाहं तं
पुत्राणां तद्विवेदने ॥ ऊर्ध्वं चेद्दशाहात् मरणं दशाहोपि श्रूयते यदि ॥ सर्वासां ... ऽप्यवि
रूपस्यात् त्र्यशौचं यथोचितं ॥ मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी भवेत् ॥
अहः स्यान्नवमादर्वाग् ऊर्ध्वं स्नानेन शुध्यति ॥ ऋतौ हि दशाहात् ... दपत्यमरणं प ब४ व्य५
दि ॥ पोतजन्मा च पुत्रास्य सद्यः स्नानेन शुध्यति ॥ लोकदेशाई द प्रोक्ते मारण
वदि येनेपुंसः स्त्रीणि ॥ देशांतरे भवेयत्र स्नानमात्रेण शुध्यति ॥ ॥ देशांत
रलक्षणमाह ॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः ॥ वाचो यत्र विभि
द्यंते तद्देशांतरमुच्यते ॥ त्रिंशद्योजनदूरं वा प्रत्येकं देशांतरं तत् ॥ प्रोक्तमु
निभिः शौचं सपिंडानामिदं भवेत् ॥ पुत्रविषये ॥ पितृशौचे न्नरो स्यात्तांद
तरस्थोपि हि पुत्रकः ॥ एतान्तु न मारस्य पुत्राणां दशरात्रकं ॥ ... पत्न्या३
अपि तथाशौचं भवेदेवं विनिश्चितं ॥ पत्न्यां शौचं न भवेद् ... रप्यवपतिर
ब्रवीत् ॥ दूरस्था निधनं चेत्तु दशाहाच्छ्रूयते बहिः ॥ जायां कुर्यात् दपूर्णप ॥१०॥
तु

स्या ३

न्या अपि पतिसाधा ॥ मातापित्रोर्यथाशौचं दशाहं क्रियते सुतैः ॥ अनेके हेपि दंपत्यो
स्तथैव स्यात् सरस्परं ॥ पितुर्दशाहमध्ये चेन्माता यदि मृता तदा ॥ द्वते न्मत्राग्निना
प्रेतां न कुर्यादुदकक्रियां ॥ पैतृकादूर्ध्वमेव ... न्माता त्राशौचं तु पक्षिणी ॥ विधायोद
कदानादि कुर्यान्मातृक्रियां ततः ॥ पैतृकात्सपिंडीकरणादूर्ध्वं मिस्यथैः ॥ मातुर्द
शाहमध्ये तु म्रियते यदि वै पिता ॥ पितुर्मरणमारभ्य दशाहं शावकं भवेत् ॥
एवमेव पितुश्चाद्यं कुर्यादेकादशेहनि ॥ ततो वै मदिके श्राद्धं कुर्यात् षोडशी ॥
तां अवशिष्टं दशांतं स्वकर्म विधानतः ॥ मातृकं स कालं चेत् सपिंडीकरणं न हि
ततः कुर्यात् पितुः पुत्रः षोडशं च सपिंडनं ॥ तयोः स्यादेककाले वा सपिंडमिति केचन ॥
देशांतरे मृते पित्रोः पुत्रे पाप्रेतकर्मणि ॥ एकस्मिन्नेव काले चेन्मरणं श्रूयते तयोः ॥
दूरगो प्याचरेत् पुत्रो ह्याशौचमनयोः समं ॥ कुर्यादेकादशाहे तु तयोः श्राद्धं प
थक् पृथक् ॥ पितुर्दशाहमध्ये चेन्मरणं श्रूयते यदि ॥ मृतेक्रिया मातुश्च पित्रा
शौचेनेव शुध्यति ॥ असंस्कृतायां मातुश्चेन्मरणं श्रूयते यदि ॥ पितुर्दशाहादिनादूर्ध्वं मा
तृकं पक्षिणी भवेत् ॥ मृता प्रेतक्रियामादौ मातुरेवाचरेत्सुतः ॥ मृता तक्रिया यामा ते

अश्राद्धं स्यात्पितृपक्षे ॥ मातुर्दशाहमध्ये तु पितुश्चेन्मृतकर्मणः ॥ मरणं श्रूयते तत्र मातुः
कर्म कथं भवेत् ॥ पितुः श्रवणमारभ्य दशाहं शावकं भवेत् ॥ आशौचानंतरं कुर्या
न्मातृकं सकलं सुतः ॥ अवशिष्टं च यत्किंचिद्विहितं कर्म पूर्ववत् पितुः ॥ कुर्याद्द्विकं च
क्राद्व्रममन्यथा कृतकर्मणः ॥ पैतृकं प्रेतकर्म कृत्वाथ मातृकं ॥ आशौचं पक्षिणी
मातुः कुर्यात्प्रेतक्रियादिकं ॥ देशांतरगते नष्टे कालः ॥ दूरदेशं गते नष्टे जीव
तः श्रूयते न चेत् ॥ यदि पूर्ववयस्कस्य यावत्स्याद्दश विंशतिः ॥ तथा मध्यवयु
स्कस्य सद्धाः पंचदश वत्सु ॥ तथा परवयस्कस्य यावद्द्वादश वत्सरां ॥ अतः उर्द्ध्वं
प्रेतकर्म कार्यं तस्य विधानतः ॥ कृत्वा षडब्दं कृच्छ्रं वा प्रायश्चित्तं स्वशक्तितः ॥
प्रेतकार्ये कृते तस्य यदि चेत्पुनरागतः ॥ घृतकुंभेन संस्नाप्य सर्वौषधिभिर
प्यथ ॥ संस्कारांस्तत्कालोक्तान्मौंजीबंधनमाचरेत् ॥ पत्नी पूर्वा[blot]त्यासह वा
स्वविवाहः कार्य एव हि ॥ अथ वा दशा[blot] मातृलोकनं ॥ दंपती पितृव्
यौ च स्वसारौ भ्रातरौ तथा ॥ पितृव्य मातुलौ चैव दौहित्र भागिनेयकौ ॥ पुत्रिका
पितरौ चैव भगिनी भ्रातरौ तथा ॥ द्वादशाब्दव्यतीते तु दूरदेशं गतो यदि ॥

एतेषामेव मेको पि नान्यो नम नलोकयेत् ॥ इच्छंति केचिदाचार्या अन्यान्य मवलो
कनं ॥ शिवालये च तीर्थे स्नात्वा समज्वाल्य दीपकौ ॥ [blot] शिवं संपूज्य विधिवत्पु
नौ तौ देवमध्यतः ॥ घृताकांस्यमयं पात्रं सजलं रत्नपूरितं ॥ उभौ तौ दर्मीत्र पार्श्वे
च हिर्जो स्नानं वलोकयेत् ॥ आननं चैकमेकस्य हृष्ट्वा सम्यक् शिवं नमेत् ॥ ब्रा
ह्मणेभ्यो यथाशक्त्या दद्यात्पात्रं सदक्षिणं ॥ अन्येभ्यश्चाथ विप्रेभ्यो यथावित्तानु
सारतः ॥ तेभ्योपि दक्षिणां दद्याद्भोजयेच्च पुनः शिवं ॥ नत्वा देवं द्विजान्सर्वान्
गच्छेत्स्व मंदिरं ॥ ततो आहुति सिद्धी मंमष्टोत्तरशतं तिलैः ॥ स्नात्वा च भोजयेद्द्वि
जान्यथावित्तानुसारतः ॥ बांधवैः सह भुंजीत सर्वविघ्नप्रशांतये ॥ इच्छंत्यः
कुर्वंते मर्यदा स्यान्निष्टं न विद्यते ॥ मातुः कामी नरश्चैव मृता नानवलोकयत् ॥
पूर्वावलोकितानां तु विधिरेष उदाहृतः ॥ न चैवापूर्वदृष्टानां मिति प्राहुर्मनी
षिणः ॥ अथानुगमनं ॥ प्राणं सजा[blot]तिया नारी भर्त्तारमनु वैमृतं ॥ तस्या र
वतथा कुर्यात्पितृवत्प्रेतसंक्रियां ॥ अग्निश्च परस्तथा होमो धूपस्नानं तथैव च ॥
सरदेवहिकर्ता[blot]योनिना पिंडतिलोदकं ॥ उत्तरीयं शिलापात्रमग्निश्चैव तथाचरेः ॥

॥१२

एकाह एव मृते मातादेपसोरनुयायिनोः ॥ न च श्राद्धं सपिंडं शादिकमेव चाऽलयोः श्राद्धं सुतः
कुर्यादुभयोः पृथक् पृथक् ॥ सापत्नमातृविषये ॥ सापत्नमातृमरणं दशाहाभ्यंतरे तु
तिः श्रुतं ॥ प्रथमेऽह्न्यतीते तो त्रिदिनं चाथ पक्षिणी ॥ यावत्प्रथमाद्धू सावत्त्रिरात्रमा
शौचं तदूर्ध्वं पक्षिणी पुत्रवत्याः सापत्नमातुर्विषय एव तत् ॥ अपि दशाहादतीते त्रि
रात्रमुक्तं ॥ तद् पुत्रवत्या एव ॥ तथा च ॥ पितृपत्न्यामपेतायां मपुत्रायां तु वै यदि ॥
संवत्सरे व्यतीते पि त्रिरात्रमशुचिर्भवेत् ॥ पुत्रस्योपनयनादूर्ध्वं मरणं श्रूय
ते यदि ॥ दशाहाभ्यंतरे तोयावद्घं स्यात्त्रिदिनं तथा ॥ पुनर्दाहः ॥ दशाहात्परतो य
स्य पुनर्दाहो भवेद्यदि ॥ अनेकेषामपि सर्वेषां त्रिदिनं सूतकं भवेत् ॥ एवं शौच
गृहीतानां मारशौचं नैव विद्यते ॥ गृहीतस्यापि वै केतु त्रिदिनं स्नानकं भवेत् ॥
पुत्रो यदि भवेत्तस्य पुनर्दहनकर्मणि ॥ आद्यं प्रागृहीतं चेद् दशाहं स्नानकं भवे
त् ॥ नेच्छिद्धिषमाणुः ॥ मादेपिरवो शौचं पितृश्चासंस्कृतस्य ... ॥ चाण्डालादि पुन
रा शौचं दशाहमिति कथ्यते ॥ पुत्राणामिदमाशौचं अन्येषां त्रिदिनं भवेत् ॥ प्राग
हीणां तु नैनस्या केतु वै त्रिदिनं भवेत् ॥ असपिंडाशौचं ॥ पुत्रीगृहे यथा नान्यत्र प्र

श्री ३

॥१२

स्य ३

तु
स्तौ पितरौ यदि ॥ दशाहाभ्यंतरे पुत्र्यास्त्रिरात्रं स्यात् ॥ वसूतकं ॥ पित्रोर्दशदिनादूर्ध्वं मरणं दु
अन्यथा ॥ श्रूयते यदि चेत्तस्याः पक्षिण्याशौचमीर्यते ॥ स्वसुर्गृहे स्वतो भ्राता मातुलौ वा
गृहे स्वसा ॥ आशौचं त्रिदिनं तत्र पक्षिण्येवान्यत्र तु ॥ भगिनीसूतकं चैव भ्रा
तुश्चैवाथ सूतकं ॥ नैव स्याद्भ्रातृपत्न्याः सूतके तथा च भगिनीपतेः ॥ मरणं श्रूयते भ्रा
तुर्दशाहाभ्यंतरे यदि ॥ दिनमेकं स्वसुः प्रोक्तं स्नानं स्याद्भगिनीपतेः ॥ दशाहात्प
रतो भ्रातामरणं श्रूयते स्वसुः ॥ तस्यैकं दिनमाशौचं तरत्न्याः स्नानमुच्यते ॥
भगिन्यश्चात्मनः पित्रोर्मातामहस्य तत्सुतः ॥ मृत्यौ दत्तकन्यायाः स्नानं तेषां त
थोच्यते ॥ अस्यार्थः ॥ आत्मनो भगिन्यः मातापित्रोर्भगिन्यः मातामहः ॥ च कारान्मा
तामही तत्सुत इति मातामहसुतः ॥ एते मृतीयं तेचेद् दत्तकन्यायाः विनोदितायाः स्ना
नमात्रमेव ॥ दत्तकन्यामरणे तेषामिति भगिनीत्रयमातामहमातामहीमातुला
नामपि स्नानमात्रमेवेत्यभिप्रायः ॥ पितृस्वसुः पतिर्मातुः स्वसुर्भर्ता मृतो यदि ॥
दशाहाभ्यंतरे स्नानाद्धं शुद्धिरूर्ध्वं न किंचन ॥ मातामहे मातुले च मृते या चाथ तेत्रि
यः ॥ दौहित्रो भगिनीयश्चापि तु मीतुश्चैव स्वसा ॥ स्वगृहे भ्रातृ मातामहाशौचं परत्र स्या

॥१२

तु पक्षिणी ॥ अर्वाक् त्रिदिनात् सद्यः स्नानेनैव विशुध्यति ॥ स्यात् हरत्सा शौचीनोग्रहं ॥
न मृतस्य गृहे ॥ जामाता श्वसुरे श्वश्र्वां च यदि स्यात् हे यदि ॥ आशौचं त्रिदिनं
तत्र पर[illegible] वेश्मनि पक्षिणी ॥ श्रोत्रियाचार्ये शिष्यादि उपाध्याये च गुरुः ॥
मित्रे च स्वाध्यायी मृते स्वगृहे तु अहं ॥ स्यात् तासु गृहे समपिण्डयते ॥ परगृहे
पक्षिणी स्यात् तेषां मरणं त्वसपिंडानां द्वाह्रि द्वहि ॥ अतो सद्यः स्नानेन शुद्धि
स्यादिति प्राहुर्मनीषिणः ॥ असपिंड इति ज्ञातो यो न ज्ञायते स सपिंडः ॥ तस्मैव वयस्य
यस्त्री तु मा शौचं नान्य गोत्रिणां ॥ भवेत्रैवाथ तस्य स्यादृश्ये वै मुनयो विदुः ॥ अथ पक्षि
णी लक्षणं ॥ द्विदिवा रात्रिरेका च पक्षिणी त्यभिधीयते ॥ अहोरात्रमिति प्रोक्तं नैशिकी
त्यभिधीयते ॥ आ सायमन्तरे यस्या स च स्ता कालउच्यते ॥ एवं विशेयं निर्णीतमाशौचं
तु मनीषिभिः ॥ अथातुरस्नानं ॥ आतुरे स्नाने मुस न्वेदशा वारमनातुरः ॥ स्नात्वा स्ना
त्वा स्पृशेदेनमातुरः शुद्धिमाप्नुयात् ॥ ज्वराभिभूतायां नारी रजसा च परिप्लुता ॥ कथं
तस्या भवेच्छौचं शुद्धिः स्यात् केन कर्मणा ॥ चतुर्थेहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं ॥
सा सचेलावगाह्याप स्पृष्ट्वा स्नानात् पुनः पुनः ॥ दशद्वादश स्नानानि तस्याश्चामेत् पुनः पुनः ॥
अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥ रजस्वलामरणं ॥

अथ १

[illegible] वार ततो जलैः ॥ पंचपल्लवसंयुक्तैः पंचगव्यैः कुशोदकैः ॥ कारयित्वा ततः स्ना
पंचभिः स्नापयित्वा तु गन्धैः प्रेतां रजस्वलां ॥ न स्नानान्तरमेतां रजस्वलां देहशुद्धिः
स्त्री का यां मृतायां तु कथं कुर्वीत याज्ञिकाः ॥ कुंभे सलिलमादाय पंचगव्यं तथैव च ॥ पुण्य
र्मिर्भिमंत्र्यापो वाचा शुद्धिं लभेत्ततः ॥ तेनापि स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥ अन्यः प[illegible] ॥ दशाहाभ्यंतरे चैव म्रियते चेत् सूतिका ॥ कथं तस्या भवेच्छु
द्धिर्दीहकर्म कथं भवेत् ॥ शूर्पे पात्रे निमज्जित्वा चेत्कुशोदकैः ॥ दाहयित्वा वि
धानेन मंत्रवत्सैर्मेधिके ॥ अथ गर्भिणीमरणं ॥ प्रवक्ष्यामि क्रमेणैव शौनकोक्तं
द्विजन्मनां ॥ गर्भिण्यां तु मृतायां वै कथं कुर्वीत मानवाः ॥ गर्भिण्या मरणप्राप्त ष
ण्मासाभ्यंतरे यदि ॥ स तैव दहनं कुर्यात् कुक्षिच्छेदं न कारयेत् ॥ प्रेतां श्मशाने नी
त्वा भस्ती वा पुत्र एव वा ॥ छेदयेदूर्ध्वं षण्मासादूर्ध्वं गर्भिण्या मरणं यदि ॥ नाभे
रधो वाम भागे गर्भच्छेदो विधीयते ॥ शेने सच्छेदयेदुत्ती पुत्रो वा धन्व एव
वा ॥ स गर्भायां मृतायां च संस्कुर्यादुद[illegible]केन तु ॥ अथाग्निहोत्रिणि मंत्रैः
प्रोक्ष्य गर्भ समाहिताः ॥ नीता श्मशाने षण्मासादूर्ध्वं भर्ता विदारयेत् ॥
शिशुमादाय जीवं तं दायये स्तनमन्यथा ॥

यस्तोसौ नरस्तन यात्मा हस्तात् स्मान्चरेत्॥ उदरं चा[illegible]स्तात्पश्चात् [illegible]न परदेत्॥ म॰ १

मधुरा गोमुत्रे रापो हि ष्टादिभिस्त्रिभिः॥ स्नापयित्वा विधायान्यत्स्रंतं त्साव्य तां दहे

नामृतेपस्मै दशाहः स्त्री सूपते वारजस्वला॥ सूतेप्युशापयाकाले स्नाला सूत्रं विमो

चयेत्॥ सूत्रं मंगलसूत्रमपि सर्वः॥ महानद्यः॥ गोदावरी भीमरथी चैव कृष्णवेणी सरस्

स्वती॥ तुंगभद्रा सुप्रयोगा कावेरी सस्तु नामकः॥ दुग्धा दानलिनारेवा वारिशी

ताकलस्वनः॥ एता अपि महानद्यः सैंकुलाद्रिविनिर्गताः॥ अथ पर्वताः॥ श्रीशै

लो हिमवान्मेरुर्मैनाको मलयस्तथा॥ कैलासः कुरकोलश्च [illegible] हेद्रोणसंज्ञकः॥ ॥१०४॥ घ६ महेंद्रो ७

चित्रकूटश्चित्रकूटश्च हेमकूटस्तथैव च॥ गोवर्धनश्च गोकर्णो नीलश्चैक कुं

भस्तथा॥ सह्यो विंध्यश्च मंदारो विख्याताः पर्वता अमी॥ नतश्चैव वराहश्चो

क्रायेचान्यगिरिसंज्ञकाः॥ महानद्यः पर्वताश्चोक्ताः॥ महानद्यंतरं यत्र गिरीव ॥१०४॥

वा यत्र केशु कास्तारा॥ अथ दुर्मरणं॥ विद्युत्तोयाग्नि चंडालसर्प पाशाद्विजायैर

पि॥ रक्ष्माघ्रपशुभिश्च मरणं पापकर्मिणां॥ आत्मानं घातयेयस्तु विषशस्त्रा

दिनायदि॥ स्वेच्छया मृत्युमाप्नोति स याति नरकं ध्रुवं॥ क्षिपेद्रस्मशानिं गायां सरि

रं वापसंस्कृतं॥ नदी धन्यासु वा तीर्थे दुर्मृतस्य [illegible] नरस्य च॥ वर्षाद्दूर्ध्वं भवेत्तस्य प्रायश्चि

त्तं विधानतः॥ नारायणबलिं दत्वा पालाशविधिमाचरेत्॥ प्रेतकर्म ततः कुर्याद्दशाहादि सके

त्रे हितः॥ षोडशादि सपिंडं च तदा तस्योपतिष्ठति॥ देशकालभयाद्वापि सद्यः कर्तुमुपक्रमेत्॥

प्रायश्चित्तं हि द्विगुणं विधायाप्याब्दिकं॥ मृतस्यानिच्छया सद्यः कर्तव्या प्रेतसत्क्रिया॥

प्रायश्चित्तविधिं कृत्वा नैव घ्यामृतस्य तु॥ शस्त्राद्विनाहतोसस्त्रद्विनाद्वी कुर्म्यतो येदि॥

भवेद्दुर्मरणं प्रातुरि सेवं सर्वस्करयः॥ अस्नातोत्तौ चाप्यकृतो च प्रदत्तान्नो तथा द्विजः॥ एवं त्र

विधस्य विप्रस्य सर्वे दोषस्तु तत्कं भवेत्॥ आधितं संवादयं स्यकरणग्रस्तस्य संनैदा॥ त्रिया

हीनस्य मूरर्वस्य स्त्रीजितस्य विशेषतः॥ आसनासन्नः[illegible]चित्तस्य पराधीनस्य नित्यशः॥

श्राद्धत्यागविहीनस्य भस्मांतस्तत्कं भवेत्॥ स्वाध्यायजपहोमादीनात्तोचीव जीये

सदा॥ संध्यां तु मनसा कुर्याद्व्यपात्रमिमंत्रकं॥ नित्यजां दीक्षितानां च व्रतीयं कर्मैव तु री च५

तां॥ नैचाशौचं भवेत्तेषां पितुश्च मरणं विना॥ जानेनेन मरणे चैव नाशौचं ब्रह्मचारि

णां॥ अथास्थि शुद्धिः॥ अस्थिशुद्धिं प्रवक्ष्यामि पंचामृतकुशोदकैः॥

मृद्भस्य गोमये नैव संलिप्य प्रोक्षये जलैः॥ दशवारं निमज्यास्सु प्रतिमेण च संयु

तः॥ पंचगव्यैश्च संशोध्य नधात्तीर्थादिकेपि वा॥ केशराद्यैश्च संप्रोक्ष्य चतुर्दिशातिना

मभिः॥ नैमयोक्तिकरस्ताचैः सुंडकान्मिच कारयेत्॥ रक्षाजिनेन संवेष्य सस्तरं तत्र तु का
रयेत्॥ वेष्टयेत्ताम्रपत्रेण ह्यथवा मृगचर्मणा॥ सुसंस्कृतानामेवास्थ्नां असंस्कृतस्य तं न
विद्यते॥ असंस्कृतानि चास्थीनि न स्पृशेद्ब्राह्मणः क्वचित्॥ अस्थिनिक्षेपः॥ यावद
स्थि मनुष्याणां गंगातोये च तिष्ठति॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ स्ना
त्वा पंचतरेवापि गंगायां स्थापितं यदि॥ अन्हो दशकमध्ये तु यावत्तानि सुण्यमवाप्नुयात्॥ च
सराल्पथमादन्ती कीर्थे चास्थीनि निक्षिपेत्॥ विनागंगामथास्थीनि निहितानि येद्वन नि
क्षिपेत्॥ स्नानं कृत्वाथ तस्याय नेरावाधैश्च नामभिः॥ प्रक्षाल्य पंचगव्ये श्च पुण्यैः स
मनुपार्जयेत्॥ धेनुं दद्यात्सुमायलब्ध्वा तां सुसमाहितः॥ उद्धरेत्पितृनामानि सुसंत
प्ययथाविधि॥ अघमर्षणेन सर्वेण धर्मी चेति नमोस्तुते॥ विसर्जयेज्जले स्थीनि नमो
नारायणाय च॥ अथ गुर्वादिलक्षणं॥ निषेकादीनि कर्माणि यः करोति यथाविधि
संभावयति चान्नेन स विप्रो गुरुरुच्यते॥ कुलक्रमागतो मायातो वंशेयस्य परंपुरा॥ पु
रोहितः स विज्ञेयः सर्वसंस्कारकर्मसु॥ उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः॥
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥ एकदेशं च वेदस्य वेदांगान्यपि नायदि

॥१४॥ वि६ ॥१४५॥ त

योऽध्यापयति वस्वर्थं सउपाध्याय उच्यते॥ अग्न्याधेयं पाकयज्ञमग्निष्टोमादिकान्मखान्॥
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते॥ पितृवत्पुरुषस्येव तत्तच्छ्रेयः पुरोहितः॥ आचा
र्यो वेदवित्सद्भिः पितुस्तस्यो यदुपविः॥ इति श्रीनारायणविरचितायां धर्मप्रवृत्तौ आ
शौचप्रकरणं॥ अथ श्राद्धविधिरभिधीयते॥ तत्र कर्तृनियमानाह॥ दंतधावनम
भ्यंगं न स्नानं त्वाशिनि कृत्तं वनं॥ कर्तानि नित्य रवि पुर्व्वेका चैव परेहनि॥ दंतधावनतां
बूलक्षौमाभ्यंगाम भोजनं॥ रत्नौषध परान्नं च श्राद्धकर्ता विवर्जयेत्॥ पुनर्भोज
नमभ्यंगं भारमध्वानसंगमं॥ दानं प्रतिग्रहो होमः श्राद्धभुगष्ट वर्जयेत्॥ शुचि
निमंत्रयेद्दैवे त्रीन्विप्रान्पित्र्यकर्मणि॥ दैवे पित्र्ये थवैकैकं सपिंडीकरणं विना॥
सायमौपासनं हुत्वा स्वयं भुक्त्वा ततो द्विजान्॥ उपगम्य स्वयं शिष्यः सुतो वा श्र
द्धयान्वितः॥ श्राद्धं श्वो भविता तत्र भवद्भिर्दीयतां क्षणः॥ एवमामंत्र्य नियतो मनो
वाक्कायकर्मभिः॥ भोक्ता जयतु श्वे च ब्रह्मचर्यं मतः परं॥ श्राद्धाहे वाथ कुर्वीत पूर्व
पूर्वद्युरसंभवः॥ परेद्युः प्रथवा प्रातः कुतुपे वा निमंत्रयेत्॥ दत्ता दैवे क्षणं चादौ वाप्य पित्रे चै
मतः॥ स्नातान मध्याह्निकीं संध्यां कृतान् हूयन्निमंत्रयेत्॥
न तप्तिसारिकान् मंत्रान् ब्राह्मणैः सह संपठेत्॥ प्रायश्चित्तनिमित्तं तु सर्वं ... चगाले

प१

श्रं ३

दुकं॥ कुर्यात्प्राङ्मुखस्सर्वं पुतीर्थे नैव कदाचन॥ ब्राह्मणेभ्यस्ततस्त्यहिरण्यसतुर्शेजलैः॥ सर्व
मभ्युक्षयेद्यमततः शुद्धे देसे शयः॥ ब्रह्मदण्डार्थमादाय हिरण्यं सकुशं जले॥ त्रिः प्रदक्षि
णमावृत्य समस्तोपि पठन्द्विजान्॥ दर्भानि वेघ विप्राणामुपनीयः स्वशक्तितः॥ तेभ्यश्चैव
क्षमिदाज्ञां मनोवाक्कायकर्मभिः॥ न होपितरमुद्दिश्य श्राद्धं चामुकवासरे॥ कर्तुं ममा
धिकारोऽस्तु भवंतो ह्यनुमन्यतां॥ कालस्यमुख्यकालोऽस्तु पा[illegible]कादीनां पवित्रता॥ कर्त्रा
निमंत्रितान् एताद्वाप्रक्षत्सुस्तोताधैरन्च॥ द्विराचम्य ततः कर्ता प्राणायाममथाचरेत्॥ पूर्व
वदेवसंकल्पं प्राचीनावीततः परं॥ नाम गोत्रे समुच्चार्य रूपं च श्राद्धकर्मणि॥ प्रेतकर्मणि
गोत्रादिनामसंकीर्त्तयेत् द्विजः॥ संबंधनाम गोत्राणि रूपं चैवात्तु वादयेत्॥ एवं सर्वत्र
नामादि तैले स्या दर्जने पिचा॥ संकल्पे चासने पाद्ये पिंडे चाच्छादने क्षणे॥ अन्ने चानो
दने क्षय्ये नामान्येषु समुच्चरेत्॥ पितृणां चैव देवानां अन्नेन हविषा यथा॥ सद्यः
श्राद्धविधानेन करिष्ये पुष्पदास्यया॥ देवे क्षणं ततो दद्यात् सजलेन कुशैर्विकं॥ पितृ
णामपसव्येन सर्वं स्यात्सलेकं चयत्॥ गोमयेनैव कुर्वीत प्रांगणे मंडलद्वयं॥ श्रा
कालेतु विप्राणां पादप्रक्षालनाय च॥ मंडलं चतुरस्रं स्याद्दैवे प्रादेशसम्मितं॥

॥१७॥ श्रा ॥१७६॥

विस्तारितः पैतृके वर्त्तितयोर्मध्ये षडंगुलं॥ देवार्थे मंडलं चैव प्रागग्रैर्दर्भैः कुशैर्यवान्
गंधपुष्पाक्षिपेत्पात्रे दक्षिणाग्रान्तरं कुशान्सतिलान्॥ मंडलास्त्वमेदे द्वौ ब्राह्मणो
पागतोऽसि॥ तत्रैव विसृज्यार्घं क्षालनं मंडलोपरि॥ दद्यान्मंत्रं समुच्चार्य दै
वे थ पितृकर्मणि॥ द्वतापार्घं पठेन्मंत्रं शन्नो देवीरभिष्टये॥ पादमूले पुनः स्था
नं पाद मध्ये पितामतः॥ प्रपितामतः पादाग्रे पादं प्रक्षाल्य यत्नो मातः॥ शीर्ष
स्यस्यजलं सिंचेन्नो नास्थानादिति गीतं॥ दक्षिणां संस्पृशेत्कर्त्ता ब्राह्मणा मुख
मीक्षते॥ ततो नीचम्य कुशानश्मो निसृज्यार्थं द्विराचमेत्॥ विसर्जेत्पुनः द्विजा दे
भीनाचम्य स्वस्व मंडले शान्या मान्य मेकेनात् मंडलाद्वाद्दकर्मणि॥ देवौ
श्चैव ततः पुर्वं पितृविप्रांसा योसारे॥ दैवेकर्मणि दक्षसंस्थान् प्राङ्मुखान् उप
वेशयेत्॥ उदङ्मुखांस्तथा पित्र्ये प्रासंस्थान् उपवेशयेत्॥ प्राणान्नियम्य सं
क ल्पयस्य यं च वोपविश्यपतु॥ ततः त्रिष्ठे करिष्ये तं प्रक्रांतं श्राद्धकर्मणि च॥
प्राचीनावीतिसपहताइति मंत्रं समुच्चरन्॥ नैरृतीं दिशिमारभ्य सर्वा दिक्षु

क्षिपेत्तिलान्॥ पितॄणां पुरतः प्रोक्ष्य मंत्रेणादीरतामिति॥ उदक्संस्थं तया पादेगाय
त्र्या प्रोक्ष्य येदथ॥ संस्थाप्य पुंडरीकाक्षं पादादि प्रोक्ष्य वारिणा॥ श्राद्धकालेग
यां ध्यायेत्प्राचीनावीत्युदङ्मुखः॥ उपविष्टः स्वशाखामात्रपीठदिवानामभिस
म्मुखः॥ आसनादि यथाचारः कर्म कुर्यात्तथैव हि॥ देवानां दक्षिणे द
द्यात्तं बलादि कुशासनं॥ पितॄणामासनं दद्याद्वामभागे यथोचितं॥ अ
र्घ्यस्यासादनात्सर्वं पश्चादावाहनं भवेत्॥ यथाचारस्तथा कुर्याद्द्वाष्यकारोऽ
त्रवीदथ॥ विश्वेदेवास इत्यस्य द्विरावृत्तिर्भवेदिह॥ विश्वेदेवाः शृणुतेतिसर
मंत्रमुदीरयेत्॥ आगच्छंतु महाभागा विश्वेदेवा महाबलाः॥ ये यत्र विहि
ताः श्राद्धे सावधाना भवंतु ते॥ अर्घ्यार्थं हि समासाद्य दैवपित्र्ये यथादितः॥ सौ
वर्णे राजते ताम्रे तदभावे च पर्णके॥ अर्घ्यार्थं हि प्रकुर्वीत दैवे पात्रद्वयं पैतृ
के॥ त्रीणि दैवे वार्घ्यपात्राणि पर्णाभ्यामुभयत्र तु॥ दैवे पित्रे च पर्णाभ्यामर्घ्य

पात्राणि कार्यरेत॥ पर्णयोरेकतो मूले वस्त्रान्तर्यानतः क्रमात्॥ प्रविश्यंतियया पा
त्रे समूलान्यंगुलानि तु॥ मानं स्यादर्घ्यपात्राणां दैवपित्र्ये च कर्मणि॥ देवानामर्घ्य
पात्रं स्याच्चतुरंगुलविस्तर [illegible] तं॥ उन्नतं चाथ वैवृत्तं पैतृके गुलपंचकं॥
अंतः प्रसार्य प्रागग्रौ ह्युदक्संस्थौ कुशौ च वै॥ द्वौ द्वौ तु न्युब्जितौ स्यातामर्घ्यपा
त्रे कुशोपरि॥ ~~शंनोदेवीतिमंत्रेण~~ गायत्र्या प्रोक्षणं चैतान्नैकुर्यात्पात्रे च पैतृके॥
उपरिष्टादधः कार्या वधः स्थो च तथोपरि॥ शन्नोदेवीति मंत्रेणैस सकुश्चा
यी इरयेत्॥ प्रतिपात्रे यवोसीति मंत्रांतेन निर्वपेद्यवान्॥ गंधपुष्पे कुशादीन्नि
निक्षिपेदर्घ्यपात्रयोः॥ संपन्ने दैवपात्रे तु स्यालार्घ्ये चेसथाब्रवीत्॥ या दि
व्या इति मंत्रेण दद्यादर्घ्यं पृथक् पृथक्॥ गंधमाल्यांबरादीनि कांजनुसमर्पये
वा॥ देवार्चा दक्षिणादिः स्यात्सादजान्वं समर्पयेत्॥ पितॄणां सजानु पादेषु वा
मांगादिषु पैतृके॥ अर्घ्यितप्राच्यं तत्पूर्वी रजयेद्दक्षा तैः क्रमात्॥ गंधपुष्पे ध
पदीपो वासांस्याभरणानि च॥ दद्याद्वासांसि मंत्रेण युवा सुवासाइसथ॥

दत्त्वा पितृभ्यो वासांसि पश्चान्मंत्रं समुच्चरेत्॥ पूजनं विधिवत्कृत्वा ततोनुज्ञां द्विज
न्मनां॥ गृहीत्वाप्यपसव्येन कुर्याच्च पितृपूजनं॥ प्राचीनावीत्यपो दद्यात्पितृन्
मी प्रदक्षिणं॥ दर्भान्द्विगुणभुग्नांस्तु दद्यात्तेषामासनेषु तु॥ आवाहयेत्पितॄं
स्तेषु विप्रेषु विधिवत्क्रमात्॥ उशंतस्त्वेतिमंत्रेण प्रतिपितृ समुच्चरेत्॥ आपो दत्त्वा
थ दर्भेषु सर्घ्यपात्राणि वै क्रमात्॥ एवं दक्षिणकाग्राणि विप्राग्ने यित्प्रणवोदिशु॥
॥११८॥ नृह
आस्तीर्य पूर्ववद्दर्भान्न अपश्चैव तथोपरि॥ गायत्र्या तानि संप्रोक्ष्य दत्त्वाथ ता
नि पूर्ववत्॥ तैजसे रमयेपात्रेमृन्मये तर्हिं ते कुशैः॥ एतत्द्रव्येषु चाग्नेयी
दिक्संस्थेषु ततः परं॥ उत्तानेष्वपसव्येन तेषु वै निर्वपेत्तिलान्॥ आवृत्तिः प्र
तिपात्रं स्यान्मंत्रस्योरस्तु नेष्यते॥ गंधपुष्पाणि चैतेषु पात्रेषु प्रक्षि
पेत्तथा॥ स्वधार्घ्या स्तो उपवीतानि वेदयेत्॥ अन्या आपः प्रदातव्या वि
प्रपाणिष्वतः परं॥ अर्घ्यं सशेषमादाय दक्षिणेन तु पाणिना॥ स
व्यस्थं हृदि तेन निनयेत्पितृतीर्थतः॥ त्रिभिः पितरि दत्त्वार्घ्यं
॥११७॥

मिति पाणिष्वनुक्रमात्॥ दत्त्वा तत्पाणिनीतास्ता यादिव्याचीनुमंत्र्यतु॥ दत्त्वार्घ्यं पितृह
स्तेषु पश्चान्मंत्रं समुच्चरेत्॥ या दिव्या इत्यनेनैव हस्तो हस्तान्निधापयेत्॥ पितृ
पात्रे प्रसिंचार्घ्यशेषं पात्रद्वयस्थितं॥ अनेन पुत्रकामस्तैर्मुखमेकीकरेत्ते जीले॥
॥१९०॥
दत्त्वार्घ्यं संस्रवं तेषां पात्रे स्वाविधानतः॥ पितृभ्यः स्थानमसीति न्युब्जं
पात्रं करोत्यथ॥ न्यग्बिलं पितृपात्रं स्यादासमाप्तेर्न चालयेत्॥ उत्तानं नास्ती
येन पिहितं तेन चालयेत्॥ नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितं॥ आवृत्ता
स्तत्र तिष्ठंति पितरः शौनकोऽब्रवीत्॥ उद्धृतं यदि तत्पात्रं विरतं वाय दाभवेत्॥
अभोज्यं तद्भवेच्छ्राद्धं क्रुद्धैः पितृगणैर्गतैः॥ प्राचीनावीत्यपो दत्त्वा पितृपूर्वं ति
लैः क्रमात्॥ अर्चयेदधि स्वारस्थन मोव इति मंत्रतः॥ प्राचीनावीत्यथेदानीं
गंधमाल्यं सधूपकं॥ दीपं वस्त्रं यथाशक्ति देयं वा यैतरांतरा॥ कुर्वीत भोजना
र्थे हि मंडलानि यथाक्रमं॥ दैविके चतुरस्रं तु पित्र्ये वृत्तानि वै यतः॥ क्षिप
द्वेयवानदर्भौ पितृके सहकुशां सिलान्॥ मंडलं दैविके पात्रे सौवर्णे रज
तान्यथा॥

नदनावेसुपर्णो ॥ नां नाजनानि न्यसेदथ ॥ आ ॥ ॥ मादिपरिस्तीर्यपित्दूर्वैतिलोद
कैः ॥ कुशास्तिलैर्नस्मानाधि ॥ र्मध्येमध्येजलेनतु ॥ करशुद्धिंलतः कूर्यात्ततोपंमंड
लेक्षिपेत् ॥ दैवे वायव्यमारभ्यपरि ॥ चेज्जलेनच ॥ कुशैः पात्रेयवैश्चवृक्षस्यना
करश्शोजनं ॥ पित्दयज्ञाचरो ॥ मध्वृत्याभ्यज्यसर्पिषा ॥ अग्नौकरिष्य इत्येतान्नष्ठ
ष्ट्वान्नतः ॥ यताभिति ॥ अग्नौकरिष्येक ॥ इवैकुरवीणीतिवापि तान् ॥ क्रियतांतैः कु
रुष्वेतिकुरुष्वेति यथाक्रमं ॥ प्राचीनावीतिनैव स्यादनुज्ञांचाहुतिद्वयं ॥ सोमायपि
तिमंत्राभ्यां गृह्याग्नौजुहुयाद्धविः ॥ अभावे तु ॥ स्यजुहुयात्पितृपाणिषु ॥ अभ
भज्यपितृपात्रे हुतशेषं च यत् घृतं ॥ कुशैराज्यंगृहीत्वातु मध्ये नं दिवइसच ॥
दैवपूर्वाणि सर्वाणि भाजनान्यपि धारयेत् ॥ आमासिहस्तादिकान्नमंत्रान्नस
न्तो निचजपन्स्वयं ॥ समैनैव ततोन्नादि विधिना परिवेषयेत् ॥ अन्नं च पायसं
भक्ष्यं घृतं च व्यंजनादिकं ॥ सूपमंते प्रदातव्यं सर्वं स्याद्देवपूर्वकं ॥ कतु ॥ दक्षिणतो दै
वे पायसादिघृतं च यत् ॥ तथा च नामतः स्वस्य पैतृके परिवेषयेत् ॥ पितृणां भो

न४
॥१०२॥
॥१०९

जनस्य ॥ प्राचीनावीतिनेत्यथा ॥ अन्नेषुपरिविष्टेषु हुतशेषं ददात्स्थ ॥ देवपात्रस्थि
तं चान्नं गायत्र्याचाभिमंत्रयेत् ॥ उद्दिश्यचान्नं विश्वेभ्योदास्यमानमथापिवा ॥
परिविष्टे यथात्सैः सरदन्नादिपंचकं ॥ सकुशं तत्तु रेदद्यान्नो चेदन्नं जलं
भुवि ॥ अस्यार्थः ॥ सरदात्सैः परिवेषणेन भवेच्चेत्कुशं विनांविवेद्यजलं भु
विनिनयेदित्यर्थः ॥ तथा च ॥ न भवेस ॥ त्सैः परिवेषं कुशं विना ॥ दद्या
दन्नं जलं भूमौ निनयेत्पितृकेपि च ॥ दत्वाजपेत्ततो मंत्रान्ये देवासो दिवीस्थ ॥
पितृभ्यो पिताथ्याद द्वायेचेहे तिजपेदथ ॥ तिष्ठन्कुर्यादुपस्थानं देवताभ्य र
तिक्रमात् ॥ नमेदिव्यादिभिर्मंत्रैः सव्येनैवद्विजस्तुतिः ॥ तिथिवारादिकानुस्मृ
त्यात्र्ही चासतिलंजलं ॥ पितॄन्देवान्समुद्दिश्य क्रियमाणेनवैमया ॥
श्राद्धेनैव पितुश्चास्मत्पितॄणां चैवमेवहि ॥ ब्रह्मलोकनिवासोस्तु निनयेत्
सतिलंजलं ॥ ब्राह्मणैः प्रोक्षयित्वान्नं गायत्रीं समुद्दिश्य तु ॥ परिषेचन
मन्नस्य कारयेद्देवपूर्वकं ॥ चित्रगुप्त' बलिं चैवमन्ने दद्यात्प्रागुद्भुङ्क्तद्विजः ॥

हा

अन्नेन चाथ वाज्येन जले नान्येन वापि वा॥ सकृदुक्त्वा तु गायत्रीं पित्रादिषु

पैतृमधु॥ भाजने च पसव्येन दद्यात् सव्येन दैविके॥ तथैवापोशनार्थं हि

पित्रादिद्विजपाणिषु॥ निनयेत्तु जलं चाथ सव्येनैव तु दैविके॥ तिष्ठन्नेव

स्मरेद्यादीन्नीशानोदीन्तु दद्यु स्वः॥ ततो देवा स्वतं ~~निनयेत्तु जलं चाथ~~

चासु जुषध्वं हियथासु स्वं॥ उत्क्रम्य तौ प्रसारणमस्मिस्यातापिवेदथ॥

नाग्य तो भोजनं कुर्युर्लेभं यथेय यारुचि॥ भुंजानान्श्रावयेद्विप्रान् रक्षोघ्नी

॥१९०॥ नूपितृलिंगकान्॥ पुनातानि पवित्राणि ऋचो गीताः पितृस्तुतिः॥ यावदुत्तन वस्त्रं

मे यावद्भुंजीतवाग्यतः॥ पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणाः॥ भोजने

स्यतु सर्यो संकिंतु देयं ततो विकं यथद्भुक्तं ततः किं चिंतुच्छिष्टभागिनां॥ रक्षा त्वसे दिपं४

षु विप्रेषु गायत्रीं समुदीरयेत्॥ तस्माः स्वरतिनान्रष्ठप्यादेवांश्चाथ पितृन पि॥ ॥१९०॥

त्तेषु श्रावयेन्नित्यं मधुवाताकृतायते॥ अक्षन्निति त्वेतान् विप्रान् संपन्न

मिति पृच्छतः॥ त्रियतो मन्नशेषं किंतेन्चैः॥ सह भुज्यतां॥ तदास्वीरयस

वी स्यात् किंचित् किंचित्तंचयेत्॥ सर्ववर्णिकमन्नाद्य मानीयाप्लाव्य वारिणा सम

सृजेद्भुक्तवतामग्रतः प्रकिरेद्भुवि॥ उरतः श्वातिलान्दर्भान्प्रोक्षाथ पितृभाजना

त॥ ये अग्निदग्धा मंत्रेण मुख्यमन्नं प्रकीरे ~~यात्~~ दथ॥ यथ द्भुक्तं ततः किंचित्किं

चित् पिंडार्थं मुद्धरेयत्॥ पितृयज्ञ चरोपरन्नम ध्वंतं प्रक्षिपेदथ॥ यजमाने

कुले जाता इतिमंत्रं समुच्चरन्॥ पुनरोषं सृजेद्भूमौ ब्राह्मणः स्वस्वदक्षिणे॥ मा

पान्नं पायसं चान्नं भक्ष्य भोज्यादिकं चयत्॥ यथेष्टं तो द्विजैः श्राद्धसर्वं पिंड

र्थं मुद्धरेत्॥ माषाः सर्वत्र वैग्राह्यो दैवे पित्र्ये च कर्मणि॥ प्रेतपिंडेन चग्राह्याइ

सेवं शौनकोऽब्रवीत्॥ उत्तराचमनात्पूर्वं पिंडदानं भवेदिह॥ पश्चाद्वापि व

दंत्यन्ये केचिद्धर्मविदो जनाः॥ पिंडदानमनाचांतेषां चांते षु च ११रा भवेत्॥

नि३ अंभोनयमिनाद्यं तं पितृयज्ञं समापयेत्॥ संनिधौ नैवाग्नीनां रथवोच्छिष्ट

सन्निधौ॥ पिंडदानं भवेत्तत्र वक्ति कारनचो यथा॥ अर्वाग्यस्या न्निरेवं सेपनले रवा

प॥ मेरीति॥ अभ्युक्ष्य तामवसीयेसरुदाच्छिन्नवर्हि षा॥ लेखायां पिंडे ददेत् उ

८१

स्या२ ये च त्वे त्वासु दि मंत्रतः

॥१२१

चं तामिति तु त्रिभिः ॥ तत्र पिंडत्रयं दद्यात् प्राचीनेन पाणिना ॥ पितरित्यथ चैतते विष्णुर्य
च्चेति मंत्रतः ॥ पितृभ्यो नामानि जानीयात् तद् दिवदेन्नमात् ॥ अग्निष्वात्ता हुता
तत्र पितर इति तान नमं त्रतु ॥ अप दक्षिणमावृत्य स्मुदङ्मुखः प्राणानायम्य च ॥ आन्या
वृत्सानुमं त्र्यामीमदं तेसादिमंत्रतः ॥ चरुः शेषमव घ्रायनिनयेत् सर्वं च जलं ॥ आ
घ्रायाथ चरोः शेषमाचामेदुपवीतिना ॥ निनयेद् पसव्येन पुं धतामित्यपो
थवे ॥ आ भ्यंजनांक्ष्वेति नामादि मंत्राभ्यां तैलमंजनं ॥ दद्यात् ऊर्णामयै ता दूर्दिति
पिंडेषु ततः परं ॥ दद्यो हि पिंडेषु लोमानि प्रकोष्ठस्थानि यानि च ॥ पंचाशदूर्ध्वं सरोदूर्ध्वं
सर्वी दूर्वेति चोनीरतः ॥ वरुणः पितृपिंडेस्यात् प्रजापतिः पितामहे ॥ प्रपितामह पिं
डे ऽग्निरित्येताः पिंडदेवताः ॥ दत्ता पिंडत्रयं चेषां सव्येनैव तु पूजयेत् ॥ गंधपु
ष्पादिभिरेव च पिंडाधिष्ठातृदेवताः ॥ यत्किंचित् सच्चा योगे लेभस्य भोज्यादिकं च
यत् ॥ अनिवेद्य न भोक्तव्यं पिंडेभ्यो न कदाचन ॥ नमो व स्सुपस्थाय नैमोनं
ति च शेनेतु ॥ परेतनेति मंत्रेण पिंडं सांध्याप्रगाए येत् ॥ औपासनाग्निकेगधे

॥१२१॥

जेषदग्नेतमिद्धचा ॥ यदंतरिक्षमित्येतांतस्य एवजपेदृचं ॥ तिथिवारादिका
न्सर्वान् पितृन्सर्वे वक्तुच्चरेत् ॥ पितॄणां ब्रह्मलोको कोस्तु इत्युक्तानिनयेज्ज
लं ॥ आचांतानां च मुख्यार्थं पाणी प्रक्षालयेद् द्विः ॥ मध्ये मध्ये जलं चैव द
द्याद्वक्तुरक्षतान् ॥ पुनर्दैयं जलं दैवे पितॄणामपसव्यतः ॥ जलं दद्या
त्तिलान्दर्भान् अक्षतान् एवं च जलं ॥ इष्ट्वाथ पुनः वतोस्मद्गोत्रे हमभिवा
दयेत् ॥ प्रत्युचुस्ते ततो विप्राः पितृप्रसादोस्त्विति सर्थ ॥ पितृप्रसादवो लब्धान्
संगृह्य स्वयमक्षतान् ॥ धारयेच्छिरसि स्वस्य स्वगोत्रस्याशिव दये ॥
चालयित्वाथ पात्राणि स्वस्ति सर्व समुच्चरेत् ॥ दद्यादक्षय्यमुदकं दैवे पि
त्र्ये यथाक्रमं ॥ अन्नप्रकिरणं केचिद् त्रैवेच्छंति सूरयः ॥ पात्रस्थानेषु स
र्वेषु यथाचारो भवेदिति ॥ अन्नं प्रकीरणार्थीयत्तदानीय जलपूतं ॥ आचां
तानां ~~प्रकिरेद्भुवि~~ समीपेषु ततः प्रकिरेद्भुवि ॥ चालयित्वा तु पात्राणि
स्वस्ति सत्का तिलाक्षतान् ॥ तत्रस्थापने क्षिपेत्तत्र प्रकिरेदं नेम पद्ध ॥ अ

॥११२॥

असंस्कृतेति मंत्रेण पितॄणां प्रकीरेद्भुवि ॥ असोमपाश्च मंत्रेण देवानां प्रकिरे
द्भुवि ॥ उत्तानं प्रथमं पात्रं कृत्वा यज्ञोपवीतस्य ॥ दत्वा च दक्षिणां शाखामाविस
र्जेदेतं स्वधोच्यतां ॥ अवशिष्टं तु यत्किंचिदर्घ्यपात्रस्थितं जलं ॥ पिंडानां
पुरतः सिंचेदेतं स्वधोच्यतामिति सर्वथा ॥ अक्षय्यायास्तु विप्राणां ततः पिंडा
न समुद्धरेत् ॥ शांतिरस्त्विति दिग्भिर्मंत्रैः पिंडस्थाने जलं क्षिपेत् ॥ स्वस्ति
तीत्युच्चरेत्सम्यग्ब्राह्मणैः प्रोच्यतां हविः ॥ ततो विसर्जयेद्विप्रान् वाजे वा
जेति ऋचा ॥ उत्तिष्ठतेति वामोसंस्पृष्ट्वा विप्रस्य वै पितुः ॥ स दैव पि
तरो दैवाः स्वस्थानं ॥ उपघ्नाताः आमा वाजस्य प्रसवोऽसौ नारितिमंत्रं समु
च्चरेत् ॥ त्रिः प्रदक्षिणमावृत्य मंडलस्थानद्विजानथ ॥ पवित्रग्रंथिमु
त्सृज्य मंडले विसृजेज्जलं ॥ दक्षिणाभिमुखस्तिष्ठन् याचेतेमान्वरा
न्पितॄन् ॥ दातारो नोऽभिवर्धंतां वेदाः संततिरेव नः ॥ श्रद्धा च नो
मा व्यगमद्बहु देयं च नोऽस्त्विति ॥ अन्नं च नो बहु भवेदतिथींश्च लभे

॥११२॥

महि ॥ याचितारश्च नः संतु मा च याचिष्म कंचन ॥ याचितारं प्रतिब्रूयुस्त
थैवास्त्विति ते द्विजाः ॥ स्वादुषंसद इत्येतौ मंत्रौ काम्यौ पठेदथ ॥ अक्ष
तान्नमक्षिसादेष्वि द्वैवसातिश्चेति च ॥ लभेदथाशिषो मंत्रः संतु
ष्टेभ्यो यथारुचिः ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥

प

प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः ॥ पश्चात्तेनाद्यैव पादान्प्रवि
प्राणां क्षालयेदथ ॥ मद्वेषु निस्त्रावन्नीतश्चैवभुवं दयेत ॥ अघो
मे सफलं जन्म भवत्सादाब्जवंदनो ॥ प्रथमे [illegible] वं राजाः सर्वे पात

२५

वोनुगम्य प्रदक्षिणं ॥ पत्रशाकादिदानेन नक्केशितायस्य मीह गाः ॥ तत्केरा
जातं चिकेतु विसृज्य सपूर्तुमेहं [illegible] सह गावि प्राः सर्वे
पर्वे समातिष्ठः ॥ आसनादेन्ते सत्कारो भवत्सत्कारएव तु ॥ यस्य स्मृत्या
च नामोक्त्या तपो यज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति स घो वंदे तम

ज्य ५

॥११३॥

स्तुतं ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः ॥ श्राद्धं संपूर्णतां याति प्रसा
दाद्भवतां मम ॥ जपेन्मंत्रं वसिष्ठोऽहं देवानं वसिष्ठ इत्यथ ॥ इदं पितृभ्य इ ते
तानु चैव गाथां पठेदपि ॥ अस्मद्वंश्याद्विजान्मानः पितृयज्ञे ममाधवे ॥ दे
ता तौ संपुटौ पाणी प्रासीमांतमनुव्रजेत ॥ म्रियतो चेत्पिता यस्य वि
द्यमाने पितामहे ॥ पैतृकाद्यपि नामानि कथमेवोच्चरेदिति ॥ द्विवारं पि
तृनामैव पितृकाद्यपु वै यतः ॥ प्रपितामहनाम स्यादेकवारमितीत
नु ॥ अनेन विधिना श्राद्धं कुर्याज्जीवपितामहे ॥ दद्यात्पिंडद्वयं पित्रे चा
द्येकं प्रपितामहे ॥ इति श्रीनारायणविरचितायां धर्मप्रवृत्तौ श्राद्धवि
धिप्रकरणं ॥ अथ श्राद्धोपयोगिवचनानि लिख्यंते ॥ प्रसिद्धं विधिना
पित्रोः श्राद्धं करोत्सो द्विजोत्तमाः ॥ कुर्यात्संचमलायत्नान्न इतियत्सेविदोवि
दुः ॥ पित्रोः प्रसादिकं श्राद्धं विधिवन्नात्र माप्यया ॥ कुर्यात्संचमलायतादिस

॥११४॥

